YAJUR VEDA

(Volume III)

(English translation of Mantras with Sanskrit text and transliteration)

यजुर्वेद

तृतीयो भागः

YAJUR VEDA

Volume III

[Text, Translation : Chapters 26-40]

तृतीयो भागः

[मूलपाठः, अनुवादश्च - काण्ड 26-40]

English Translation

by

Swami Satya Prakash Saraswati

and

Udaya Vir Viraj

DAV Publication Division

Delhi-110034

About this Edition

The great reformer, Swami Dayanand who ushered in a renaissance of Indian society towards the end of 19th century had ordained that :

The vedas are the source of true knowledge. To read and understand the vedas is the supreme duty of one and all.

This is one of the ten Principles of the Arya Samaj as laid down by Swami ji. Importance and relevance of the Vedas has been succinctly said in the Upanishadas also :

वेदेन वै देवा असुराणां वित्तं वेद्यमविन्दन्त
तद् वेदस्य वेदत्वम्। (Taittiriya samhita : 1.7.4.6 तैत्तिरीय संहिता)

The Vedas are so called because each statement therein informs a man of the ideals of human life, called the Law of Righteousness, to understand which there is no better source.

To meet the need of a modern, easy to understand English translation of the Vedas, the Veda Pratishthan of DAV College Managing Committee, New Delhi had been publishing complete translation of the four Vedas in twenty-two volumes since 1977. The first edition was well produced and well received. Later as this important task slipped into inexperienced hands, quality of printing and paper became inferior while the price was unduly raised.

In the year 2008, the responsibility of publishing and propagating the Vedas has been taken over by the Publication Division of the DAV College Managing Committee. This new 2008 edition has far superior production values and is priced at less then one-third of the price it was being sold so far.

Our object is to make the Vedas easily affordable for every one who is interested in having a set of the four Vedas in his home for him and the family members to read and benefit by their divine message.

We propose to publish the Hindi translation of the four Vedas also in the near future and offer at a very moderate price. We seek your cooperation in this noble task.

Vishwa Nath
Vice President
DAV College Managing Committee

Contents

YAJURVEDA SAṀHITĀ

यजुर्वेद संहिता

अथ षड्विंशोऽध्यायः ।

अग्निश्च पृथिवी च सन्नते ते मे सं नमतामदो वायुश्चान्तरिक्षं च सन्नते ते मे सं नमतामद
आदित्यश्च द्यौश्च सन्नते ते मे सं नमतामद आपश्च वरुणश्च सन्नते ते मे सं नमतामदः ।
सप्त सꣳसदो अष्टमी भूतसाधनी । सकामाँ२ अध्वनस्कुरु संज्ञानमस्तु मेऽमुना ॥ १ ॥

यथेमां वाचं कल्याणीमावदानि जनेभ्यः ।
ब्रह्मराजन्याभ्याꣳ शूद्राय चार्याय च स्वाय चारणाय च ।
प्रियो देवानां दक्षिणायै दातुरिह भूयासमयं मे कामः समृध्यतामुप मादो नमतु ॥ २ ॥

बृहस्पते अति यदर्यो अर्हाद् द्युमद्विभाति क्रतुमज्जनेषु ।
यद्दीदयच्छवस ऋतप्रजात तदस्मासु द्रविणं धेहि चित्रम् ।
उपयामगृहीतोऽसि बृहस्पतये त्वै—ष ते योनिर्—बृहस्पतये त्वा ॥ ३ ॥

ATHA ṢAḌVIMŚO'DHYĀYAḤ

Agniśca pṛthivī ca sannate te me saṁ namatāmado (i) vāyuścāntarikṣaṁ ca sannate te me saṁ namatāmada (ii) ādityaśca dyauśca sannate te me saṁ namatāmada (iii) āpaśca varuṇásca sannate te me saṁ namatāmada (iv). Sapta saṁsado aṣṭamī bhūtasādhanī. Sakāmāṅ adhvanaskuru saṁjñānamastu me' munā (v). //1//

Yathemāṁ vācaṁ kalyāṇīmāvadāni janebhyaḥ.
Brahmarājānyābhyāṁ śūdrāya cāryāya ca svāya cāraṇāya ca.
Priyo devānāṁ dakṣiṇāyai dāturiha bhūyāsamayaṁ me kāmaḥ samṛdhyatāmupa mādo namatu (i). //2//

Bṛhaspate ati yadaryo arhād dyumadvibhāti kratumajjaneṣu.
Yaddīdayacchavasa ṛtaprajāta tadasmāsu draviṇaṁ dhehi citram (i).
Upayāmagṛhīto' si bṛhaspataye tvai- (iii) ṣa te yonir- (iv) bṛhaspataye tvā (v). //3//

CHAPTER TWENTY-SIX

1. O Lord, fire and earth have submitted to you; may they make so and so submit to me. (1) Wind and mid-space have submitted to you; may they make so and so submit to me. (2) The sun and sky have submitted to you; may they make so and so submit to me. (3) Waters and ocean have submitted to you; may they make so and so submit to me. (4) Here we have a set of seven and eighth, the earth, is the sustainer of all beings. Make our ways capable of fulfilling our desires. May I have complete harmony with so and so. (5)

2. O Lord, may I address this auspicious speech of yours to all the people, intellectuals and administrators, workers and producers of wealth, our kinsmen and the strangers. May I become favourite of the learned ones and of him, who gives liberal guerdon. May such and such wish of mine be fulfilled; may I get affection of so and so. (1)

3. May you bestow on us that wonderful treasure, which is worthy of the pious and righteous, is endowed by its lustre, and which may be effectively utilized for public purpose, O Lord Supreme, born of truth. (1) O devotional bliss, you have been duly accepted. (2) You to the Lord Supreme. (3) This is your abode. (4) You to the Lord Supreme. (5)

इन्द्र गोमन्निह या॑हि पिबा॒ सोमं॑ शतक्रतो । वि॒द्यद्भि॒र्ग्राव॑भिः सु॒तम् ।
उ॒प॒या॒मगृ॑हीतो॒ऽसी॒न्द्रा॑य त्वा॒ गोम॑त ए॒ष ते॒ योनि॒रिन्द्रा॑य त्वा॒ गोम॑ते ॥ ४ ॥

इन्द्रा या॑हि वृत्रहन्पिबा॒ सोमं॑ शतक्रतो । गोम॑द्भि॒र्ग्राव॑भिः सु॒तम् ।
उ॒प॒या॒मगृ॑हीतो॒ऽसी॒न्द्रा॑य त्वा॒ गोम॑त ए॒ष ते॒ योनि॒रिन्द्रा॑य त्वा॒ गोम॑ते ॥ ५ ॥

ऋ॒तावा॑नं वैश्वान॒रमृ॒तस्य॒ ज्योति॑ष॒स्पति॑म् । अज॑स्रं घ॒र्ममी॑महे ।
उ॒प॒या॒मगृ॑हीतोऽसि वैश्वान॒राय॑ त्वै॒ष ते॒ योनि॑र्वैश्वान॒राय॑ त्वा ॥ ६ ॥

वै॒श्वा॒न॒रस्य॑ सुम॒तौ स्या॑म॒ राजा॒ हि कं॒ भुव॑नानामभि॒श्रीः ।
इ॒तो जा॒तो विश्व॑मि॒दं वि च॑ष्टे वैश्वान॒रो य॑तते॒ सूर्ये॑ण ॥
उ॒प॒या॒मगृ॑हीतोऽसि वैश्वान॒राय॑ त्वै॒ष ते॒ योनि॑र्वैश्वान॒राय॑ त्वा ॥ ७ ॥

वै॒श्वा॒न॒रो न॑ ऊ॒तय॒ आ प्र या॑तु परा॒वतः॑ । अ॒ग्निरु॒क्थेन॒ वाह॑सा ॥
उ॒प॒या॒मगृ॑हीतोऽसि वैश्वान॒राय॑ त्वै॒ष ते॒ योनि॑र्वैश्वान॒राय॑ त्वा ॥ ८ ॥

Indra gomanniha yāhi pibā somaṁ śatakrato. Vidyadbhirgrāvabhiḥ sutam (i).
Upayāmagṛhīto'sī - (ii) ndrāya tvā gomata (iii) eṣa te yonir- (iv) indrāya ṭvā gomate (v). //4//

Indrā yāhi vṛtrahan pibā somaṁ śatakrato. Gomadbhirgrāvabhiḥ sutam (i).
Upayāmagṛhīto' sī - (ii) ndrāya tvā gomata (iii) eṣa te yonir- (iv) indrāya tvā gomate. (v). //5//

Ṛtāvānaṁ vaiśvānaramṛtasya jyotiṣaspatim. Ajasraṁ gharmamīmahe (i).
Upayāmagṛhīto'si (ii) vaiśvānarāya tvai-(iii) ṣa te yonir- (iv) vaiśvānarāya tvā (v). //6//

Vaiśvānarasya sumatau syāma rājā hi kaṁ bhuvanānāmabhiśrīḥ.
Ito jāto viśvamidaṁ vi caṣṭe vaiśvānaro yatate sūryeṇa (i).
Upayāmagṛhīto' si (ii) vaiśvānarāya tvai- (iii) ṣa te yonir- (iv) vaiśvānarāya tvā (v). //7//

Vaiśvānaro na ūtaya ā pra yātu parāvataḥ. Agnirukthena vāhasā (i).
Upayāmagṛhīto'si (ii) vaiśvānarāya tvai- (iii) ṣa te yonir- (iv) vaiśvānarāyā tvā (v). //8//

4. O resplendent Lord, rich in divine speech, busy in hundreds of actions, come here and drink cure-juice (i.e. the bliss), pressed out with crushing stones. (1) You have been duly accepted. (2) You to the resplendent Lord, rich in divine speech. (3) This is your abode. (4) You to the resplendent Lord, rich in divine speech. (5)

5. O resplendent Lord, slayer of evil tendencies, busy in hundreds of actions, come here and drink cure-juice (i.e. the bliss), pressed out with crushing stones. (1) You have been duly accepted. (2) You to the resplendent Lord, rich in divine speech. (3) This is your abode. (4) You to the resplendent Lord, rich in divine speech. (5)

6. We seek the continuous warmth, full of righteousness, benefactor of all men, the Lord of truth and light. (1) You have been duly accepted. (2) You to the benefactor of all men. (3) This is your abode. (4) You to the benefactor of all men. (5)

7. May we continue to be in the grace of the leader of all; He is the august sovereign of all beings. Since the very inception, He is taking excellent care of the entire universe. This leader of all accompanies the rising sun. (1) You have been duly accepted. (2) You to the leader of all. (3) This is your abode. (4) You to the leader of all. (5)

8. May the adorable Lord, benefactor of all men, come to our succour from far away riding the praises as a vehicle. (1) You have been duly accepted. (2) You to the benefactor of all men. (3) This is your abode. (4) You to the benefactor of all men. (5)

अग्निर्ऋषिः पवमानः पाञ्चजन्यः पुरोहितः । तमीमहे महागयम् ॥
उपयामगृहीतोऽस्यग्नये त्वा वर्चसे एष ते योनिरग्नये त्वा वर्चसे ॥ ९ ॥
महाँ२ इन्द्रो वज्रहस्तः षोडशी शर्म यच्छतु । हन्तु पाप्मानं योऽस्मान्द्वेष्टि ॥
उपयामगृहीतोऽसि महेन्द्राय त्वैष ते योनिर्महेन्द्राय त्वा ॥ १० ॥
तं वो दस्ममृतीषहं वसोर्मन्दानमन्धसः । अभि वत्सं न स्वसरेषु धेनव इन्द्रं गीर्भिर्नवामहे ॥११॥
यद्वाहिष्ठं तदग्नये बृहदर्च विभावसो । महिषीव त्वद्रयिस्त्वद्वाजा उदीरते ॥ १२ ॥
एह्यू षु ब्रवाणि तेऽग्न इत्थेतरा गिरः । एभिर्वर्धास इन्दुभिः ॥ १३ ॥
ऋतवस्ते यज्ञं वि तन्वन्तु मासा रक्षन्तु ते हविः ।
संवत्सरस्ते यज्ञं दधातु नः प्रजां च परि पातु नः ॥ १४ ॥
उपह्वरे गिरीणाᳬं सङ्गमे च नदीनाम् । धिया विप्रो अजायत ॥ १५ ॥

Agnirṛṣiḥ pavamānaḥ pañcajanyaḥ purohitaḥ. Tamīmahe mahāgayam (i).
Upayāmagṛhīto'sya- (ii) gnaye tvā varcase (iii) eṣa te yonir- ((iv) agnaye tvā varcase (v). //9//

Mahāñ indro vajrahastaḥ ṣodaśī śarma yacchatu. Hantu pāpmānaṁ yo'samāndveṣṭi (i). Upayāmagṛhīto' si (ii) mahendrāya tvai- (iii) ṣa te yonir- (iv) mahendrāya tvā (v). //10//

Taṁ vo dasmamṛtīṣahaṁ vasormandānamandhasaḥ. Abhi vatsaṁ na svasareṣu dhenava indraṁ gīrbhirnavāmahe (i). //11//

Yadvāhiṣṭhaṁ tadagnaye bṛhadarca vibhāvaso. Mahiṣīva tvadrayistvadvājā udīrate (i). //12//

Ehyū ṣu bravāṇi te'gna itthetarā giraḥ. Ebhirvardhāsa indubhiḥ (i). //13//

Ṛtavaste yajñaṁ vi tanvantu māsā rakṣantu te haviḥ.
Saṁvatsaraste yajñaṁ dadhātu naḥ prajāṁ ca pari pātu naḥ (i). //14//

Upahvare girīṇāṁ saṅgame ca nadīnām. Dhiyā vipro ajāyata (i). //15//

9. Adorable Lord, the penetrating seer, is just another form of the pure and flowing. He is the benefactor of all five types of men and is the preceder of sacrifices. Hymned by the great, we solicit His blessings. (1) You have been duly accepted. (2) You to the adorable Lord, the lustrous. (3) This is your abode. (4) You to the adorable Lord, the lustrous. (5)

10. May the great resplendent Lord, wielding thunderbolt in His hand, complete with all His sixteen aspects, grant shelter to us. May He kill the sinful, who cherishes malice against us. (1) You have been duly accepted. (2) You to the great resplendent Lord. (3) This is your abode. (4) You to the great resplendent Lord. (5)

11. We offer love and praise with our hymns, as cows low to their calves in the stalls; we invoke that glorious resplendent Lord, the subduer of evil spirits, who delights in accepting the beverage of loving devotion. (1)

12. The praise, which best conveys our veneration, is due to the adorable Lord alone. Affluent in splendour, O Lord, may you grant us prosperity, since from your grace proceed vast riches and ample food and strength. (1)

13. O adorable Lord, may you be with us. We shall augument you with drops of divine love. (1)

14. May the seasons make your sacrifice flourish; may the months secure your sacrifical offerings; may the year guard your sacrifice for us and protect our progeny from all the quarters. (1)

15. The all-wise Lord manifests Himself to them, who pray in the valleys of mountains and at the confluence of streams. (1)

उच्चा ते जातमन्धसो दिवि सद्भूम्या ददे । उग्रꣳ शर्म महि श्रवः ॥ १६ ॥
स न इन्द्राय यज्यवे वरुणाय मरुद्भ्यः । वरिवोवित्परि स्रव ॥ १७ ॥
एना विश्वान्यर्य आ द्युम्नानि मानुषाणाम् । सिषासन्तो वनामहे ॥ १८ ॥
अनु वीरैरनु पुष्यास्म गोभिरन्वश्वैरनु सर्वेण पुष्टैः ।
अनु द्विपदाऽनु चतुष्पदा वयं देवा नो यज्ञमृतुथा नयन्तु ॥ १९ ॥
अग्ने पत्नीरिहा वह देवानामुशतीरुप । त्वष्टारꣳ सोमपीतये ॥ २० ॥
अभि यज्ञं गृणीहि नो ग्नावो नेष्टः पिब ऋतुना । त्वꣳ हि रत्नधा असि ॥ २१ ॥
द्रविणोदाः पिपीषति जुहोत प्र च तिष्ठत । नेष्ट्रादृतुभिरिष्यत ॥ २२ ॥
तवायꣳ सोमस्त्वमेह्यर्वाङ् शश्वत्तमꣳ सुमना अस्य पाहि ।
अस्मिन् यज्ञे बर्हिष्या निषद्या दधिष्वेमं जठर इन्दुमिन्द्र ॥ २३ ॥

Uccā te jātamandhaso divi sadbhumyā dade. Ugraṁ śarma mahi śravaḥ (i). //16//

Sa na indrāya yajyave varuṇāya marudbhyaḥ. Varivovit pari srava (i). //17//

Enā viśvānyarya ā dyumnāni mānuṣāṇām. Siṣāsanto vanāmahe (i). //18//

Anu vīrairanu puṣyāsma gobhiranvaśvairanu sarveṇa puṣṭaiḥ.
Anu dvipadā'nu catuṣpadā vayaṁ devā no yajñamṛtuthā nayantu (i). //19//

Agne patnīrihā vaha devānāmuśatīrupa. Tvaṣṭāraṁ somapītaye (i). //20//

Abhi yajñaṁ gṛṇīhi no gnāvo neṣṭaḥ piba ṛtunā. Tvaṁ hi ratnadhā asi (i). //21//

Draviṇodāḥ pipīṣati juhota pra ca tiṣṭhata. Neṣṭrādṛtubhiriṣyata (i). //22//

Tavāyaṁ somastvamehyarvāṅ śaśvattamaṁ sumanā asya pāhi.
Asmin yajñe barhiṣyā niṣadyā dadhiṣvemaṁ jaṭhara indumindra (i). //23//

16. High is the birth of this sap of life; though set in heaven, it has come down to the earth with strong sheltering power, renown and sustenance. (1)

17. O divine elixir, possessor of wealth as you are, may you flow from all sides for our resplendence, for our venerability and for our humanitarian character. (1)

18. With the aid of this (divine elixir) alone, may we procure all the wealth that belongs to men and enjoy it not alone, but distributing it judiciously among ourselves. (1)

19. May we prosper with brave sons, cows, horses and all other things that make for prosperity. With bipeds as well as with quadrupeds, may we prosper. May the bounties of Nature guide our sacrifice in due seasons. (1)

20. O adorable God, may you depute all the vital virtues of cosmos and Nature's bounties to embellish our devotional prayers. (1)

21. O selfless benefactor, the supreme Architect, bless our sacred work and worship. Accept our offerings suitable for all occasions and seasons. May they be entirely dedicated to you. May they be possessed by you, as all treasures of wealth and wisdom belong to you alone. (1)

22. May those, who seek and give true wealth and wisdom, be firmly established in the world and command respect in their society. May they dedicate their work to God. (1)

23. O resplendent Self, this loving devotion is for you; hasten to approach it, and well-disposed, taste it unceasingly. May you be enshrined in our prayerful heart and accept our humble love in full. (1)

अमेवं नः सुहवा आ हि गन्तन नि बर्हिषि सदतना रणिष्टन ।
अथा मदस्व जुजुषाणो अन्धसस्त्वष्टर्देवेभिर्जनिभिः सुमद्गणः ॥ २४ ॥
स्वादिष्ठया मदिष्ठया पवस्व सोम धारया । इन्द्राय पातवे सुतः ॥ २५ ॥
रक्षोहा विश्वचर्षणिरभि योनिमयोहते । द्रोणे सधस्थमासदत् ॥ २६ ॥

Ameva naḥ suhavā ā hi gantana ni barhiṣi sadatanā raṇiṣṭana.
Athā madasva jujuṣāṇo andhasastvaṣṭardevebhirjanibhiḥ sumadgaṇaḥ (i). //24//

Svādiṣṭhayā madiṣṭhayā pavasva soma dhārayā. Indrāya pātave sutaḥ (i). //25//

Rakṣohā viśvacarṣaṇirabhi yonimayohate. Droṇe sadhasthamāsadat (i). //26//

24. Quick to respond to our invitations, please come to us as if to your own homes. Be seated on grass-mats, and enjoy. O architect, may you rejoice in taking food in the pleasant company of the enlightened men and women. (1)

25. O elixir of divine love, may you flow in the sweetest and most exhilarating stream, expressed for the acceptance of the resplendent Self. (1)

26. It is all-beholding, and a destroyer of the wicked; when collected, it occupies the assigned position in the wooden cask, made strong by fixing iron nails. (1)

अथ सप्तविंशोऽध्यायः ।

समास्त्वाग्न ऋतवो वर्धयन्तु संवत्सरा ऋषयो यानि सत्या ।
सं दिव्येन दीदिहि रोचनेन विश्वा आ भाहि प्रदिशश्चतस्रः ॥ १ ॥

सं चेध्यस्वाग्ने प्र च बोधयैनमुच्च तिष्ठ महते सौभगाय ।
मा च रिषदुपसत्ता ते अग्ने ब्रह्माणस्ते यशसः सन्तु मान्ये ॥ २ ॥

त्वामग्ने वृणते ब्राह्मणा इमे शिवो अग्ने संवरणे भवा नः ।
सपत्नहा नो अभिमातिजिच्च स्वे गये जागृह्यप्रयुच्छन् ॥ ३ ॥

इहैवाग्ने अधि धारया रयिं मा त्वा नि क्रन्पूर्वचितो निकारिणः ।
क्षत्रमग्ने सुयममस्तु तुभ्यमुपसत्ता वर्धतां ते अनिष्टृतः ॥ ४ ॥

क्षत्रेणाग्ने स्वायुः सं रभस्व मित्रेणाग्ने मित्रधेये यतस्व ।
सजातानां मध्यमस्था एधि राज्ञामग्ने विहव्यो दीदिहीह ॥ ५ ॥

ATHA SAPTAVIṀŚO' DHYĀYAḤ

Samāstvāgna ṛtavo vardhayantu saṁvatsarā ṛṣayo yāni satyā. Saṁ divyena dīdihi rocanena viśvā ā bhāhi pradiśaścatasraḥ (i). //1//

Saṁ cedhyasvāgne pra ca bodhayainamucca tiṣṭha mahate saubhagāya. Mā ca riṣadupasattā te agne brahmāṇaste yaśasaḥ santu mānye (i). //2//

Tvāmagne vṛṇate brāhmaṇā ime śivo agne saṁvaraṇe bhavā naḥ. Sapatnahā no abhimātijicca sve gaye jāgṛhyaprayucchan (i). //3//

Ihaivāgne adhi dhārayā rayiṁ mā tvā ni kranpūrvacito nikāriṇaḥ. Kṣatramagne suyamamastu tubhyamupasattā vardhatāṁ te aniṣṭṛtaḥ (i). //4//

Kṣatreṇāgne svāyuḥ saṁ rabhasva mitreṇāgne mitradheye yatasva. Sajātānāṁ madhyamasthā edhi rājñamagne vihavyo dīdihīha (i). //5//

CHAPTER TWENTY-SEVEN

1. O fire divine, may the months, the seasons, and the years as well as the truthful sages augment you. May you shine gloriously with your celestial brilliance and illuminate all the four quarters. (1)

2. May you, O fire divine, kindle up; enlighten this sacrificer and get up for the great fortune. O adorable Lord, may those, who stand by you, never come to any harm; may those, who know you, be glorious and none else. (1)

3. O adorable leader, these intellectuals, present here, choose you. May you be auspicious to us in this unanimous choice of ours. Slayer of our rivals and conqueror of our foes, may you be always awake and alert in your place with ceaseless care. (1)

4. O adorable leader, may you collect all the riches here; may not the wicked, who have gathered strength already, be able to injure you. O adorable leader, may the administration be easy to control for you. May your supporter grow strong ever-unharmed. (1)

5. O adorable leader, lead your life defending the weak; Behave with friends in a friendly manner, O adorable leader. Established in the midst of kinsmen and with abundant supplies, may you, adorable leader, shine out among kings brightly. (1)

अति निहो अति स्रिधोऽत्यचित्तिमत्यरातिमग्ने ।
विश्वा ह्यग्ने दुरिता सहस्वाथास्मभ्यꣳ सहवीराꣳ रयिं दाः ॥ ६ ॥

अनाधृष्यो जातवेदा अनिष्टृतो विराडग्ने क्षत्रभृद्दीदिहीह ।
विश्वा आशाः प्रमुञ्चन्मानुषीर्भियः शिवेभिरद्य परि पाहि नो वृधे ॥ ७ ॥

बृहस्पते सवितर्बोधयैनꣳ संशितं चित्सन्तराꣳ सꣳ शिशाधि ।
वर्धयैनं महते सौभगाय विश्व एनमनु मदन्तु देवाः ॥ ८ ॥
अमुत्रभूयादध यद्यमस्य बृहस्पते अभिशस्तेरमुञ्चः ।
प्रत्यौहतामश्विना मृत्युमस्माद्देवानामग्ने भिषजा शचीभिः ॥ ९ ॥
उद्वयं तमसस्परि स्वः पश्यन्त उत्तरम् । देवं देवत्रा सूर्यमगन्म ज्योतिरुत्तमम् ॥ १० ॥
ऊर्ध्वा अस्य समिधो भवन्त्यूर्ध्वा शुक्रा शोचीꣳष्यग्नेः । द्युमत्तमा सुप्रतीकस्य सूनोः ॥ ११ ॥
तनूनपादसुरो विश्ववेदा देवो देवेषु देवः । पथो अनक्तु मध्वा घृतेन ॥ १२ ॥

Ati niho ati sridho' tyacittimatyarātimagne.
Viśvā hyagne duritā sahasvāthāsmabhyaṁ sahavīrāṁ rayiṁ dāḥ (i). //6//

Anādhṛṣyo jātavedā aniṣṭṛto virāḍagne kṣatrabhṛddīdihīha. Viśvā āśāḥ pramuñcan mānuṣīrbhiyaḥ śivebhiradya pari pāhi no vṛdhe (i). //7//

Bṛhaspate savitarbodhayainaṁ saṁśitaṁ citsantarāṁ saṁ siśādhi. Vardhayainaṁ mahate saubhagāya viśva enamanu madantu devāḥ (i). //8//

Amutrabhūyādadha yadyamasya bṛhaspate abhiśastera-muñcaḥ. Pratyauhatāmaśvinā mṛtyumasmāddevānāmagne bhiṣajā śacībhiḥ (i). //9//

Udvayaṁ tamasaspari svaḥ paśyanta uttaram. Devaṁ devatrā sūryamaganma jyotiruttamam (i). //10//

Ūrdhvā asya samidho bhavantyūrdhvā śukrā śocīṁṣyagneḥ. Dyumattamā supratīkasya sūnoḥ (i). //11//

Tanūnapādasuro viśvavedā devo deveṣu devaḥ. Patho anaktu madhvā ghṛtena (i). //12//

6. O adorable Lord, may you keep us away from merciless killers, from bad characters, from thoughtlessness and from miserliness. O adorable Lord, drive away all sorrows and sufferings; bestow on us wealth, and bless us with brave sons. (1)

7. O adorable Lord, may you shine here always unconquerable, omniscient, uninjurable; refulgent, and holder of protective power. Making all the regions free from human terrors, may you today protect us from all sides with propitious means, so that we may prosper. (1)

8. O impeller Lord Supreme, may you enlighten this sacrificer and guide him though already initiated. May you exalt him to great good fortune, and may all the learned ones rejoice in his delight. (1)

9. O adorable Lord Supreme, you have freed us from the curse of death, and from birth in the yonder world. May the two healers, curers of the learned ones, drive the death away from this sacrificer with their skill. (1)

10. Beholding the uprising divine light beyond the mundane darkness, we by and by approach the spiritual one, the divine of divine. (1)

11. Uplifting are the kindling woods of this fire divine and uplifting and most enlightening are the brilliant glows of this fair-faced, worthy son. (1) (Samidh = kindling wood).

12. May the adorable Lord, preserver of bodies and bestower of life, omniscient, the supreme Lord, the god among gods, provide our paths of life with honey and butter. (1) (Tanūnapāt = preserver of bodies).

मध्वा यज्ञं नक्षसे प्रीणानो नराशꣳसो अग्ने । सुकृद्देवः सविता विश्ववारः ॥ १३ ॥
अच्छायमेति शवसा घृतेनेडानो वह्निर्नमसा । अग्निꣳ स्रुचो अध्वरेषु प्रयत्सु ॥ १४ ॥
स यक्षदस्य महिमानमग्नेः स ई मन्द्रा सुप्रयसः । वसुश्चेतिष्ठो वसुधातमश्च ॥ १५ ॥
द्वारो देवीरन्वस्य विश्वे व्रता ददन्ते अग्नेः । उरुव्यचसो धाम्ना पत्यमानाः ॥ १६ ॥
ते अस्य योषणे दिव्ये न योना उषासानक्ता । इमं यज्ञमवतामध्वरं नः ॥ १७ ॥
दैव्या होतारा ऊर्ध्वमध्वरं नोऽग्नेर्जिह्वामभि गृणीतम् । कृणुतं नः स्विष्टिम् ॥ १८ ॥
तिस्रो देवीर्बर्हिरेदꣳ सदन्त्विडा सरस्वती भारती । मही गृणाना ॥ १९ ॥
तन्नस्तुरीपमद्भुतं पुरुक्षु त्वष्टा सुवीर्यम् । रायस्पोषं वि ष्यतु नाभिमस्मे ॥ २० ॥

Madhvā yajñaṁ nakṣase prīṇāno narāśaṁso agne. Sukṛddevaḥ savitā viśvavāraḥ (i). //13//

Acchāyameti śavasā ghṛteneḍāno vahnirnamasā. Agniṁ sruco adhvareṣu prayatsu (i). //14//

Sa yakṣadasya mahimānamagneḥ sa īṁ mandrā suprayasaḥ. Vasuścetiṣṭho vasudhātamaśca (i). //15//

Dvāro devīranvasya viśve vratā dadante agneḥ. Uruvyacaso dhāmnā patyamānāḥ (i). //16//

Te asya yoṣaṇe divye na yonā uṣāsānaktā. Imaṁ yajñamavatāmadhvaraṁ naḥ. (i). //17//

Daivyā hotārā ūrdhvamadhvaraṁ no'gnerjihvāmabhi gṛṇītam. Kṛṇutaṁ naḥ sviṣṭim (i). //18//

Tisro devīrbarhiredaṁ sadantviḍā sarasvatī bhāratī. Mahī gṛṇānā (i). //19//

Tannasturīpamadbhutaṁ purukṣu tvaṣṭā suvīryam. Rāyaspoṣaṁ vi ṣyatu nābhimasme (i). //20//

13. O adorable Lord, praised by men and pleased, come to the sacrifice with sweetness. You are, O Lord, performer of righteous deeds, impeller and bestower of grace on all. (1) (Narāśaṁsaḥ = praised by men).

14. As the ladles move in proceeding sacrifices, this fire, being implored with purified butter and food, moves with its force towards the adorable Lord. (1) (Īḍānaḥ= being implored).

15. Let the sacrificer pay homage to the greatness of this adorable Lord, as He is the provider of pleasing foods; He is the real wealth; He is the awakener; and He is the greatest bestower of wealth. (1)

16. Vastly wide and rich in accommodation, the divine doors follow all the functions of this fire. (1) (Devīḥ dvāraḥ = divine doors).

17. May those two heavenly damsels, dawn and night, preserve this sacred sacrifice of ours in the house of this man (the sacrificer). (1) (Uṣāsā-naktā = dawn and night).

18. O two divine priests (the healers), may you raise this sacrifice of ours to lofty heights, and may you praise it, that is the tongue of fire, as if; make our sacrifice successful. (1) (Daivya - hotārā = divine priests).

19. May the three great divinities, the divine intellect, the divine speech, and the divine culture, praised by all, be seated at this sacrifice. (1) (Tisro-devīḥ = three great divinities : Iḍā, Sarasvatī, Bhārati).

20. May the divine Architect pour on our navel the quick-coming and wonderful abundance of riches contributed by the multitude and enhancing power. (1) (Tvaṣṭṛ = divine architect).

वनस्पतेऽव सृजा रराणस्त्मना देवेषु। अग्निर्हव्यꣳ शमिता सूदयाति॥२१॥
अग्ने स्वाहा कृणुहि जातवेद इन्द्राय हव्यम्। विश्वे देवा हविरिदं जुषन्ताम्॥२२॥

पीवो अन्ना रयिवृधः सुमेधाः श्वेतः सिषक्ति नियुतामभिश्रीः।
ते वायवे समनसो वि तस्थुर्विश्वेन्नरः स्वपत्यानि चक्रुः॥२३॥

राये नु यं जज्ञतू रोदसीमे राये देवी धिषणा धाति देवम्।
अध वायुं नियुतः सश्चत स्वा उत श्वेतं वसुधितिं निरेके॥२४॥

आपो ह यद्बृहतीर्विश्वमायन् गर्भं दधाना जनयन्तीरग्निम्।
ततो देवानाꣳ समवर्त्ततासुरेकः कस्मै देवाय हविषा विधेम॥२५॥

यश्चिदापो महिना पर्यपश्यद्दक्षं दधाना जनयन्तीर्यज्ञम्।
यो देवेष्वधि देव एक आसीत् कस्मै देवाय हविषा विधेम॥२६॥

प्र याभिर्यासि दाश्वाꣳसमच्छा नियुद्भिर्वायविष्टये दुरोणे।
नि नो रयिꣳ सुभोजसं युवस्व नि वीरं गव्यमश्व्यं च राधः॥२७॥

Vanaspate' va srjā rarāṇastmnā deveṣu. Agnirhavyaṁ śamitā sūdayāti (i). //21//

Agne svāhā kṛṇuhi jātaveda indrāya havyam. Viśve devā haviridaṁ juṣantām (i). //22//

Pīvo annā rayivṛdhaḥ sumedhāḥ śvetaḥ siṣakti niyutāmabhiśrīḥ. Te vāyave samanaso vi tasthurviśvennaraḥ svapatyāni cakruḥ (i). //23//

Rāye nu yaṁ jajñatū rodasīme rāye devī dhiṣaṇā dhāti devam.
Adha vāyuṁ niyutaḥ saścata svā uta śvetaṁ vasudhitiṁ nireke (i). //24//

Āpo ha yadbṛhatīrviśvamāyan garbhaṁ dadhānā janayantīragnim.

Tato devānāṁ samavartatāsurekaḥ kasmai devāya haviṣā vidhema (i). //25//

Yaścidāpo mahinā paryapaśyaddakṣaṁ dadhānā janayantīryajñam. Yo deveṣvadhi deva eka āsīt kasmai devāya haviṣā vidhema (i). //26//

Pra yābhiryāsi dāśvāṁsamacchā niyudbhirvāyaviṣṭaye duroṇe.
Ni no rayiṁ subhojasaṁ yuvasva ni vīraṁ gavyamaśvyaṁ ca rādhaḥ (i). //27//

21. O Lord of forests, rejoicing by yourself among the bounties of Nature, grant us those sacrificial supplies, which the soothing fire seasons. (1) (Vanaspati = Lord of forests).

22. O adorable Lord, O omniscient, may you bestow on the aspirant plenty of supplies with the auspicious utterance. May all the enlightened ones enjoy these offerings. (1) (Svāhākṛti = auspicious utterance).

23. The intelligent, bright Lord of motivation is glorious with the yoked cosmic steeds. He favours those men, who are well-fed and abound in riches. They are of one mind, ever-ready to worship Him, and are the leaders of such pious ceremonies as are productive of excellent progeny. (1)

24. Wherever there is poverty, the yoked steeds carry the Lord of motivation, white in complexion (i.e. flawlessly honest) and the dispenser of wealth, whom heaven and earth bear for the sake of riches, and whom the divine language of praise sustains as a deity for the sake of affluence and wealth. (1)

25. When the mighty waters come all over, containing the primeval germ, desirous of giving birth to the fire, prior to that exists one vital force amongst the bounties of Nature; Him we worship with our oblations. (1)

26. Who in His greatness oversees the waters containing the creative vital force and initiating sacrifice, and who is the only God over all the bounties of Nature; Him we worship with our oblations. (1)

27. O wind divine, come to us with those speedy waves, the yoked steeds, with which you reach the devotee, offering homage in his own home, and bestow upon us wealth and children along with kine and horses. (1)

आ नो नियुद्भिः शतिनीभिरध्वरꣳ सहस्रिणीभिरुप याहि यज्ञम्।
वायो अस्मिन्त्सवने मादयस्व यूयं पात स्वस्तिभिः सदा नः ॥ २८ ॥

नियुत्वान्वायवा गह्ययꣳ शुक्रो अयामि ते। गन्तासि सुन्वतो गृहम् ॥ २९ ॥

वायो शुक्रो अयामि ते मध्वो अग्रं दिविष्टिषु।
आ याहि सोमपीतये स्पार्हो देव नियुत्वता ॥ ३० ॥

वायुरग्रेगा यज्ञप्रीः साकं गन्मनसा यज्ञम्। शिवो नियुद्भिः शिवाभिः ॥ ३१ ॥

वायो ये ते सहस्रिणो रथासस्तेभिरा गहि। नियुत्वान्त्सोमपीतये ॥ ३२ ॥

एकया च दशभिश्च स्वभूते द्वाभ्यामिष्टये विꣳशती च।
तिसृभिश्च वहसे त्रिꣳशता नियुद्भिर्वायविह ता वि मुञ्च ॥ ३३ ॥

तव वायवृतस्पते त्वष्टुर्जामातरद्भुत। अवाꣳस्या वृणीमहे ॥ ३४ ॥

Ā no niyudbhiḥ śatinībhiradhvaraṁ saharsiṇībhirupa yāhi yajñam.
Vāyo asmintsavane mādayasva yūyaṁ pāta svastibhiḥ sadā naḥ (i). //28//

Niyutvānvāyavā gahyayaṁ śukro ayāmi te. Gantāsi sunvato gṛham (i). //29//

Vāyo śukro ayāmi te madhvo agraṁ diviṣṭiṣu.
Ā yāhi somapītaye spārho deva niyutvatā (i). //30//

Vāyuragregā yajñaprīḥ sākaṁ ganmanasā yajñam. Śivo niyudbhiḥ sivābhih (i). //31//

Vāyo ye te sahasriṇo rathāsastebhirā gahi. Niyutvāntsomapītaye (i). //32//

Ekayā ca daśabhiśca svabhūte dvābhyāmiṣṭaye viṁśatī ca.
Tisṛbhiśca vahase triṁśatā niyudbhirvāyaviha tā vi muñca (i). ///33//

Tava vāyavṛtaspate tvaṣṭurjāmātaradbhuta. Avāṁsyā vṛṇīmahe (i). //34//

28. May you come, O wind divine, to our solemn worship with the yoked forces, which are in hundreds and thousands. May you be exhilarated at our ceremony, and may you all ever cherish us with blessings. (1)

29. May you, O sense of touch, with all your awareness, come. This graceful sensitivity of sweet taste is offered to you. You are fond of visiting houses, where you get it. (1)

30. O vital breath, purified by holy acts, I bring to you the loving devotion, offered first to you at all worships. O ever-loved divine, come with your subsidiaries, the same perceptions, to enjoy the exhilarating experience. (1)

31. May the wind divine, moving in the forefront, pleased with sacrifices, the auspicious one, come to our sacrifice with a happy frame of mind conveyed by propitious actions. (1)

32. You are most welcome, O sense of touch, to come with your entire awareness in thousandfold chariots, which you possess, to participate in enjoying the glory of creation. (1)

33. O self-existent Lord, may you come to our sacrifice with one and ten, with two and twenty, and with three and thirty mares that carry you. O vital one, unyoke them here. (1)

34. O divine wind, Lord of cosmic sacrifice, and wonderful son-in-law of the sun, we solicit your protection. (1) (Tvaṣṭṛ the sun, whose daughter Uṣā is wedded to the wind, Vāyu).

अभि त्वा शूर नोनुमोऽदुग्धा इव धेनवः । ईशानमस्य जगतः स्वर्दृशमीशानमिन्द्र तस्थुषः ॥३५॥

न त्वावाँ२ अन्यो दिव्यो न पार्थिवो न जातो न जनिष्यते ।
अश्वायन्तो मघवन्निन्द्र वाजिनो गव्यन्तस्त्वा हवामहे ॥ ३६ ॥

त्वामिद्धि हवामहे सातौ वाजस्य कारवः । त्वां वृत्रेष्विन्द्र सत्पतिं नरस्त्वां काष्ठास्वर्वतः ॥३७॥

स त्वं नश्चित्र वज्रहस्त धृष्णुया मह स्तवानो अद्रिवः ।
गामश्वꣳ रथ्यमिन्द्र सं किर सत्रा वाजं न जिग्युषे ॥ ३८ ॥

कया नश्चित्र आ भुवदूती सदावृधः सखा । कया शचिष्ठया वृता ॥ ३९ ॥

कस्त्वा सत्यो मदानां मꣳहिष्ठो मत्सदन्धसः । दृढा चिदारुजे वसु ॥ ४० ॥

अभी षु णः सखीनामविता जरितॄणाम् । शतं भवास्यूतये ॥ ४१ ॥

Abhi tvā śura nonumo'dugdhā iva dhenavaḥ. Īśānamasya jagataḥ svardṛśamīśānamindra tasthuṣaḥ. (i). //35//

Na tvāvāñ anyo divyo na pārthivo na jāto na janiṣyate. Aśvāyanto maghavannindra vājino gavyantastvā havāmahe (i). //36//

Tvāmiddhi havāmahe sātau vājasya kāravaḥ. Tvāṁ vṛtreṣvindra satpatiṁ narastvāṁ kāṣṭhāsvarvataḥ (i). //37//

Sa tvaṁ naścitra vajrahasta dhṛṣṇuyā maha stavāno adrivaḥ. Gāmaśvaṁ rathyamindra saṁ kira satrā vājaṁ na jigyuṣe (i). //38//

Kayā naścitra ā bhuvadūti sadāvṛdhaḥ sakhā. Kayā śaciṣṭhayā vṛtā (i). //39//

Kastvā satyo madānāṁ maṁhiṣṭho matsadandhasaḥ. Dṛḍhā cidāruje vasu (i). //40//

Abhī ṣu ṇaḥ sakhīnāmavitā jaritṝṇām. Śatam bhavāsyūtaye (i). //41//

35. O brave resplendent Lord, Lord of all movable and stationary things, beholder of universe, we call loudly to you like unmilked cows (with udders full). (1)

36. No other such as you are, on the earth and heaven, has been in the past or shall be in future. O bounteous resplendent Lord, we invoke you for possessing vigour, wealth and wisdom. (1)

37. O resplendent Lord, we, the poet sages, invoke you to obtain strengthening food. You are the protector of good men. We invoke you from all directions to overcome impediments, in the conflicts of life. (1)

38. O mighty resplendent Lord, wielder of punitive justice, the lord of clouds of evil forces, being glorified by us, bestow on us wisdom and vital force, fit to drive your chariot as you grant to everyone, aspiring to be victorious. (1)

39. By what means may He, who is ever-augmenting, wonderful and friendly, come to us, and by what most effective contribution? (1)

40. What genuine and most earnest devotional offerings—like nourishing food, would inspirit you to win over evil thoughts and procure formidable treasures? (1)

41. May you, protector of us, your friends and admirers, come to us with a hundred protections. (1)

यज्ञा-यज्ञा वो अग्नये गिरा-गिरा च दक्षसे ।
प्र-प्र वयममृतं जातवेदसं प्रियं मित्रं न शंसिषम् ॥ ४२ ॥

पाहि नो अग्न एकया पाह्युत द्वितीयया ।
पाहि गीर्भिस्तिसृभिरूर्जां पते पाहि चतसृभिर्वसो ॥ ४३ ॥

ऊर्जो नपातं स हिनायमस्मयुर्दाशेम हव्यदातये ।
भुवद्वाजेष्वविता भुवद्वृध उत त्राता तनूनाम् ॥ ४४ ॥

संवत्सरोऽसि परिवत्सरोऽसीदावत्सरोऽसीद्वत्सरोऽसि वत्सरोऽसि । उषसस्ते कल्पन्तामहोरात्रास्ते कल्पन्तामर्धमासास्ते कल्पन्तां मासास्ते कल्पन्तामृतवस्ते कल्पन्तां संवत्सरस्ते कल्पताम् । प्रेत्या एत्यै सं चाञ्च प्र च सारय । सुपर्णचिदसि तया देवतयाऽङ्गिरस्वद् ध्रुवः सीद ॥ ४५ ॥

Yajñā-yajñā vo agnaye girā-girā ca dakṣase.
Pra-pra vayamamṛtaṁ jātavedasaṁ priyaṁ mitraṁ na śaṁsiṣam (i). //42//

Pāhi no agna ekayā pāhyuta dvitīyayā.
Pāhi gīrbhistisṛbhirūrjāṁ pate pāhi catasṛbhirvaso (i). //43//

Ūrjo napātaṁ sa hināyamasmayurdāśema havyadātaye.
Bhuvadvājeṣvavitā bhuvadvṛdha uta trātā tanūnām (i). //44//

Saṁvatsaro'si parivatsaro'sīdāvatsaro' sīdvatsaro'si vatsaro'si.
Uṣasaste kalpantāmahorātrāste kalpantāmardhamāsāste kalpantāṁ māsāste kalpantāmṛtavaste kalpantāṁ saṁvatsaraste kalpatām.
Pretyā etyai saṁ cāñca pra ca sāraya. Suparṇacidasi tayā devatayā' ṅgirasvad dhruvaḥ sīda (i). //45//

42. At every benevolent work, glorify the adorable Lord with reiterated eulogies to obtain strength. May we glorify Him, the immortal, the cognizant of all that exists, as our dear friend. (1)

43. O adorable Lord, protect us through the first, and protect through the second hymn. Protect us through three hymns, and through four, O Lord of energy, O Lord of riches. (1)

44. He is the source of strength and propitious to us. Let us offer our oblations, for He is the conveyor of them. May He be our defender in our life-struggles. May He be our benefactor and the saviour of our lives. (1)

45. In a five year cycle, the first year is Saṁvatsara; the second year Parivatsra; the third year Idāvatsara; the fourth year Idvatsara; and the fifth year Vatsara. You are all the five of them. May the dawns be secured for you; may the days and nights be secured for you; may the half-months (fortnights) be secured for you; may the months be secured for you; may the seasons be secured for you; may the year be secured for you. May you wane and wax for their departure and arrival. You are the collector of fine leaves. With that divinity may you be established here blazing bright. (1)

अथाष्टाविंशोऽध्यायः ।

होता यक्षत्समिधेन्द्रमिडस्पदे नाभा पृथिव्या अधि ।
दिवो वर्ष्मन्त्समिध्यत ओजिष्ठश्चर्षणीसहां वेत्वाज्यस्य होतर्यज ॥ १ ॥

होता यक्षत्तनूनपातमूतिभिर्जेतारमपराजितम् ।
इन्द्रं देवꣳ स्वर्विदं पथिभिर्मधुमत्तमैर्नराशꣳसेन तेजसा वेत्वाज्यस्य होतर्यज ॥ २ ॥

होता यक्षदिडाभिरिन्द्रमीडितमाजुह्वानममर्त्यम् ।
देवो देवैः सवीर्यो वज्रहस्तः पुरन्दरो वेत्वाज्यस्य होतर्यज ॥ ३ ॥

होता यक्षद्बर्हिषीन्द्रं निषद्वरं वृषभं नर्यापसम् ।
वसुभी रुद्रैरादित्यैः सयुग्भिर्बर्हिरासदद्वेत्वाज्यस्य होतर्यज ॥ ४ ॥

ATHĀṢṬĀVIMŚO' DHYĀYAḤ

Hotā yakṣatsamidhendramiḍaspade nābhā pṛthivyā adhi.
Divo varṣmantsamidhyata ojiṣṭhaścarṣaṇīsahāṁ vetvājyasya hotaryaja (i). //1//

Hotā yakṣattanūnpātamūtibhirjetāramaparājitam.
Indraṁ devaṁ svarvidaṁ pathibhirmadhumattamair-narāśaṁsena tejasā vetvājyasya hotaryaja (i). //2//

Hotā yakṣadiḍābhirindramīḍitamājuhvānamamartyam.
Devo davaiḥ savīryo vajrahastaḥ purandaro vetvājyasya hotaryaja (i) //3//

Hotā yakṣadbarhiṣīndraṁ niṣadvaraṁ vṛṣabhaṁ naryāpasam.
Vasubhī rudrairādityaiḥ sayugbhirbarhirāsadadvetvājyasya hotaryaja (i). //4//

CHAPTER TWENTY-EIGHT

1. The sacrificer worships the respledent Lord with the kindling wood (*samit*) at the place of sacrifice in the earth's navel. The cosmic fire is enkindled by the mightiest Lord of conquerors of men in the highest place of the heaven. May He enjoy (the sacrifice). O sacrificer, offer oblations of purified butter. (1)

2. The sacrificer worships the respledent Lord, the protector of the body (*tanūnapāt*) with His protective aids, conqueror of all, and always unconquered, the divine and the Lord, who conducts (us) to the world of light by the sweetest paths with His radiance praised by men. May He enjoy. O sacrificer, offer oblations of purified butter. (1)

3. The sacrificer worships with praises (*iḍā*) the resplendent Lord, praised and invoked (by worshippers), the immortal one. May the divine Lord, full of vigour, wielder of thunderbolt, subduer of (enemy's) cities, enjoy it. O sacrificer, offer oblations of purified butter. (1)

4. In the sacrifice, the sacrificer worships the respledent Lord, the best among all occupying seats, the showerer (of bliss) and performer of actions beneficial for men. May He come and be seated on the sacred grass (*barhiṣ*) with the young, the adult and the mature sages as His companions. May he enjoy it. O sacrificer, offer oblations of purified butter. (1)

होता यक्षदोजो न वीर्यꣳ सहो द्वार इन्द्रमवर्धयन् ।
सुप्रायणा अस्मिन्यज्ञे वि श्रयन्तामृतावृधो द्वार इन्द्राय मीढुषे व्यन्त्वाज्यस्य होतर्यज ॥ ५ ॥

होता यक्षदुषे इन्द्रस्य धेनू सुदुघे मातरा मही ।
सवातरौ न तेजसा वत्समिन्द्रमवर्धतां वीतामाज्यस्य होतर्यज ॥ ६ ॥

होता यक्षद्दैव्या होतारा भिषजा सखाया हविषेन्द्रं भिषज्यतः ।
कवी देवौ प्रचेतसाविन्द्राय धत्त इन्द्रियं वीतामाज्यस्य होतर्यज ॥ ७ ॥

होता यक्षत्तिस्रो देवीर्न भेषजं त्रयस्त्रिधातवोऽपस इडा सरस्वती भारती महीः ।
इन्द्रपत्नीर्हविष्मतीर्व्यन्त्वाज्यस्य होतर्यज ॥ ८ ॥

होता यक्षत्त्वष्टारमिन्द्रं देवं भिषजꣳ सुयजं घृतश्रियम् ।
पुरुरूपꣳ सुरेतसं मघोनमिन्द्राय त्वष्टा दधदिन्द्रियाणि वेत्वाज्यस्य होतर्यज ॥ ९ ॥

Hotā yakṣadojo na vīryaṁ saho dvāra indramavardhayan.
Suprāyaṇā asminyajñe vi śrayantāmṛtāvṛdho dvāra indrāya mīḍhuṣe vyantvājyasya hotaryaja (i). //5//

Hotā yakṣaduṣe indrasya dhenū sudughe mātarā mahī.
Savātarau na tejasā vatsamindramavardhatāṁ vītāmājyasya hotaryaja (i). //6//

Hotā yakṣaddaivyā hotārā bhiṣajā sakhāyā haviṣendram bhiṣajyataḥ.
Kavī devau pracetasāvindrāya dhatta indriyaṁ vītamājyasya hotaryaja (i). //7//

Hotā yakṣattisro devīrna bheṣajaṁ trayastridhātavo' pasa iḍā sarasvatī bhāratī mahīḥ.
Indrapatnīrhaviṣmatīrvyantvājyasya hotaryaja (i). //8//

Hotā yakṣattvaṣṭāramindraṁ devaṁ bhiṣajaṁ suyajaṁ ghṛtaśriyam.
Pururūpaṁ suretasaṁ maghonamindrāya tvaṣṭā dadhadindriyāṇi vetvājyasya hotaryaja (i). //9//

5. The sacrificer worships the divine doors (*devīr-dvāraḥ*), which have fostered the force, manly vigour and endurance of the aspirant. May those doors, exalters of truth, open wide in this sacrifice, allowing an easy passage to the aspirant, the bounteous showerer. May they enjoy. O sacrificer, offer oblations of purified butter. (1)

6. The sacrificer worships the two dawns (i.e. morning and evening; *uṣāsā-naktā*), which are two cows, easy to milk, and superb mothers. Both of them, like two cows having only one common calf, foster the aspirant, the calf, with lustre. May both of them enjoy. O sacrificer, offer oblations of purfied butter. (1)

7. The sacrificer worships the two divine priests (*daivyā-hotārā*), the two physicians, two friends, who cure the aspirant of his ills with sacrificial oblations. May those two divinities, full of vision and excellent wisdom, bestow on the aspirant indomitable strength. May both of them enjoy. O sacrificer, offer oblations of purified butter. (1)

8. The sacrificer worships the three mighty divinities (*tisro-devīḥ*), the divine intellect, the divine speech and the divine culture, which are like three deep- acting remedies effecting three elements of the body. May those mistresses of the aspirant and rich in abundant sacrificial supplies enjoy. O sacrificer, offer oblations of purified butter. (1)

9. The sacrificer worships the universal Architect (*tvaṣṭṛ*), the resplendent Lord, the divine physician, worthy of good worship, bright as purified butter, assuming various forms, prolific and bounteous. May the universal Architect bestow power of all the sense-organs on the aspirant. May He enjoy. O sacrificer, offer oblations of purified butter. (1)

होता यक्षद्वनस्पतिꣳ शमितारꣳ शतक्रतुं धियो जोष्टारमिन्द्रियम्।
मध्वा समञ्जन्पथिभिः सुगेभिः स्वदाति यज्ञं मधुना घृतेन वेत्वाज्यस्य होतर्यज ॥ १० ॥
होता यक्षदिन्द्रꣳ स्वाहाऽऽज्यस्य स्वाहा मेदसः स्वाहा स्तोकानाꣳ स्वाहा स्वाहाकृतीनाꣳ
स्वाहा हव्यसूक्तीनाम्। स्वाहा देवा आज्यपा जुषाणा इन्द्र आज्यस्य व्यन्तु होतर्यज ॥ ११ ॥
देवं बर्हिरिन्द्रꣳ सुदेवं देवैर्वीरवत्स्तीर्णं वेद्यामवर्धयत्।
वस्तोर्वृतं प्राक्तोर्भृतꣳ राया बर्हिष्मतोऽत्यगाद्वसुवने वसुधेयस्य वेतु यज ॥ १२ ॥
देवीर्द्वार इन्द्रꣳ सङ्घाते वीड्वीर्यामन्नवर्धयन्। आ वत्सेन तरुणेन कुमारेण च
मीवतापार्वाणꣳ रेणुककाटं नुदन्तां वसुवने वसुधेयस्य व्यन्तु यज ॥ १३ ॥
देवी उषासानक्तेन्द्रं यज्ञे प्रयत्यह्वेताम्।
दैवीर्विशः प्रायासिष्टाꣳ सुप्रीते सुधिते वसुवने वसुधेयस्य वीतां यज ॥ १४ ॥

Hotā yakṣadvanaspatiṁ śamitāraṁ śatakratuṁ dhiyo joṣṭāramindriyam.
Madhvā samañjanpathibhiḥ sugebhiḥ svadāti yajñaṁ madhunā ghṛtena vetvājyasya hotaryaja (i). //10//

Hotā yakṣadindraṁ svāhā" jyasya svāhā medasaḥ svāhā stokānāṁ svāhā svāhākṛtīnāṁ svāhā havyasūktīnām. Svāhā devā ājyapā juṣāṇā indra ājyasya vyantu hotaryaja (i). //11//

Devaṁ barhirindraṁ sudevaṁ devairvīravatstīrṇaṁ vedyāmavardhayat.
Vastorvṛtaṁ prāktorbhṛtaṁ rāyā barhiṣma-to'tyagādvasuvane vasudheyaysya vetu yaja (i). //12//

Devīrdvāra indraṁ saṅghāte vīḍvīryāmannavardhayan. Ā vatsena taruṇena kumāreṇa ca mīvatāpārvāṇaṁ reṇukakāṭaṁ nudantāṁ vasuvane vasudheyasya vyantu yaja (i). //13//

Devī uṣasānaktendraṁ yajñe prayatyahvetām.
Daivīrviśaḥ prāyāsiṣṭāṁ suprīte sudhite vasuvane vasudheyasya vītāṁ yaja (i). //14//

10. The sacrificer worships the Lord of forests (*vanaspati*), seasoner of the sacrificial materials, performer of a hundred selfless deeds, lover of intellect, and bestower of power of all the sense-organs. Leading us by sweet and easy paths, and filling our sacrifice with abundant purified butter, He makes them pleasing. May He enjoy. O sacrificer, offer oblations of purified butter. (1)

11. The sacrificer worships the resplendent Lord; *svāhā* of the purified butter; *svāhā* of the fatty substances; *svāhā* of the drops (of clarified butter); *svāhā* of the utterance of word *svāhā; svāhā* of the recitations of the beautiful hymns. May the learned ones, fond of butter, and the aspirant, enjoy. O sacrificer, offer oblations of purified butter. (1)

12. The divine herbage (*barhiṣ*), spread upon the altar by the learned ones, capable of producing sons, fosters the strength of the greatly divine aspirant. Collected in the day and processed at night, it surpasses in richness those others who have got herbs. At the time of distribution of wealth, may it procure the store of wealth for us. Offer sacrifice. (1)

13. The divine doors (*devīr-dvārah*), praiseworthy and closely joined, foster the strength of the aspirant in action. May they keep away the unmarried boys and adults from the dust-covered dangerous pits, as they run forward violently. At the time of distribution of wealth, may they procure the store of wealth for us. Offer sacrifice. (1)

14. The divine dawn and the night (*uṣāsā-naktā*) call (and arouse) the divine aspirant, when the sacrifice advances. May they, well-pleased and highly beneficial, go to the people divine. At the time of distribution of wealth, may both of them procure the store of wealth for us. Offer sacrifice. (1)

देवी जोष्ट्री वसुधिती देवमिन्द्रमवर्धताम् । अयाव्यन्याघा द्वेषांस्यान्या
वक्षद्वसु वार्याणि यजमानाय शिक्षिते वसुवने वसुधेयस्य वीतां यज ॥ १५ ॥

देवी ऊर्जाहुती दुघे सुदुघे पयसेन्द्रमवर्धताम् ।
इषमूर्जमन्या वक्षत्सग्धिं सपीतिमन्या नवेन पूर्वं दयमाने पुराणेन नवमधातामूर्जमूर्जाहुती
ऊर्जयमाने वसु वार्याणि यजमानाय शिक्षिते वसुवने वसुधेयस्य वीतां यज ॥ १६ ॥

देवा दैव्या होतारा देवमिन्द्रमवर्धताम् ।
हताघशंसावाभार्ष्टां वसु वार्याणि यजमानाय शिक्षितौ वसुवने वसुधेयस्य वीतां यज ॥ १७ ॥

देवीस्तिस्रस्तिस्रो देवीः पतिमिन्द्रमवर्धयन् ।
अस्पृक्षद्भारती दिवं रुद्रैर्यज्ञं सरस्वतीडा वसुमती गृहान् वसुवने वसुधेयस्य व्यन्तु यज ॥१८॥

Devī joṣṭrī vasudhitī devamindramavardhatām. Ayāvyanyāghā dveṣāṁsyānyā vakṣadvasu vāryāṇi yajamānāya śikṣite vasuvane vasudheyasya vītāṁ yaja (i). //15//

Devī ūrjāhutī dughe sudughe payasendramavardhatām. Iṣamūrjamanyā vakṣatsagdhiṁ sapītimanyā navena pūrvaṁ dayamāne purāṇena navamadhātāmūrjamūrjāhutī ūrjayamāne vasu vāryāṇi yajamānāya śikṣite vasuvane vasudheyasya vītāṁ yaja (i). //16//

Devā daivyā hotārā devamindramavardhatām. Hatāghaśaṁsāvābhārṣṭāṁ vasu vāryāṇi yajamānāya śikṣitau vasuvane vasudheyasya vītāṁ yaja (i). //17//

Devīstisrastisro devīḥ patimindramavardhyan. Aspṛkṣadbhāratī divaṁ rudrairyajñaṁ sarasvatīḍā vasumatī gṛhān vasuvane vasudheyasya vyantu yaja (i). //18//

15. The divine heaven and earth (*joṣṭrī*), omniscient, bestowers of rich treasures, foster the strength of the aspirant. One of them drives away the sins and the hatred, and the other brings the coveted treasures for the sacrificer. At the time of distribution of wealth, may both of them procure the store of wealth for us. Offer sacrifice. (1)

16. The divine heaven (*ūrjā*) and earth (*āhuti*), the two teeming cows, easy to milk, foster the strength of the aspirant with their milk. One of them (*ūrjā*) provides with the food and vigour and the other (*āhuti*) brings feasting and banqueting. Bestowers of strength, the heaven and earth are pleased to put new energy in the old and the energy of the old in the new; and well-ordained they supply the sacrificer with riches. At the time of distribution of wealth, may both of them procure the store of wealth for us. Offer sacrifice. (1)

17. The two divine celestial priests (*daivyā-hotārā*) foster the strength of the divine aspirant. May both of them, the slayers of those who praise the sins, knowing well the realities, bring the coveted riches for the sacrificer. At the time of distribution of wealth, may both of them procure the store of wealth for us. Offer sacrifice. (1)

18. The divinities three, the three divinities (*tisro-devīḥ*) exalt the aspirant, their master. The divine culture touches the heights of the heaven; the divine speech, in company of the adult sages, spreads the sacrifice; and the divine intellect, full of riches, fills our homes. At the time of the distribution of wealth, may they procure the store of wealth for us. Offer sacrifice. (1)

देव इन्द्रो नराशꣳसस्त्रिवरूथस्त्रिबन्धुरो देवमिन्द्रमवर्धयत् ।
शतेन शितिपृष्ठानामाहितः सहस्रेण प्र वर्तते मित्रावरुणेदस्य होत्रमर्हतो बृहस्पति स्तोत्रमश्विनाध्वर्यवं वसुवने वसुधेयस्य वेतु यज ॥ १९ ॥

देवो देवैर्वनस्पतिर्हिरण्यपर्णो मधुशाखः सुपिप्पलो देवमिन्द्रमवर्धयत् ।
दिवमग्रेणास्पृक्षदान्तरिक्षं पृथिवीमदृꣳहीद्वसुवने वसुधेयस्य वेतु यज ॥ २० ॥

देवं बर्हिर्वारितीनां देवमिन्द्रमवर्धयत् ।
स्वासस्थमिन्द्रेणासन्नमन्या बर्हीꣳष्यभ्यभूद्वसुवने वसुधेयस्य वेतु यज ॥ २१ ॥

देवो अग्निः स्विष्टकृद्देवमिन्द्रमवर्धयत् ।
स्विष्टं कुर्वन्त्स्विष्टकृत्स्विष्टमद्य करोतु नो वसुवने वसुधेयस्य वेतु यज ॥ २२ ॥

Deva indro narāśaṁsastrivarūthastribandhuro devamindramavardhayat.
Śatena śitipṛṣṭhānāmāhitaḥ sahasreṇa pra vartate mitrāvaruṇedasya hotramarhato bṛhaspati stotramaśvinādhvaryavaṁ vasuvane vasudheyasya vetu yaja (i). //19//

Devo devairvanaspatirhiraṇyaparṇo madhuśākhaḥ supippalo devamindramavardhayat.
Divamagreṇāspṛkṣadāntarikṣaṁ pṛthivīmadṛṁhīdvasuvane vasudheyasya vetu yaja (i). //20//

Devaṁ barhirvāritīnāṁ devamindramavardhayat.
Svāsasthamindreṇāsannamanyā barhīṁṣyabhyabhūdvasuvane vasudheyasya vetu yaja (i). //21//

Devo agnih svistakṛddevamindramavardhayat.
Sviṣṭaṁ kurvantsviṣṭakṛt sviṣṭamadya karotu no vasuvane vasudheyasya vetu yaja (i). //22//

19. The radiant resplendent Lord, praised by men (*narāśaṁsa*), having three abodes, and shielding thrice, raises the strength of the divine aspirant. Seated on hundreds of bright-backed rays, He moves forth in thousands (innumerable) of them. Of course the sun and the ocean deserve to be His priests, the great teacher His praise-singer, and the two healers His leading priests. At the time of the distribution of wealth, may He procure the store of wealth for us. Offer sacrifice. (1)

20. The divine Lord of forests (*vanaspati*), laden with golden leaves, spreading out sweet branches, bearing dainty fruit, heightens the strength of the divine aspirant. With His top, He touches the high heaven as well as the mid-space, and He stabilizes the earth. At the time of the distribution of wealth, may He procure the store of wealth for us. Offer sacrifice. (1)

21. The shining sacrifice (*barhiṣ*), the most coveted, heightens the strength of the divine aspirant. This sacrifice, nobly performed by the aspirant, subdues all the other sacrifices. At the time of distribution of wealth, may it procure the store of wealth for us. Offer sacrifice. (1)

22. The divine adorable Lord, fulfiller of good desires (*sviṣṭakṛt*), fosters the divine aspirant. May the fulfiller of good desires, fulfilling good desires, accomplish today for us what we desire. At the time of the distribution of wealth, may He procure the store of wealth for us. Offer sacrifice. (1)

अग्निमद्य होतारमवृणीतायं यजमानः पचन्पक्तीः पचन्पुरोडाशं बध्नन्निन्द्राय छागम् ।
सूपस्था अद्य देवो वनस्पतिरभवदिन्द्राय छागेन ।
अघत्तं मेदस्तः प्रति पचताग्रभीदवीवृधत्पुरोडाशेन । त्वामद्य ऋषे ॥ २३ ॥

होता यक्षत्समिधानं महद्यशः सुसमिद्धं वरेण्यमग्निमिन्द्रं वयोधसम् ।
गायत्रीं छन्द इन्द्रियं त्र्यविं गां वयो दधद्वेत्वाज्यस्य होतर्यज ॥ २४ ॥

होता यक्षत्तनूनपातमुद्भिदं यं गर्भमदितिर्दधे शुचिमिन्द्रं वयोधसम् ।
उष्णिहं छन्द इन्द्रियं दित्यवाहं गां वयो दधद्वेत्वाज्यस्य होतर्यज ॥ २५ ॥

Agnimadya hotāramavṛṇītāyaṁ yajamanaḥ pacan paktīḥ pacan puroḍāśaṁ badhnannindrāya chāgam (i).
Sūpasthā adya devo vanaspatirabhavadindrāya chāgena.
Aghattaṁ medastaḥ prati pacatāgrabhīdavīvṛdhatpuroḍāśena (ii).
Tvāmadya ṛṣe (iii). //23//

Hotā yakṣatsamidhānaṁ mahadyaśaḥ susamiddhaṁ vareṇyamagnimindraṁ vayodhasam.
Gāyatrīṁ chanda indriyaṁ tryaviṁ gāṁ dadhadvetvājyasya hotaryaja (i). //24//

Hotā yakṣattanūnapātamudbhidaṁ yaṁ garbham-aditirdadhe śucimindraṁ vayodhasam.
Uṣṇihaṁ chanda indriyaṁ dityavāhaṁ gāṁ vayo dadhadve-tvājyasya hotaryaja (i). //25//

23. Today this sacrificer has elected the adorable leader as his priest and has cooked meals and delicious rice-cakes as offerings; he has procured a goat for the aspirant. (1) Today the divine Lord of forests has been happily present with the goat for the aspirant. May both of you partake of the freshly cooked fatty foods. May you accept the rice-cake and grow strong with it. (2) O seer, the son of a seer, the grandson of a seer, today this sacrificer has chosen you for the many, who have assembled with the idea, that this one will win for me the choicest treasure from the bounties of Nature. O shining one, may you desire for us also the gifts, that the enlightened ones have given, and make some effort for it. O priest, you are urged hereby. You are a human priest sent for a benign speech and pleasing words. May you give good utterances. (3) (Repeated from XXI.61)

24. Let the sacrificer worship the resplendent Lord, the fire enkindled, enjoying great fame, fully ablaze (*susamiddha*), venerable, adorable and bestower of long life. May He come to us with the *gāyatrī* metre, bringing powers of all the sense-organs, with an eighteen months old calf, bestowing long life. O sacrificer, offer oblations of purified butter. (1)

25. Let the sacrificer worship the resplendent Lord, the protector of bodies (*tanūnapāt*), the one who brings sacrifices to fruition, the germ that was conceived by the Eternity, pure and bestower of long life. May He come to us with *uṣṇik* metre, bringing powers of all the sense-organs, a two year bullock, bestowing long life. O sacrificer, offer oblations of purified butter. (1)

होता यक्षदीडेन्यमीडितं वृत्रहन्तममिडाभिरीड्यꣳ सहः सोममिन्द्रं वयोधसम् ।
अनुष्टुभं छन्द इन्द्रियं पञ्चाविं गां वयो दधद्वेत्वाज्यस्य होतर्यज ॥ २६ ॥
होता यक्षत्सुबर्हिषं पूषण्वन्तममर्त्यꣳ सीदन्तं बर्हिषि प्रियेऽमृतेन्द्रं वयोधसम् ।
बृहतीं छन्द इन्द्रियं त्रिवत्सं गां वयो दधद्वेत्वाज्यस्य होतर्यज ॥ २७ ॥
होता यक्षद्व्यचस्वतीः सुप्रायणा ऋतावृधो द्वारो देवीर्हिरण्ययीर्ब्रह्माणमिन्द्रं वयोधसम् ।
पङ्क्तिं छन्द इहेन्द्रियं तुर्यवाहं गां वयो दधद्व्यन्त्वाज्यस्य होतर्यज ॥ २८ ॥
होता यक्षत्सुपेशसा सुशिल्पे बृहती उभे नक्तोषासा न दर्शते विश्वमिन्द्रं वयोधसम् ।
त्रिष्टुभं छन्द इहेन्द्रियं पष्ठवाहं गां वयो दधद्वीतामाज्यस्य होतर्यज ॥ २९ ॥

Hotā yakṣadīḍenyamīḍitaṁ vṛtrahantamamiḍābhirīḍyaṁ sahaḥ somamindraṁ vayodhasam.
Anuṣṭubhaṁ chanda indriyaṁ pañcāviṁ gāṁ vayo dadhadvetvājyasya hotaryaja(i). //26//

Hotā yakṣatsubarhiṣaṁ pūṣaṇvantamamartyaṁ sīdantam barhiṣi priye' mṛtendraṁ vayodhasam.
Bṛhatīṁ chanda indriyaṁ trivatsaṁ gāṁ vayo dadhadvetvājyasya hotaryaja (i). //27//

Hotā yakṣadvyacasvatīḥ suprāyaṇā ṛtāvṛdho dvāro devīrhiraṇyayīrbrahmāṇamindraṁ vayodhasam. Paṅktiṁ chanda ihendriyaṁ turyavāhaṁ gāṁ vayo dadhadvyantvājyasya hotaryaja (i). //28//

Hotā yakṣat supeśasā suśilpe bṛhatī ubhe naktoṣāsā na darśate viśvamindraṁ vayodhasam. Triṣṭubhaṁ chanda ihendriyaṁ paṣṭhavāhaṁ gāṁ vayo dadhadvītāmājyasya hotaryaja (i). //29//

26. Let the sacrificer worship the resplendent Lord, worthy of praise (*īḍenyam*), and praised by sages, the greatest killer of evils, laudable with laudations, bestower of endurance, bliss as well as of long life. May He come to us with the *anuṣṭup* metre, bringing powers of all the sense-organs, a thirty months old cow, bestowing long life. O sacrificer, offer oblations of purified butter. (1)

27. Let the sacrificer worship the resplendent Lord, performer of the great sacrifice (*barhiṣ*), the Lord of all nourishment, immortal, bestower of long life, seated at the sacrifice so dear to Him. May He come to us with the *bṛhatī* metre, bringing powers of all the sense-organs, a three years old cow, bestowing long life. O sacrificer, offer oblations of purified butter. (1)

28. Let the sacrificer worship the golden divine doors (*devīr dvārah*) opening wide, allowing easy passage and strengtheners of the right, and also the resplendent Lord, the knowledge-incarnate and the bestower of long life. May they come to us with the *paṅkti* metre, bringing powers of all the sense-organs, a four years old bullock, bestowing long life. O sacrificer, offer oblations of purified butter. (1)

29. Let the sacrificer worship both the night and the dawn (*naktoṣāsā*), beautiful of form, having varied colours, lofty, as if showing all this universe to the resplendent Lord, bestower of long life. May both of them come to us with the *triṣṭubh* metre, bringing powers of all the sense-organs, a bullock capable of carrying burden, bestower of long life. O sacrificer, offer oblations of purified butter. (1)

होता यक्षत्प्रचेतसा देवानामुत्तमं यशो होतारा दैव्या कवी सयुजेन्द्रं वयोधसम् ।
जगतीं छन्द इन्द्रियमनड्वाहं गां वयो दधद्वीतामाज्यस्य होतर्यज ॥ ३० ॥
होता यक्षत्पेशस्वतीस्तिस्रो देवीर्हिरण्ययीर्भारतीर्बृहतीर्महीः पतिमिन्द्रं वयोधसम् ।
विराजं छन्द इहेन्द्रियं धेनुं गां न वयो दधद्व्यन्त्वाज्यस्य होतर्यज ॥ ३१ ॥
होता यक्षत्सुरेतसं त्वष्टारं पुष्टिवर्धनꣳ रूपाणि बिभ्रतं पृथक् पुष्टिमिन्द्रं वयोधसम् ।
द्विपदं छन्द इन्द्रियमुक्षाणं गां न वयो दधद्वेत्वाज्यस्य होतर्यज ॥ ३२ ॥
होता यक्षद्वनस्पतिꣳ शमितारꣳ शतक्रतुꣳ हिरण्यपर्णमुक्थिनꣳ रशनां बिभ्रतं वशिं
भगमिन्द्रं वयोधसम् । ककुभं छन्द इहेन्द्रियं वशां वेहतं गां वयो दधद्वेत्वाज्यस्य होतर्यज ॥३३॥

Hotā yakṣatpracetasā devānāmuttamaṁ yaśo hotārā daivyā kavī sayujendraṁ vayodhasam. Jagatīṁ chanda indriyamanaḍvāhaṁ gāṁ vayo dadhadvītāmājyasya hotaryaja (i). //30//

Hotā yakṣatpeśasvatīstisro devīrhiranyayīrbhāratīrbṛhatīr-mahīḥ patimindraṁ vayodhasam. Virājaṁ chanda ihendriyaṁ dhenuṁ gāṁ na vayo dadhadvyantvājyasya hotaryaja (i). //31//

Hotā yakṣatsuretasaṁ tvaṣṭāraṁ puṣṭivardhanaṁ rūpāṇi bibhrataṁ pṛthak puṣṭimindraṁ vayodhasam. Dvipadaṁ chanda indriyamukṣāṇaṁ gāṁ na vayo dadhadvetvājyasya hotaryaja (i). //32//

Hotā yakṣadvanaspatiṁ śamitāraṁ śatakratuṁ hiraṇyaparṇamukthinaṁ raśanāṁ bibhrataṁ vaśiṁ bhagamindraṁ vayodhasam. Kakubhaṁ chanda ihendriyaṁ vaśāṁ vehataṁ gāṁ vayo dadhadvetvā-jyasya hotaryaja (i). //33//

30. Let the sacrificer worship the two celestial priests (*daivyā hotārā*), that are the best glories of the bounties of Nature, both full of wisdom and having vision, staying always as companions, and the resplendent Lord, bestower of long life. May both of them come to us with the *jagatī* metre, bringing powers of all the sense-organs, a bullock capable of pulling the cart, bestowing long life. O sacrificer, offer oblations of purified butter. (1)

31. Let the sacrificer worship the three divinities (*tisro devīḥ),* beautiful of form, the divine culture, the divine speech and the divine intellect (Bhāratī, Sarasvatī and Iḍā), lofty, golden and great, and their master the resplendent Lord, bestower of long life. May they come to us with the *virāṭ* metre, bringing the power of all the sense-organs, a milch-cow, bestowing long life. O sacrificer, offer oblations of purified butter. (1)

32. Let the sacrificer worship the universal Architect (*tvaṣṭṛ*), of prolific seed, fosterer of nourishment, assuming various different forms and bestowing nourishment and long life on the aspirant. May He come to us with the two-footed (*dvipada*) metre, bringing power of all the sense-organs, a bull capable of impregnation, bestowing long life. O sacrificer, offer oblations of purified butter. (1)

33. Let the sacrificer worship the Lord of the forests (*vanaspati*), the seasoner of sacrificial materials, performer of a hundred selfless deeds, laden with golden leaves, worthy of praises, wearing a beautiful girdle, and bestower of prosperity and long life on the aspirant. May He come to us with the *kakup* metre, bringing power of all the sense-organs, a barren and calf-slipping cow, bestowing long life. O sacrificer, offer oblations of purified butter. (1)

होता यक्षत्स्वाहाकृतीरग्निं गृहपतिं पृथग्वरुणं भेषजं कविं क्षत्रमिन्द्रं वयोधसम् ।
अतिच्छन्दसं छन्द इन्द्रियं बृहदृषभं गां वयो दधद्व्यन्त्वाज्यस्य होतर्यज ॥ ३४ ॥

देवं बर्हिर्वयोधसं देवमिन्द्रमवर्धयत् ।
गायत्र्या छन्दसेन्द्रियं चक्षुरिन्द्रे वयो दधद्वसुवने वसुधेयस्य वेतु यज ॥ ३५ ॥

देवीर्द्वारो वयोधसꣳ शुचिमिन्द्रमवर्धयन् ।
उष्णिहा छन्दसेन्द्रियं प्राणमिन्द्रे वयो दधद्वसुवने वसुधेयस्य व्यन्तु यज ॥ ३६ ॥

देवी उषासानक्ता देवमिन्द्रं वयोधसं देवी देवमवर्धताम् ।
अनुष्टुभा छन्दसेन्द्रियं बलमिन्द्रे वयो दधद्वसुवने वसुधेयस्य वीतां यज ॥ ३७ ॥

देवी जोष्ट्री वसुधिती देवमिन्द्रं वयोधसं देवी देवमवर्धताम् ।
बृहत्या छन्दसेन्द्रियꣳ श्रोत्रमिन्द्रे वयो दधद्वसुवने वसुधेयस्य वीतां यज ॥ ३८ ॥

Hotā yakṣatsvāhākṛtīragniṁ gṛhapatiṁ pṛthagvaruṇam bheṣajaṁ kaviṁ kṣatramindraṁ vayodhasam. Aticchandasaṁ chanda indriyaṁ bṛhadṛṣabhaṁ gāṁ vayo dadhadvayntvājyasya hotaryaja (i). //34//

Devaṁ barhirvayodhasaṁ devamindramavardhayat.
Gāyatryā chandasendriyaṁ cakṣurindre vayo dadhadvasuvane vasudheyasya vetu yaja (i). //35//

Devīrdvāro vayodhasaṁ śucimindramavardhayan.
Uṣṇihā chandasendriyaṁ prāṇamindre vayo dadhadvasuvane vasudheyasya vyantu yaja (i). //36//

Devī uṣāsānaktā devamindraṁ vayodhasaṁ devī devamavardhatām.
Anuṣṭubhā chandasendriyaṁ balamindre vayo dadhadvasuvane vītāṁ yaja (i). //37//

Devī joṣṭrī vasudhitī devamindraṁ vayodhasaṁ devī devamavardhatām.
Bṛhatyā chandasendriyaṁ śrotramindre vayo dadhadvasuvane vasudheyasya vītāṁ yaja (i). //38//

34. Let the sacrificer worship the utterances of *svāhā* (*svāhākṛti*), apart from the adorable Lord, the great householder, and the venerable Lord, curer of diseases, full of vision and bestower of ruling power and long life on the aspirant. May they come to us with the *aticchandas* metre, bringing power of all the sense-organs, a huge (strong) bull bestower of long life. O sacrificer, offer oblations of purified butter. (1)

35. The divine sacrifice (*barhiṣ*) makes the divine aspirant prosper enjoying a long life; with the *gāyatrī* metre, it bestows on the aspirant resplendence, vision and long life. At the time of distribution of wealth, may it procure the store of wealth for us. Offer sacrifice. (1)

36. The divine doors (*devīr dvāraḥ*) make the pious aspirant prosper enjoying a long life; with the *uṣṇik* metre, they bestow on the aspirant resplendence, vital breath and long life. At the time of distribution of wealth, may they procure the store of wealth for us. Offer sacrifice. (1)

37. The divine dawn and night (*uṣāsā-naktā*) both make the divine aspirant prosper with a long life–divinities aiding a divinity; with the *anuṣṭup* metre, they bestow on the aspirant resplendence, power and long life. At the time of distribution of wealth, may both of them procure the store of wealth for us. Offer sacrifice. (1)

38. The two shining divinities (*joṣṭrī*), affectionate and wealth-bestowing (i.e. heaven and earth), make the divine aspirant prosper with a long life—divinities aiding a divinity; with the *bṛhatī* metre, they bestow on the aspirant resplendence, hearing-power and long life. At the time of distribution of wealth, may both of them procure the store of wealth for us. Offer sacrifice. (1)

देवी ऊर्जाहुती दुघे सुदुघे पयसेन्द्रं वयोधसं देवी देवमवर्धताम् ।
पङ्क्त्या छन्दसेन्द्रियꣳ शुक्रमिन्द्रे वयो दधद्वसुवने वसुधेयस्य वीतां यज ॥ ३९ ॥

देवा दैव्या होतारा देवमिन्द्रं वयोधसं देवौ देवमवर्धताम् ।
त्रिष्टुभा छन्दसेन्द्रियं त्विषिमिन्द्रे वयो दधद्वसुवने वसुधेयस्य वीतां यज ॥ ४० ॥

देवीस्तिस्रस्तिस्रो देवीर्वयोधसं पतिमिन्द्रमवर्धयन् ।
जगत्या छन्दसेन्द्रियꣳ शूषमिन्द्रे वयो दधद्वसुवने वसुधेयस्य व्यन्तु यज ॥ ४१ ॥

देवो नराशꣳसो देवमिन्द्रं वयोधसं देवो देवमवर्धयत् ।
विराजा छन्दसेन्द्रियꣳ रूपमिन्द्रे वयो दधद्वसुवने वसुधेयस्य वेतु यज ॥ ४२ ॥

देवो वनस्पतिर्देवमिन्द्रं वयोधसं देवो देवमवर्धयत् ।
द्विपदा छन्दसेन्द्रियं भगमिन्द्रे वयो दधद्वसुवने वसुधेयस्य वेतु यज ॥ ४३ ॥

Devī ūrjāhutī dughe sudughe payasendraṁ vayodhasaṁ devī devamavardhatām.
Paṅktyā chandasendriyaṁ śukramindre vayo dadhadvasuvane vasudheyasya vītāṁ yaja (i). //39//

Devā daivyā hotārā devamindraṁ vayodhasaṁ devau devamavardhatām.
Triṣṭubhā chandasendriyaṁ tviṣimindre vayo dadhadvasuvane vasudheyasya vītāṁ yaja (i). //40//

Devīstisrastisro devīrvayodhasaṁ patimindramavardhayan.
Jagatyā chandasendriyaṁ śūṣamindre vayo dadhadvasuvane vasudheyasya vyantu yaja (i). //41//

Devo naraśaṁso devamindraṁ vayodhasaṁ devo devamavardhayat.

Virājā chandasendriyaṁ rūpamindre vayo dadhadvasuvane vasudheyasya vetu yaja (i). //42//

Devo vanspatirdevamindraṁ vayodhasaṁ devo devamavardhayat.
Dvipadā chandasendriyaṁ bhagamindre vayo dadhadvasuvane vasudheyasya vetu yaja (i). //43//

39. The divine heaven (*ūrjā*) and earth (*āhuti*), two teeming cows easy to milk, make the aspirant prosper with milk, giving him a long life—divinities aiding a divinity; with the *paṅkti* metre, both of them bestow on the aspirant resplendence, manly vigour and long life. At the time of distribution of wealth, may both of them procure the store of wealth for us. Offer sacrifice. (1)

40. Two shining divine priests (*daivyā-hotārā*) make the aspirant prosper with a long life—two divinities aiding a divinity; with the *triṣṭubh* metre, they bestow on the aspirant resplendence, lustre and long life. At the time of distribution of wealth, may both of them procure the store of wealth for us. Offer sacrifice. (1)

41. The divinities three, the three divinities (*tisro-devīḥ*) make the aspirant, their Lord, to prosper with a long life; with the *jagatī* metre, they bestow on the aspirant resplendence, might and long life. At the time of distribution of wealth, may they procure the store of wealth for us. Offer sacrifice. (1)

42. The divine Lord, praised by men (*narāśaṁsaḥ*) makes the divine aspirant prosper with a long life — a divinity aiding a divinity; with the *virāṭ* metre, He bestows on the aspirant resplendence, beautiful form and long life. At the time of distribution of wealth, may He procure the store of wealth for us. Offer sacrifice. (1)

43. The divine Lord of forests (*vanaspati*) makes the divine aspirant prosper with a long life — a divinity aiding a divinity; with a two-footed (*dvipada*) metre, He bestows on the aspirant resplendence, fortune and long life. At the time of distribution of wealth, may He procure the store of wealth for us. Offer sacrifice. (1)

देवं बर्हिर्वारितीनां देवमिन्द्रं वयोधसं देवं देवमवर्धयत् ।
ककुभा छन्दसेन्द्रियं यश इन्द्रे वयो दधद्वसुवने वसुधेयस्य वेतु यज ॥ ४४ ॥
देवो अग्निः स्विष्टकृद्देवमिन्द्रं वयोधसं देवमवर्धयत् ।
अतिच्छन्दसा छन्दसेन्द्रियं क्षत्रमिन्द्रे वयो दधद्वसुवने वसुधेयस्य वेतु यज ॥ ४५ ॥
अग्निमद्य होतारमवृणीतायं यजमानः पचन्पक्तीः पचन्पुरोडाशं बध्नन्निन्द्राय वयोधसे छागम् ।
सूपस्था अद्य देवो वनस्पतिरभवदिन्द्राय वयोधसे छागेन ।
अघत्तं मेदस्तः प्रतिपचताग्रभीदवीवृधत्पुरोडाशेन । त्वामद्य ऋषे ॥ ४६ ॥

Devaṁ barhirvāritīnāṁ devamindraṁ vayodhasaṁ devaṁ devamvardhayat.
Kakubhā chandasendriyaṁ yaśa indre vayo dadhadvasuvane vasudheyasya vetu vaja (i). //44//

Devo agniḥ sviṣṭakṛddevamindraṁ vayodhasaṁ devo devamavardhayat.
Aticchandasā chandasendriyaṁ kṣatramindre vayo dadhadvasuvane vasudheyasya vetu yaja (i). //45//

Agnimadya hotāramavṛṇītāyaṁ yajamānaḥ pacanpaktīḥ pacanpuroḍāśaṁ badhnannindrāya vayodhase chāgam (i).
Sūpasthā adya devo vanspatirabhavadindrāya vayodhase chāgena.
Aghattaṁ medastaḥ pratipacatāgrabhīdavīvṛdhatpuro-ḍāśena (ii). Tvāmadya ṛṣe (iii). //46//

44. The divine herbage (*barhiṣ*), born out of water, makes the divine aspirant prosper with a long life— a divinity aiding a divinity; with a *kakup* metre, it bestows on the aspirant resplendence, fame and long life. At the time of distribution of wealth, may it procure the store of wealth for us. Offer sacrifice. (1)

45. The fire divine, fulfiller of good desires (*sviṣṭakṛt*) makes the divine aspirant prosper with a long life — a divinity aiding a divinity; with the *aticchandas* metre, it bestows on the aspirant resplendence, the ruling power and long life. At the time of distribution of wealth, may they procure the store of wealth for us. Offer sacrifice. (1)

46. Today this sacrificer has elected the adorable leader as his priest and has cooked meals and delicious rice cakes as offerings; he has procured a goat for the aged aspirant. (1) Today the divine Lord of forests has been happily present with the goat for the aspirant. May both of you partake of the freshly cooked fatty foods. May you accept the rice-cake and grow strong with it. (2) O seer, the son of a seer, the grandson of a seer, today this sacrificer has chosen you for the many, who have assembled with the idea, that this one will win for me the choicest treasure from the bounties of Nature. O shining one, may you desire for us also the gifts, that the enlightened ones have given and make some effort for it. O priest, you are urged hereby. You are a human priest sent for a benign speech and pleasing words. May you give good utterances. (3) (Repeated from XXI.61)

अथैकोनत्रिंशोऽध्यायः ।

समिद्धो अञ्जन् कृदरं मतीनां घृतमग्ने मधुमत्पिन्वमानः ।
वाजी वहन् वाजिनं जातवेदो देवानां वक्षि प्रियमा सधस्थम् ॥ १ ॥

घृतेनाञ्जन्त्सं पथो देवयानान् प्रजानन् वाज्यप्येतु देवान् ।
अनु त्वा सप्ते प्रदिशः सचन्ताꣳ स्वधामस्मै यजमानाय धेहि ॥ २ ॥

ईड्यश्चासि वन्द्यश्च वाजिन्नाशुश्चासि मेध्यश्च सप्ते ।
अग्निष्ट्वा देवैर्वसुभिः सजोषाः प्रीतं वह्निं वहतु जातवेदाः ॥ ३ ॥

स्तीर्णं बर्हिः सुष्टरीमा जुषाणोरु पृथु प्रथमानं पृथिव्याम् ।
देवेभिर्युक्तमदितिः सजोषाः स्योनं कृण्वाना सुविते दधातु ॥ ४ ॥

एता उ वः सुभगा विश्वरूपा वि पक्षोभिः श्रयमाणा उदातैः ।
ऋष्वाः सतीः कवषः शुम्भमाना द्वारो देवीः सुप्रायणा भवन्तु ॥ ५ ॥

ATHAIKONATRIMŚO' DHYĀYAḤ

Samiddho añjan kṛdaraṁ matīnāṁ ghṛtamagne madhumatpinvamānaḥ.
Vājī vahan vājinaṁ jātavedo devānāṁ vakṣi priyamā sadhastham (i). //1//

Ghṛtenāñjantsaṁ patho devayānān prajānan vājyapyetu devān. Anu tvā sapte pradiṣaḥ sacantāṁ svadhāmasmai yajamānāya dhehi (i). //2//

Īḍyaścāsi vandyaśca vājinnāśūścāsi medhyaśca sapte.
Agniṣṭvā devairvasubhiḥ sajoṣāḥ prītaṁ vahniṁ vahatu jātavedāḥ (i). //3//

Stīrṇaṁ barhiḥ suṣṭarīmā juṣāṇoru pṛthu prathamānaṁ pṛthivyām. Devebhiryuktamditiḥ sajoṣāḥ syonaṁ kṛṇvānā suvite dadhātu (i). //4//

Etā u vaḥ subhagā viśvarūpā vi pakṣobhiḥ śrayamāṇā udātaiḥ. Ṛṣvāḥ satīḥ kavaṣaḥ śumbhamānā dvāro devīḥ suprāyaṇā bhavantu (i). //5//

CHAPTER TWENTY-NINE

1. O fire divine, having been kindled (*samiddaḥ*) and enjoying sweet melted butter, you illuminate the abode of wise ones. O speedy one, O omniscient, supporting this resolute sacrificer, may you lead him to the coveted meeting place of the enlightened ones. (1)

2. O fire divine, balming with purified butter (*tanūnapāt*) the godly paths known to you, may you, the speedy one, reach the enlightened ones. O restive courser, may all the mid-regions submit to you; may you provide sustenance to this sacrificer. (1)

3. O adorable leader, full of strength, an object of praise (*īḍyaḥ*) and reverence you are; O speedy like a courser, you are quick and wise. May the omniscient adorable Lord conduct you in concert with the enlightened young sages to the pleasing (sacrificial) fire. (1)

4. May we spread the sacred grass (*barhiṣ*) well, so that spreading out widely it covers the vast earth completely. May the Eternity, accordant and bestowing happiness, bless our sacrifice, attended by the enlightened ones, with good fortune. (1)

5. May your these divine doors (*devīr-dvāraḥ*), pleasing to look at, constructed in various designs, having uplifting panes for opening, lofty and closely fitting, creaking and richly adorned, always offer an easy passage. (1)

अन्तरा मित्रावरुणा चरन्ती मुखं यज्ञानामभि संविदाने ।
उषासा वां सुहिरण्ये सुशिल्पे ऋतस्य योनाविह सादयामि ॥ ६ ॥

प्रथमा वां सरथिना सुवर्णा देवौ पश्यन्तौ भुवनानि विश्वा ।
अपिप्रयं चोदना वां मिमाना होतारा ज्योतिः प्रदिशा दिशन्ता ॥ ७ ॥

आदित्यैर्नो भारती वष्टु यज्ञं सरस्वती सह रुद्रैर्न आवीत् ।
इडोपहूता वसुभिः सजोषा यज्ञं नो देवीरमृतेषु धत्त ॥ ८ ॥

त्वष्टा वीरं देवकामं जजान त्वष्टुरर्वा जायत आशुरश्वः ।
त्वष्टेदं विश्वं भुवनं जजान बहोः कर्तारमिह यक्षि होतः ॥ ९ ॥

अश्वो घृतेन त्मन्या समक्त उप देवाँ२ ऋतुशः पाथ एतु ।
वनस्पतिर्देवलोकं प्रजानन्नग्निना हव्या स्वदितानि वक्षत् ॥ १० ॥

प्रजापतेस्तपसा वावृधानः सद्यो जातो दधिषे यज्ञमग्ने ।
स्वाहाकृतेन हविषा पुरोगा याहि साध्या हविरदन्तु देवाः ॥ ११ ॥

Antarā mitrāvaruṇā carantī mukhaṁ yajñānāmabhi saṁvidāne.
Uṣāsā vāṁ suhiraṇye suśilpe ṛtasya yonāviha sādayāmi (i). //6//

Prathamā vāṁ sarathinā suvarṇā devau paśyantau bhuvanāni viśvā.
Apiprayaṁ codanā vāṁ mimānā hotārā jyotiḥ pradiśā diśantā (i). //7//

Ādityairno bhāratī vaṣṭu yajñaṁ sarasvatī saha rudairna āvīt. Iḍopahūtā vasubhiḥ sajoṣā yajñaṁ no devīramṛteṣu dhatta (i). //8//

Tvaṣṭā vīraṁ devakāmaṁ jajāna tvaṣṭurarvā jāyata āśuraśvaḥ. Tvaṣṭedaṁ viśvaṁ bhuvanaṁ jajāna bahoḥ kartāramiha yakṣi hotaḥ (i). //9//

Aśvo ghṛtena tmanyā samakta upa devāṅ ṛtuśaḥ pātha etu.
Vanaspatirdevalokaṁ prajānannagninā havyā svaditāni vakṣat (i). //10//

Prajāpatestapasā vāvṛdhānaḥ sadyo jāto dadhiṣe yajñamagne. Svāhākṛtena haviṣā purogā yāhi sādhyā haviradantu devāḥ (i). //11//

6. O you two dawns (*uṣāsā*), travelling between the sun and the ocean, indicating the time of beginning the sacrifices, beauteous with gold and marvellous with art, I hereby settle you in the abode of truth. (1)

7. (O sacrificer and sacrificer's wife), I have pleased your divine priests (*hotārā*), who are first and foremost, riding on a common chariot, fair-coloured, two divinities overseeing all the worlds, urging both of you to pious actions, and illuminating all the regions for your guidance. (1)

8. May the divine culture (*bhāratī*) along with the old sages adorn our sacrifice; may the divine speech (*sarasvatī*) along with the adult sages protect us; may the divine intellect (*iḍā*) invoked in concert with the young sages (also come); may these divinities place our sacrifice among the immortals. (1)

9. The universal Architect (*tvaṣṭṛ*) creates the hero devoted to the enlightened ones; from the universal Architect is born the moving, quick-running courser (i.e. the sun); the universal Architect has created all this world; O priest, may you worship Him at this sacrifice, who has created this vast universe. (1)

10. May the courser (the sun), sprinkling (the world) with his own water, bring food to the enlightened ones in due seasons. May the Lord of the forests (*vanaspati*), knowing full well, carry the offerings tasted by the fire, to the world of the enlightened ones. (1)

11. O adorable leader, growing strong with the fervour of the Lord of creatures, you start supporting the sacrifice as soon as you are born. March in the forefront with the oblation offered with the utterance *svāhā* (*svāhā-kṛta*), so that the deserving enlightened ones may enjoy the sacrificial offerings. (1)

यदक्रन्दः प्रथमं जायमान उद्यन्त्समुद्रादुत वा पुरीषात् ।
श्येनस्य पक्षा हरिणस्य बाहू उपस्तुत्यं महि जातं ते अर्वन् ॥ १२ ॥
यमेन दत्तं त्रित एनमायुनगिन्द्र एणं प्रथमो अध्यतिष्ठत् ।
गन्धर्वो अस्य रशनामगृभ्णात् सूरादश्वं वसवो निरतष्ट ॥ १३ ॥
असि यमो अस्यादित्यो अर्वन्नसि त्रितो गुह्येन व्रतेन ।
असि सोमेन समया विपृक्त आहुस्ते त्रीणि दिवि बन्धनानि ॥ १४ ॥
त्रीणि त आहुर्दिवि बन्धनानि त्रीण्यप्सु त्रीण्यन्तः समुद्रे ।
उतेव मे वरुणश्छन्त्स्यर्वन् यत्रा त आहुः परमं जनित्रम् ॥ १५ ॥
इमा ते वाजिन्नवमार्जनानीमा शफानां सनितुर्निधाना ।
अत्रा ते भद्रा रशना अपश्यमृतस्य या अभिरक्षन्ति गोपाः ॥ १६ ॥
आत्मानं ते मनसारादजानामवो दिवा पतयन्तं पतङ्गम् ।
शिरो अपश्यं पथिभिः सुगेभिररेणुभिर्जेहमानं पतत्रि ॥ १७ ॥

Yadakrandaḥ prathamaṁ jāyamāna udyantsamudrāduta vā purīṣāt. Śyenasya pakṣā hariṇasya bāhū upastutyaṁ mahi jātaṁ te arvan (i). //12//

Yamena dattaṁ trita enamāyunagindra eṇaṁ prathamo adhyatiṣṭhat. Gandharvo asya raśanāmagṛbhṇāt sūrādaśvaṁ vasavo niratasṭa (i). //13//

Asi yamo asyādityo arvannasi trito guhyena vratena.
Asi somena samayā vipṛkta āhuste trīṇi divi bandhanāni (i). //14//

Trīṇi ta āhurdivi bandhanāni trīṇyapsu trīṇyantaḥ samudre.
Uteva me varuṇaśchantsyarvan yatrā ta āhuḥ paramaṁ janitram (i). //15//

Imā te vājinnavamārjanānīmā śaphānāṁ saniturnidhānā.
Atrā te bhadrā raśanā apaśyamṛtasya yā abhirakṣanti gopāḥ (i). //16//

Ātmanāṁ te manasārādajānāmavo divā patayantaṁ pataṅgam. Śiro apaśyam pathibhiḥ sugebhirareṇubhirjehamānaṁ patatri (i). //17//

12. O sun, we glorify your rising. At times you appear to be springing from the firmament or from the ocean with the roar of sea-waves. You rise higher and higher as if possessed with the wings of a falcon and the limbs of a deer. (1)

13. The rising sun resembles a horse with a rider on. It looks like a gift from the supreme law-giver and harnessed by the divine floater. The resplendent Lord appears to be riding on him and the cosmic wind holds its reins. O cosmic Architect, you have fabricated this horse from that luminous giant body. (1)

14. O sun, you are the law-giver; you are the luminous giant and you float as if by a mysterious act. You are associated with the moon also. The sages say that you have three stations in the luminouos space. (1)

15. They also say that you have three stations in heaven and three on the earth and three in the interspace. You also seem to be one with the ocean and your form is most charming while arising out of waters. (1)

16. O sun, you are the victory horse of the cosmic ceremonial. I have beheld your purifying regions, these impressions of your hoofs, partcipating in the ceremony. Here are your auspicious reins, which are protectors of the rites that preserve it. (1)

17. I recognize in my mind your form afar off, going from the earth below, by way of heaven to the midday sun. I behold your head soaring aloft and mounting quickly by unobstructed paths, unsullied by dust. (1)

अत्रा ते रूपमुत्तममपश्यं जिगीषमाणमिष आ पदे गोः।
यदा ते मर्त्तो अनु भोगमानडादिद् ग्रसिष्ठ ओषधीरजीगः॥ १८॥

अनु त्वा रथो अनु मर्यो अर्वन्ननु गावोऽनु भगः कनीनाम्।
अनु व्रातासस्तव सख्यमीयुरनु देवा ममिरे वीर्यं ते॥ १९॥

हिरण्यशृङ्गोऽयो अस्य पादा मनोजवा अवर इन्द्र आसीत्।
देवा इदस्य हविरद्यमायन् यो अर्वन्तं प्रथमो अध्यतिष्ठत्॥ २०॥

ईर्मान्तासः शिलिकमध्यमासः सं शूरणासो दिव्यासो अत्याः।
हंसा इव श्रेणिशो यतन्ते यदाक्षिषुर्दिव्यमज्ममश्वाः॥ २१॥

तव शरीरं पतयिष्ण्वर्वन्तव चित्तं वात इव ध्रजीमान्।
तव शृङ्गाणि विष्ठिता पुरुत्रारण्येषु जर्भुराणा चरन्ति॥ २२॥

उप प्रागाच्छसनं वाज्यर्वा देवद्रीचा मनसा दीध्यानः।
अजः पुरो नीयते नाभिरस्यानु पश्चात्कवयो यन्ति रेभाः॥ २३॥

Atrā te rūpamuttamamapaśyaṁ jigīṣamāṇamiṣa ā pade goḥ. Yadā te marto anu bhogamānaḍādid grasiṣṭha oṣadhīrajīgaḥ(i). //18//

Anu tvā ratho anu maryo arvannanu gāvo' nu bhagaḥ kanīnām. Anu vrātāsastava sakhyamīyuranu devā mamire vīryaṁ te (i). //19//

Hiraṇyaśṛṅgo'yoasya pādā manojavā avara indra āsīt. Devā idasya haviradyamāyan yo arvantaṁ prathamo adhyatiṣṭhat (i). //20//

Īrmāntāsaḥ śilikamadhyamāsaḥ saṁ śūraṇāso divyāso atyāḥ. Haṁsā iva śreṇiśo yatante yadākṣiṣurdivyam-ajmamaśvāḥ (i). //21//

Tava śarīraṁ patayiṣṇvarvantava cittaṁ vāta iva dhrajīmān. Tava śṛṅgāṇi viṣṭhitā purutrāraṇyeṣu jarbhurāṇā caranti (i). //22//

Upa prāgācchasanaṁ vājyarvā devadrīcā manasā dīdhyānaḥ. Ajaḥ puro nīyate nābhirasyānu paścāt kavayo yanti rebhāḥ (i). //23//

18. I behold your most excellent form as if anxiously looking round for food on this earth, whilst you come up. It appears as if your attendant brings you near your provender, which you start consuming with immense pleasure. (1)

19. O sun, you look like a chariot with horses attached to it, and there are men to attend on you and cattle to follow you. It looks as if lovely maidens wait upon you; they have sought your friendship. O sun, the Nature's bounties themselves admire your vigour. (1)

20. His mien is of gold; his feet are of iron, and fleet as thought. The supreme self seems inferior to him in speed. All the bounties of Nature come to participate in the glory of the sun. And it appears as if the resplendent Lord himself first used this horse for his mount. (1)

21. O full-haunched, slender-waisted, high-spirited and celestial coursers (of the sun), may you gallop along like swans in rows, while the rays of the sun spread along the heavenly path. (1)

22. Your body, O solar horse, is made for motion. Your mind is as rapid as the wind; the hair of your mien toss in manifold directions and spread beautifully in the forest. (1)

23. The swift sun-horse approaches the place of rest, meditating with mind intent upon Nature's glories. The setting sun is preceded by an evening dusk as if bound to him. The priests and singers chant their parting hymns at this hour. (1)

उप प्रागात्परमं यत्सधस्थमर्वाँ२ अच्छा पितरं मातरं च ।
अद्या देवाञ्जुष्टतमो हि गम्या अथा शास्ते दाशुषे वार्याणि ॥ २४ ॥

समिद्धो अद्य मनुषो दुरोणे देवो देवान् यजसि जातवेदः ।
आ च वह मित्रमहश्चिकित्वान्त्वं दूतः कविरसि प्रचेताः ॥ २५ ॥

तनूनपात्पथ ऋतस्य यानान्मध्वा समञ्जन्त्स्वदया सुजि॰
मन्मानि धीभिरुत यज्ञमृन्धन् देवत्रा च कृणुह्यध्वरं नः ॥ २६ ॥
नराशंसस्य महिमानमेषामुप स्तोषाम यजतस्य यज्ञैः ।
ये सुक्रतवः शुचयो धियन्धाः स्वदन्ति देवा उभयानि हव्या ॥ २७ ॥
आजुह्वान ईड्यो वन्द्यश्चा याह्यग्ने वसुभिः सजोषाः ।
त्वं देवानामसि यह्व होता स एनान्यक्षीषितो यजीयान् ॥ २८ ॥

प्राचीनं बर्हिः प्रदिशा पृथिव्या वस्तोरस्या वृज्यते अग्रे अह्नाम् ।
व्यु प्रथते वितरं वरीयो देवेभ्यो अदितये स्योनम् ॥ २९ ॥

Upa prāgātparamaṁ yatsadhasthamarvāñ acchā pitaraṁ mātaraṁ ca. Adyā devāñjuṣṭatamo hi gamyā athā śāste dāśuṣe vāryāṇi (i). //24//

Samiddho adya manuṣo duroṇe devo devān yajasi jātavedaḥ. Ā ca vaha mitramahaścikitvān tvaṁ dūtaḥ kavirasi pracetāḥ (i). //25//

Tanūnapātpatha ṛtasya yānān madhvā samañjantsvadayā sujihva.
Manmāni dhībhiruta yajñamṛndhan devatrā ca kṛṇuhyadhvaraṁ naḥ (i). //26//

Narāśaṁsasya mahimānameṣāmupa stoṣāma yajatasya yajñaiḥ. Ye sukratavaḥ śucayo dhiyandhāḥ svadanti devā ubhayāni havyā (i). //27//

Ājuhvāna īḍyo vandyaścā yāhyagne vasubhiḥ sajoṣāḥ.
Tvaṁ devānāmasi yahva hotā sa enānyakṣīṣito yajīyān (i). //28//

Prācīnaṁ barhiḥ pradiśā pṛthivyā vastorasyā vṛjyate agre ahnām. Vyu prathate vitaraṁ varīyo devebhyo aditaye syonam (i). //29//

24. The sun-horse reaches the loftiest place, the source of its origin. May he approach Nature's bounties and cause them to bestow prosperity on the dedicated worshipper. (1)

25. O fire divine, having been enkindled (*samiddhaḥ*) today in the house of a man (i.e. the sacrificer), you yourself being a bounty of Nature, worship other bounties of Nature. O supporter of friends, you are awakener, auspicious messenger, full of vision and wisdom; may you bring all the bounties of Nature here (and entertain them). (1)

26. O protector of our bodies (*tanūnapāt*), may you make our travels along the path of truth sweet with honey; O fair-tongued, may you let us have a taste of it; exalting our sacrifice with holy thoughts and wisdom, may you convey our offerings to the bounties of Nature. (1)

27. We hereby extol the glory of Him, who is praised by men (*narāśaṁsa*) and who is worshipped through the sacrifices before these learned ones, who are virtuous, sinless, full of wisdom, and who taste both types of offerings (drinks and edibles). (1)

28. O adorable Lord, you are an object of praise (*īḍya*) and reverence. Invoked by us, may you come here accordant with riches. O mighty one, you are the arouser of the enlightened ones. As such, O most desirable, may you arouse them. (1)

29. The ancient sacrifice *(barhiṣ)* is spread at day-breaks by the holy commandant to cover whole of this earth. It spreads more and more, far and wide being delightful for the enlightened ones as well as for the Eternity. (1)

व्यचस्वतीरुर्विया वि श्रयन्तां पतिभ्यो न जनयः शुम्भमानाः ।
देवीर्द्वारो बृहतीर्विश्वमिन्वा देवेभ्यो भवत सुप्रायणाः ॥ ३० ॥
आ सुष्वयन्ती यजते उपाके उषासानक्ता सदतां नि योनौ ।
दिव्ये योषणे बृहती सुरुक्मे अधि श्रियꣳ शुक्रपिशं दधाने ॥ ३१ ॥
दैव्या होतारा प्रथमा सुवाचा मिमाना यज्ञं मनुषो यजध्यै ।
प्रचोदयन्ता विदथेषु कारू प्राचीनं ज्योतिः प्रदिशा दिशन्ता ॥ ३२ ॥
आ नो यज्ञं भारती तूयमेत्विडा मनुष्वदिह चेतयन्ती ।
तिस्रो देवीर्बर्हिरेदꣳ स्योनꣳ सरस्वती स्वपसः सदन्तु ॥ ३३ ॥
य इमे द्यावापृथिवी जनित्री रूपैरपिꣳशद्भुवनानि विश्वा ।
तमद्य होतरिषितो यजीयान् देवं त्वष्टारमिह यक्षि विद्वान् ॥ ३४ ॥
उपावसृज त्मन्या समञ्जन् देवानां पाथ ऋतुथा हवीꣳषि ।
वनस्पतिः शमिता देवो अग्निः स्वदन्तु हव्यं मधुना घृतेन ॥ ३५ ॥

Vyacasvatīrurviyā vi śrayantāṁ patibhyo na janayaḥ śumbhamānāḥ. Devīrdvāro bṛhatīrviśvaminvā devebhyo bhavata suprāyaṇāḥ. (i). //30//

Ā suṣvayantī yajate upāke uṣāsānaktā sadatāṁ ni yonau. Divye yoṣaṇe bṛhatī surukme adhi śriyaṁ śukrapiśaṁ dadhāne (i). //31//

Daivyā hotārā prathamā suvācā mimānā yajñaṁ manuṣo yajadhyai. Pracodayantā vidatheṣu kārū prācīnaṁ jyotiḥ pradiśā diśantā (i). //32//

Ā no yajñaṁ bhāratī tūyametviḍā manuṣvadiha cetayantī. Tisro devīrbarhiredaṁ syonaṁ sarasvatī svapasaḥ sadantu (i). //33//

Ya ime dyāvāpṛthivī janitrī rūpairapiṁśadbhuvanāni viśvā. Tamadya hotariṣito yajīyān devaṁ tvaṣṭāramiha yakṣi vidvān. (i). //34//

Upāvasṛja tmanyā samañjan devānāṁ pātha ṛtuthā havīṁṣi. Vanaspatiḥ śamitā devo agniḥ svadantu havyaṁ madhunā ghṛtena (i). //35//

30. May the divine doors (*devīr-dvāraḥ*), large and expansive, through which all the things pass, open wide, like well-adorned wives before their husbands, and may these give an easy access to the enlightened ones. (1)

31. May the two dawns and the night (*uṣāsā naktā*), worthy of company, each close to each, celestial damsels, grand and beautiful, wearing bright and dark appearances, come here smiling and be seated at this place of sacrifice. (1)

32. May the two divine priests (*daivyā hotārā*), foremost and sweet-tongued, come here to arrange sacrifices for the people, who are keen to perform them and may they, as good workers, inspire (others) in assemblies showing right directions with the ancient light. (1)

33. May the divine culture (*bhāratī*) come to our sacrifice instantaneously as well as the divine intellect (*iḍa*) arousing our meditating minds; may the divine speech (*sarasvatī*) also come and may all these three divinities, inspiring good actions, be seated comfortably at this sacrifice. (1)

34. O worshipper, fond of performing sacrifices, at our urging may you worship this day at this place the divine universal Architect (*tvaṣṭṛ*), whom you know and who gives form to the heaven and earth, that are parents of all the beings. (1)

35. O Lord, may you send in proper seasons for the enlightened ones the food, which is made delicious with your own grace; may the vegetation (*vanaspati*), the soothing cloud, and the sacrificial fire enjoy the offerings mixed with honey and purified butter. (1)

सद्यो जातो व्यमिमीत यज्ञमग्निर्देवानामभवत् पुरोगाः ।
अस्य होतुः प्रदिश्यृतस्य वाचि स्वाहाकृतꣳ हविरदन्तु देवाः ॥ ३६ ॥
केतुं कृण्वन्नकेतवे पेशो मर्या अपेशसे । समुषद्भिरजायथाः ॥ ३७ ॥

जीमूतस्येव भवति प्रतीकं यद्वर्मी याति समदामुपस्थे ।
अनाविद्धया तन्वा जय त्वꣳ स त्वा वर्मणो महिमा पिपर्तु ॥ ३८ ॥

धन्वना गा धन्वनाऽऽजिं जयेम धन्वना तीव्राः समदो जयेम ।
धनुः शत्रोरपकामं कृणोति धन्वना सर्वाः प्रदिशो जयेम ॥ ३९ ॥
वक्ष्यन्तीवेदा गनीगन्ति कर्णं प्रियꣳ सखायं परिषस्वजाना ।
योषेव शिङ्क्ते वितताधि धन्वञ्ज्या इयꣳ समने पारयन्ती ॥ ४० ॥

ते आचरन्ती समनेव योषा मातेव पुत्रं बिभृतामुपस्थे ।
अप शत्रून् विध्यताꣳ संविदाने आर्त्नी इमे विष्फुरन्ती अमित्रान् ॥ ४१ ॥

Sadyo jāto vyamimīta yajñamagnirdevānāmabhavat purogāḥ. Asya hotuḥ pradiśyṛtasya vāci svāhākṛtaṁ haviradantu devāḥ (i). //36//

Ketuṁ kṛṇvannaketave peśo maryā apeśase. Samuṣadbhirajāyathāḥ. (i). //37//

Jīmūtasyeva bhavati pratīkaṁ yadvarmī yāti samadāmupasthe. Anāviddhayā tanvā jaya tvaṁ sa tvā varmaṇo mahimā pipartu (i). //38//

Dhanvanā gā dhanvanā" jiṁ jayema dhanvanā tīvrāḥ samado jayema. Dhanuḥ śatrorapakāmaṁ kṛṇoti dhanvanā sarvāḥ pradiśo jayema (i). //39//

Vakṣyantīvedā ganīganti karṇaṁ priyaṁ sakhāyaṁ pariṣasvajānā. Yoṣeva śiṅkte vitatādhi dhanavañjyā iyaṁ samane pārayantī (i). //40//

Te ācarantī samaneva yoṣā māteva putraṁ bibhṛtāmupasthe.
Apa śatrūn vidhyatāṁ saṁvidāne ārtnī ime viṣphurantī amitrān (i). //41//

36. The fire divine, as soon as it is born, makes ready for the sacrifices, and it becomes forerunner of the bounties of Nature; under the guidance of this invoker, may the bounties of Nature enjoy our offerings dedicated (*svāhākṛtam*) to the truthful speech. (1)

37. O mortal, you owe your rise to eminence to that resplendent God, who, with the rays of the dawn, awakens life in the lifeless and gives form to the formless. (1)

38. When a warrior, equipped with an armour, advances in the front-line of battles, his form is like that of a thunder-cloud. May you be conqueror with your body unwounded. May the strength of your armour protect you. (1)

39. May we win the cattle of the enemies with the bow. With the bow, may we be victorious in battle. May we be winners in our hot encounters. May the bow bring grief and sorrow to our adversaries. Armed with the bow, may we subdue all hostile regions. (1)

40. The bow-string, drawn tight upon the bow and making way in battle, repeatedly approaches the ear as if embracing its friend (the arrow) and proposing to say something sweet and loving, as a woman whispers. (1)

41. May the two extremities of the bow act consentaneouly, like a wife and sympathizing (with her husband) uphold (the warrior) as a mother nurses her child upon her lap. And may they, moving concurrently and harassing the foe, scatter his enemies. (1)

बह्वीनां पिता बहुरस्य पुत्रश्चिश्चा कृणोति समनावगत्य ।
इषुधिः सङ्का पृतनाश्च सर्वाः पृष्ठे निनद्धो जयति प्रसूतः ॥ ४२ ॥

रथे तिष्ठन् नयति वाजिनः पुरो यत्र-यत्र कामयते सुषारथिः ।
अभीशूनां महिमानं पनायत मनः पश्चादनु यच्छन्ति रश्मयः ॥ ४३ ॥

तीव्रान् घोषान् कृण्वते वृषपाणयोऽश्वा रथेभिः सह वाजयन्तः ।
अवक्रामन्तः प्रपदैरमित्रान् क्षिणन्ति शत्रूँ१रनपव्ययन्तः ॥ ४४ ॥

रथवाहनꣳ हविरस्य नाम यत्रायुधं निहितमस्य वर्म ।
तत्रा रथमुप शग्मꣳ सदेम विश्वाहा वयꣳ सुमनस्यमानाः ॥ ४५ ॥

स्वादुषꣳसदः पितरो वयोधाः कृच्छ्रेश्रितः शक्तीवन्तो गभीराः ।
चित्रसेना इषुबला अमृध्राः सतोवीरा उरवो व्रातसाहाः ॥ ४६ ॥

Bahvīnāṁ pitā bahurasya putraściścā kṛṇoti samanāvagatya. Iṣudhiḥ saṅkā pṛtanāśca sarvāḥ pṛṣṭhe ninaddho jayati prasūtaḥ (i). *//42//*

Rathe tiṣṭhan nayati vājinaḥ puro yatra-yatra kāmayate suṣārathiḥ. Abhīśūnāṁ mahimānaṁ panāyata manaḥ paścādanu yacchanti raśmayaḥ (i). *//43//*

Tīvrān ghoṣān kṛṇvate vṛṣapāṇayo' śvā rathebhiḥ saha vājayantaḥ. Avakrāmantaḥ prapadairamitrān kṣiṇanti śatrūñ ranapavyayantaḥ (i). *//44//*

Rathavāhaṇaṁ havirasya nāma yatrāyudhaṁ nihitamasya varma. Tatrā rathamupa śagmaṁ sadema viśvāhā vayaṁ sumanasyamānāḥ (i). *//45//*

Svāduṣaṁsadaḥ pitaro vayodhāḥ kṛcchreśritaḥ śaktīvanto gabhīrāḥ. Citrasenā iṣubalā amṛdhrāḥ satovīrā uravo vrātasāhāḥ (i). *//46//*

42. The quiver, slung on the back, pouring its shafts, vanquishes all opposing and shouting armies. It is like a father of many daughters and sons, who clang and cry as father goes to battle. (1)

43. The skilful charioteer guides his strong horses whither-so-ever he wishes. See and praise the efficacy of the reins, which from behind declare the driving excellence of the person. (1)

44. The horses, raising the dust with their hoofs, rush on with the chariot, and utter loud neighings. They do not retreat, but trample with their forefeet upon the enemies and destroy them. (1)

45. The spoil, borne off on his car, in which his weapons and armoury are deposited, is the appropriate oblation of the warrior. So let us here, daily pay tributes to the helpful joy-bestowing car. (1)

46. The guards of the chariot, revelling in the savoury spoil, are distributors of food, protectors in calamity, armed with spears, resolute, beautifully arrayed strong in arrows, invincible, of heroic valour, robust and conquerors of numerous hosts. (1)

ब्राह्मणासः पितरः सोम्यासः शिवे नो द्यावापृथिवी अनेहसा ।
पूषा नः पातु दुरितादृतावृधो रक्षा माकिर्नो अघशंस ईशत ॥ ४७ ॥
सुपर्णं वस्ते मृगो अस्या दन्तो गोभिः सन्नद्धा पतति प्रसूता ।
यत्रा नरः सं च वि च द्रवन्ति तत्रास्मभ्यमिषवः शर्म यंसन् ॥ ४८ ॥
ऋजीते परि वृङ्धि नोऽश्मा भवतु नस्तनूः । सोमो अधि ब्रवीतु नोऽदितिः शर्म यच्छतु ॥४९॥
आ जङ्घन्ति सान्वेषां जघनाँ२ उप जिघ्नते । अश्वाजनि प्रचेतसोऽश्वान्त्समत्सु चोदय ॥ ५० ॥
अहिरिव भोगैः पर्येति बाहुं ज्याया हेतिं परिबाधमानः ।
हस्तघ्नो विश्वा वयुनानि विद्वान् पुमान् पुमांसं परि पातु विश्वतः ॥ ५१ ॥
वनस्पते वीड्वङ्गो हि भूया अस्मत्सखा प्रतरणः सुवीरः ।
गोभिः सन्नद्धो असि वीडयस्वास्थाता ते जयतु जेत्वानि ॥ ५२ ॥

Brāhmaṇāsaḥ pitaraḥ somyāsaḥ śive no dyāvāpṛthivī anehasā. Pūṣā naḥ pātu duritādṛtāvṛdho rakṣā mākirno aghaśaṁsa īśata (i). //47//

Suparṇaṁ vaste mṛgo asyā danto gobhiḥ sannaddhā patati prasūtā. Yatrā naraḥ saṁ ca vi ca dravanti tatrāsmabhyamiṣavaḥ śarma yaṁsan (i). //48//

Ṛjīte pari vṛṅdhi no' śmā bhavatu nastanūḥ. Somo adhi bravītu no' ditiḥ śarma yacchatu (i). //49//

Ā jaṅghanti sānveṣāṁ jaghanāñ upa jighnate. Aśvājani pracetaso' śvāntsamatsu codaya (i). //50//

Ahiriva bhogaiḥ paryeti bāhuṁ jyāyā hetiṁ paribādhamānaḥ.
Hastaghno viśvā vayunāni vidvān pumān pumaṁsaṁ pari pātu viśvataḥ (i). //51//

Vanaspate vīḍvaṅgo hi bhūyā asmatsakhā prataraṇaḥ suvīraḥ. Gobhiḥ sannaddho asi vīḍayasvāsthātā te jayatu jetvāni (i). //52//

47. May the learned intellectuals, the progenitors, presenters of the herbal offerings, the observers of truth, protect us; may the faultless heaven and earth be propitious to us; may the nourisher Lord preserve us from misfortune; let no caluminator prevail over us. (1)

48. The arrow puts on a (feathery) wing; the (horn of the) deer is its point; it is bound with the sinews of the cow; it alights where directed; wherever men assemble or disperse, there may the shafts provide security. (1)

49. O straight-flying (arrow), defend us; may our bodies be strong as stone; may the blissful Lord speak to us encouragement and may the mother infinity grant us success. (1)

50. It is the whip, with which the skilful charioteers lash the thighs and scourge the flanks of the steeds; may it urge the horses in battles to march on. (1)

51. The hand glove, imparting protection from the abrasion of the bow-string, surrounds the forearm like a snake with its convolutions; may the brave man, experienced in the arts of war, defend a combatant on every side. (1)

52. May the chariot, made of strong wood, be wholesome; may it be our friend, our protector, and manned by brave men. May it show forth its strength, compact with the straps of leather, and may its rider be victorious in battle. (1)

दिवः पृथिव्याः पर्योज उद्भृतं वनस्पतिभ्यः पर्याभृतꣳ सहः ।
अपामोज्मानं परि गोभिरावृतमिन्द्रस्य वज्रꣳ हविषा रथं यज ॥ ५३ ॥

इन्द्रस्य वज्रो मरुतामनीकं मित्रस्य गर्भो वरुणस्य नाभिः ।
सेमां नो हव्यदातिं जुषाणो देव रथ प्रति हव्या गृभाय ॥ ५४ ॥

उप श्वासय पृथिवीमुत द्यां पुरुत्रा ते मनुतां विष्ठितं जगत् ।
स दुन्दुभे सजूरिन्द्रेण देवैर्दूराद्दवीयो अप सेध शत्रून् ॥ ५५ ॥

आ क्रन्दय बलमोजो न आ धा निष्टनिहि दुरिता बाधमानः ।
अप प्रोथ दुन्दुभे दुच्छुना इत इन्द्रस्य मुष्टिरसि वीडयस्व ॥ ५६ ॥

आमूरज प्रत्यावर्तयेमाः केतुमद्दुन्दुभिर्वावदीति ।
समश्वपर्णाश्चरन्ति नो नरोऽस्माकमिन्द्र रथिनो जयन्तु ॥ ५७ ॥

आग्नेयः कृष्णग्रीवः सारस्वती मेषी बभ्रुः सौम्यः पौष्णः श्यामः शितिपृष्ठो बार्हस्पत्यः शिल्पो वैश्वदेव ऐन्द्रोऽरुणो मारुतः कल्माष ऐन्द्राग्नः संहितोऽधोरामः सावित्रो वारुणः कृष्ण एकशितिपात्पेत्वः ॥ ५८ ॥

Divaḥ pṛthivyāḥ paryoja udbhṛtaṁ vanaspatibhyaḥ paryābhṛtaṁ sahaḥ.
Apāmojmānaṁ pari gobhirāvṛtamindrasya vajraṁ haviṣā rathaṁ yaja (i). //53//

Indrasya vajro marutāmanīkaṁ mitrasya garbho varuṇasya nābhiḥ. Semāṁ no havyadātiṁ juṣāṇo deva ratha prati havyā gṛbhāya (i). //54//

Upa śvāsaya pṛthivīmuta dyāṁ purutrā te manutāṁ viṣṭitaṁ jagat. Sa dundubhe sajūrindreṇa devairdūrāddavīyo apa sedha śatrūn (i). //55//

Ā krandāya balamojo na ādhā niṣṭanihi duritā bādhamānaḥ. Apa protha dundubhe ducchunā ita indrasya muṣṭirasi vīḍayasva (i). //56//

Āmūraja pratyāvartayemāḥ ketumaddundubhirvāvadīti.
Samaśvaparṇāścaranti no naro'smākamindra rathino jayantu (i). //57//

Āgneyaḥ kṛṣṇagrīvaḥ sārasvatī meṣī babhruḥ saumyaḥ pauṣṇaḥ śyamaḥ śitipṛṣṭho bārhaspatyaḥ śilpo vaiśvadeva aindro'ruṇo mārutaḥ kalmāṣa aindrāgnaḥ saṁhit-o'dhorāmaḥ sāvitro vāruṇaḥ kṛṣṇa ekaśitipāt petvaḥ (i). //58//

53. Show full respect to the chariot replete with synthesis of basic elements of heaven and earth — the divine extracted essence of the forest wood. It possesses the velocity of waters, and is encompassed with cow-hide and the thunderbolt. (1)

54. O all pervading Lord of the celestial chariot, your vehicle is as powerful as the bolt of justice of the resplendent Lord. It is the precursor of vital principles, and is as vast as our ocean. It is bright as sun-rays. May you accept it, offered with prayers and oblation. (1)

55. O war-drums, fill with your thumping sound the earth and heaven. Let all things, movable or stationary, be aware of it. May you, associated with the resplendent Lord and Nature's forces, drive all malign elements far from us. (1)

56. May (O drum), you sound loud and animate our vigour and enthusiasm. May you thunder aloud and scare away malignant powers. Please repel, O drum, those, who take delight in harming us. Being the fist of the divines, show your firmness. (1)

57. O resplendent Lord, the drum sounds repeatedly as a signal. May you recover the lost cattle of wisdom and bring them back here. Our leaders, mounted, as if, on speedy chariots, assemble. Let our car-borne fighting faculties against vice and nescience be triumphant. (1)

58. The black-necked ram belongs to the fire; the ewe belongs to the divine speech; the brown-coloured belongs to the moon; the dusk-coloured belongs to the Nourisher; the white-backed belongs to the Lord Supreme; the dappled belongs to all the bounties of Nature; the red belongs to the lightning; black with white spots belongs to the cloud-bearing winds; the strong-limbed belongs to the lightning and fire; the one with dark underbelly belongs to the sun; the swift-running black with only one white foot belongs to the ocean. (1)

अग्नयेऽनीकवते रोहिताञ्जिरनड्वानधोरामौ सावित्रौ पौष्णौ रजतनाभी वैश्वदेवौ
पिशङ्गौ तूपरौ मारुतः कल्माष आग्नेयः कृष्णोऽजः सारस्वती मेषी वारुणः पेत्वः ॥ ५९ ॥
अग्नये गायत्राय त्रिवृते राथन्तरायाष्टाकपाल इन्द्राय त्रैष्टुभाय पञ्चदशाय
बार्हतायैकादशकपालो विश्वेभ्यो देवेभ्यो जागतेभ्यः सप्तदशेभ्यो वैरूपेभ्यो
द्वादशकपालो मित्रावरुणाभ्यामानुष्टुभाभ्यामेकविंशाभ्यां वैराजाभ्यां
पयस्या बृहस्पतये पाङ्क्ताय त्रिणवाय शाक्वराय चरुः सवित्र औष्णिहाय
त्रयस्त्रिंशाय रैवताय द्वादशकपालः प्राजापत्यश्चरुरदित्यै विष्णुपत्न्यै
चरुरग्नये वैश्वानराय द्वादशकपालोऽनुमत्या अष्टाकपालः ॥ ६० ॥

Agnaye'nīkavate rohitāñjiranaḍvānadhorāmau sāvitrau pauṣṇau rajatanābhī vaiśvadevau piśaṅgau tūparau mārutaḥ kalmāṣa āgneyaḥ kṛṣṇo' jaḥ sārasvatī meṣī vāruṇaḥ petvaḥ (i). //59//

Agnaye gāyatrāya trivṛte rāthantarāyāṣṭākapāla indrāya traiṣṭubhāya pañcadaśāya bārhatāyaikādaśakapālo viśvebhyo devebhyo jāgatebhyaḥ saptadaśebhyo vairūpebhyo dvādaśakapālo mitrāvaruṇābhyāmānuṣṭubhābhyāmeka-viṁśābhyāṁ vairājābhyāṁ payasyā bṛhaspataye pāṅktāya triṇavāya śākvarāya caruḥ savitra auṣṇihāya trayastriṁśāya raivatāya dvādaśakapālaḥ prājāpatyaścaruradityai viṣṇupatn-yai caruragnaye vaiśvānarāya dvādaśakapālo'numatyā aṣṭākapālaḥ (i). //60//

59. The bullock with a red mark on forehead belongs to the adorable leader having the army; the two with dark underbelly belong to the sun; the two with silvery navels belong to the nourisher; the two hornless orange-coloured belong to all the bounties of Nature; black with white spots belong to the cloud-bearing winds; the black goat belongs to the fire; the ewe belongs to the divine speech; and the fast running one belongs to the ocean. (1)

60. For the adorable Lord, praised with the *gāyatrī* metre, the *trivṛt stoma* and the *rathantara sāman*, rice-cake on eight earthen plates is offered; for the resplendent Lord, praised with the *triṣṭubh* metre, the *pañcadaśa stoma* and the *bṛhat sāman*, rice-cake on eleven earthern plates is offered; for all the bounties of Nature, praised with the *jagatī* metre, the *saptadaśa stoma*, and the *vairūpa sāman*, rice-cake on twelve earthern plates is offered; for the sun and the ocean, praised with the *anuṣṭup* metre, the *ekaviṁśa stoma* and the *vairāja sāman*, rice boiled in milk is offered; for the Lord supreme, praised with the *paṅkti* metre, the *saptaviṁśa stoma* and the *śākvaṛa sāman* boiled rice is offered; for the impeller Lord, praised with the *uṣṇik* metre, the *tryastriṁśa stoma* and the *raivata sāman*, rice-cake on twelve earthern plates is offered; for the Lord of Creatures, boiled rice is offered; for the adorable Lord, the benefactor of all men, rice on twelve earthern plates is offered and for accordancy (*anumati*) on eight earthern plates. (1)

अथ त्रिंशोऽध्यायः ।

देव सवितः प्र सुव यज्ञं प्र सुव यज्ञपतिं भगाय ।
दिव्यो गन्धर्वः केतपूः केतं नः पुनातु वाचस्पतिर्वाचं नः स्वदतु ॥ १ ॥
तत्सवितुर्वरेण्यं भर्गो देवस्य धीमहि । धियो यो नः प्रचोदयात् ॥ २ ॥
विश्वानि देव सवितर्दुरितानि परा सुव । यद्भद्रं तन्न आ सुव ॥ ३ ॥
विभक्तारं हवामहे वसोश्चित्रस्य राधसः । सवितारं नृचक्षसम् ॥ ४ ॥

ब्रह्मणे ब्राह्मणं[1] क्षत्राय राजन्यं[2] मरुद्भ्यो वैश्यं[3] तपसे शूद्रं[4] तमसे तस्करं[5]
नारकाय वीरहणं[6] पाप्मने क्लीबं[7] आक्रयाया अयोगूं[8] कामाय पुँश्चलूं[9] अतिक्रुष्टाय मागधम्[10] ॥ ५ ॥

ATHA TRIṀŚO' DHYĀYAḤ

Deva savitaḥ pra suva yajñaṁ pra suva yajñapatiṁ bhagāya. Divyo gandharvaḥ ketapūḥ ketaṁ naḥ punātu vācaspatirvācaṁ naḥ svadatu (i). //1//

Tat saviturvareṇyaṁ bhargo devasya dhīmahi. Dhiyo yo naḥ pracodayāt (i). //2//

Viśvāni deva savitarduritāni parā suva. Yadbhadraṁ tanna ā suva (i). //3//

Vibhaktāraṁ havāmahe vasościtrasya rādhasaḥ. Savitāraṁ nṛcakṣasam (i). //4//

Brahmaṇe brāhmaṇaṁ (i) kṣatrāya rājanyaṁ (ii) marudbhyo vaiśyaṁ (iii) tapase śūdraṁ (iv) tamase taskaraṁ (v) nārakāya vīrahaṇaṁ (vi) pāpmane klībam (vii) ākrayāyā ayogūṁ (viii) kāmāya puṁścalūm (ix) atikruṣṭāya māgadham (x). //5//

CHAPTER THIRTY

1. O Creator God, speed our sacrifice onward, and urge the sacrificer forward to the prosperity. May the shining maintainer of the earth, the purifier of thoughts, purify our thinking and the Lord of speech make our tongue sweet. (1)

2. May we imbibe in ourselves the choicest effulgence of the divine Creator, so that He evokes our intellects. (1)

3. Remove from us, O divine creator, all the ills and evils and bestow upon us what is good and beneficial. (1)

4. We invoke the source of light, the divine Creator, bestower of a wonderful home full of wealth and wisdom. (1)

5. (He deputes) the intellectual persons (*brāhmaṇa*) to intellectual pursuits. (1) The nobles *(rājanya)* to defence and administration. (2) The producers of wealth *(vaiśya)* to sustenance of people. (3) The labourer *(śūdra)* to hard work. (4) The thief to darkness. (5) The slaughterer of heroes to hellish tortures. (6) The impotent to evil tendencies. (7) The swordsman to attack. (8) A harlot to sexual pleasure. (9) A minstrel *(māgadha)* to excessive abusing. (10)

नृत्ताय सूतं गीताय शैलूषं धर्माय सभाचरं नरिष्ठायै भीमलं नर्माय रेभं
हसाय कारि—मानन्दाय स्त्रीषखं प्रमदे कुमारीपुत्रं मेधायै रथकारं धैर्याय तक्षाणम् ॥६॥
तपसे कौलालं मायायै कर्मारं रूपाय मणिकारं शुभे वपं शरव्याया इषुकारं
हेत्यै धनुष्कारं कर्मणे ज्याकारं दिष्टाय रज्जुसर्जं मृत्यवे मृगयु—मन्तकाय श्वनिनम् ॥७॥

नदीभ्यः पौञ्जिष्ठ—मृक्षीकाभ्यो नैषादं पुरुषव्याघ्राय दुर्मदं गन्धर्वाप्सरोभ्यो व्रात्यं
प्रयुग्भ्य उन्मत्तं सर्पदेवजनेभ्योऽप्रतिपद—मयेभ्यः कितव—मीर्यताया अकितवं
पिशाचेभ्यो बिदलकारीं यातुधानेभ्यः कण्टकीकारीम् ॥ ८ ॥
सन्धये जारं गेहायोपपति—मार्त्यै परिवित्तं निर्ऋत्यै परिविविदान—मराध्या एदिधिषुःपतिं
निष्कृत्यै पेशस्कारीं संज्ञानाय स्मरकारीं प्रकामोद्यायोपसदं वर्णायानुरुधं
बलायोपदाम् ॥ ९ ॥

Nṛttāya sūtaṁ (i) gītāya śailūṣaṁ (ii) dharmāya sabhācaraṁ (iii) nariṣṭhāyai bhīmalaṁ (iv) narmāya rebhaṁ (v) hasāya kārim (vi) ānandāya strīṣakhaṁ (vii) pramade kumārīputraṁ (viii) medhāyai rathakāraṁ (ix) dhairyāya takṣāṇam (x). //6//

Tapase kaulālaṁ (i) māyāyai karmāraṁ (ii) rūpāya maṇikāraṁ (iii) śubhe vapaṁ (iv) śaravyāyā iṣukāraṁ (v) hetyai dhanuṣkāraṁ (vi) karmaṇe jyākāraṁ (vii) diṣṭāya rajjusarjaṁ (viii) mṛtyave mṛgayum (ix) antakāya śvaninam (x). //7//

Nadībhyaḥ pauñjiṣṭham (i) ṛkṣīkābhyo naiṣādaṁ (ii) puruṣavyāghrāya durmadaṁ (iii) gandharvāpsarobhyo vrātyaṁ (iv) prayugbhya unmattaṁ (v) sarpadevajanebhyo pratipadam (vi) ayebhyaḥ kitavam (vii) īryatāyā akitavaṁ (viii) piśācebhyo bidalakārīṁ (ix) yātudhānebhyaḥ kaṇṭakīkārīm (x). //8//

Sandhaye jāraṁ (i) gehāyopapatim (ii) ārtyai parivittaṁ (iii) nirṛtyai parivividānam (iv) arādhyā edidhiṣuḥ patiṁ (v) niṣkṛtyai peśaskārīṁ (vi) saṁjñānāya smarakārīṁ (vii) prakāmodyāyopasadaṁ (viii) varṇāyānurudhaṁ (ix) balāyopadām (x). //9//

6. A charioteer to dancing. (1) A street-singer to singing. (2) A court officer to dispense justice. (3) A dreadful man to violence. (4) A chatterer to pastime. (5) A joker to laughter. (6) A woman-lover to pleasure. (7) A damsel's son to erotic acting. (8) A chariot-maker to dexterity. (9) A carpenter to patience. (10)

7. A potter to baking. (1) A blacksmith to wonderful inventions. (2) A jeweller to beauty. (3) A gardener to decoration. (4) An arrow-maker to arrow making. (5) A bow-maker to weapons. (6) A bow-string-maker to string. (7) A rope-maker to binding. (8) A hunter to killing. (9) A dog-leader with dogs to finishing. (10)

8. To work on rivers a fisherman. (1) To boats a boatman's son. (2) To a male tiger a dare-devil. (3) To singers and dancing women an outcaste. (4) To experimentation a demented person. (5) To snake-charmers and spirit-callers a juggler. (6) To dice-playing a gambler. (7) To industrious work a non-gambler. (8) To those who eat the flesh of dead a bamboo-splitter woman. (9) To tormentors a woman working with thorns. (10)

9. To illegitimate connections a paramour. (1) To cohabitation an illicit lover. (2) To sexual mania the unmarried elder brother of a married younger brother. (3) To misery the married younger brother of an unmarried elder brother. (4) To misfortune the husband of a married younger sister (of an unmarried sister). (5) To neglect a lady who embroiders. (6) To rendezvous a woman dealing in love-charms. (7) To rouse sexual instinct a by-sitter. (8) To acceptance an obstinate person. (9) To strength a briber. (10)

उत्सादेभ्यः कुब्जं प्रमुदे वामनं द्वार्भ्यः स्रामं स्वप्नायान्धमधर्माय बधिरं
पवित्राय भिषजं प्रज्ञानाय नक्षत्रदर्शमाशिक्षायै प्रश्निनमुपशिक्षायां अभिप्रश्निनं
मर्यादायै प्रश्नविवाकम् ॥ १० ॥

अर्मेभ्यो हस्तिपं जवायाश्वपं पुष्ट्यै गोपालं वीर्यायाविपालं तेजसेऽजपालम्
इरायै कीनाशं कीलालाय सुराकारं भद्राय गृहपं श्रेयसे वित्तधम्
आध्यक्ष्यायानुक्षत्तारम् ॥ ११ ॥

भायै दार्वाहारं प्रभाया अग्न्येधं ब्रध्नस्य विष्टपायाभिषेक्तारं वर्षिष्ठाय नाकाय परिवेष्टारं
देवलोकाय पेशितारं मनुष्यलोकाय प्रकरितारं सर्वेभ्यो लोकेभ्य उपसेक्तारम्
अव ऋत्यै वधायोपमन्थितारं मेधाय वासःपल्पूलीं प्रकामाय रजयित्रीम् ॥ १२ ॥

ऋतये स्तेनहृदयं वैरहत्याय पिशुनं विविक्त्यै क्षत्तारमौपद्रष्ट्र्यायानुक्षत्तारं
बलायानुचरं भूम्ने परिष्कन्दं प्रियाय प्रियवादिनमरिष्ट्या अश्वसादं
स्वर्गाय लोकाय भागदुघं वर्षिष्ठाय नाकाय परिवेष्टारम् ॥ १३ ॥

Utsādebhyaḥ kubjaṁ (i) pramude vāmanaṁ (ii) dvārbhyaḥ srāmaṁ (iii) svapnāyāndham (iv) adharmāya badhiraṁ (v) pavitrāya bhiṣajaṁ (vi) prajñānāya nakṣatradarśam (vii) āśikṣāyai praśninam (viii) upaśikṣāyā abhipraśninaṁ (ix) maryādāyai praśnavivākam (x). //10//

Armebhyo hastipaṁ (i) javāyāśvapaṁ (ii) puṣṭyai gopālaṁ (iii) vīryāyāvipālaṁ (iv) tejase' japālam (v) irāyai kīnāśaṁ (vi) kīlālāya surākāraṁ (vii) bhadrāya gṛhapaṁ (viii) śreyase vittadham (ix) ādhyakṣyāyānukṣattāram (x). //11//

Bhāyai dārvāhāraṁ (i) prabhāyā agnyedhaṁ (ii) bradhnasya viṣṭapāyābhiṣektāraṁ (iii) varṣiṣṭhāya nākāya pariveṣṭāraṁ (iv) devalokāya peśitāraṁ (v) manuṣyalokāya prakaritāraṁ (vi) sarvebhyo lokebhya upasektāram (vii) ava ṛtyai vadhāyopamanthitāraṁ (viii) medhāya vāsaḥpalpūlīṁ (ix) prakāmāya rajayitrīṁ (x). //12//

Ṛtaye stenahṛdayaṁ (i) vairahatyāya piśunaṁ (ii) viviktyai kṣattāram (iii) aupadraṣṭryāyānukṣattāram (iv) balāyānucaram (v) bhūmne pariṣkandam (vi) priyāya priyavādinam (vii) ariṣṭyā aśvasādaṁ (viii) svargāya lokāya bhāgadugham (ix) varṣiṣṭhāya nākāya pariveṣṭāram (x). //13//

10. (One should find) a hunchback for creating disturbances. (1) A dwarf for amusement. (2) A blear-eyed man for door-keeping. (3) A blind man for sleeping. (4) A deaf man for unrighteous actions. (5) A physician for cleaning. (6) For observation an astronomer. (7) An inquisitive student for thorough education. (8) A cross-examiner for thorough inquiry. (9) A judge of issues for dispensing justice. (10)

11. (One should seek) for elegant movement an elephant-keeper. (1) For speed a horse-keeper. (2) For nourishment a cowherd. (3) For manly vigour a shephered. (4) For lustre a goatherd. (5) For plenty of food a farmer. (6) For beer a wine-maker. (7) For weal a house-keeper. (8) For happy living a wealthy man. (9) For supervision a faithful assistant. (10)

12. (One should seek) for fire a wood-fetcher. (1) For light a fire-kindler. (2) For sun's abode a sprinkler of water. (3) For superb pleasure a meal-server. (4) For the world of enlightenment an artist. (5) For the world of men a distributor. (6) For all the people a liberal giver. (7) For painful murder an inciter of strife. (8) For cleanliness a washer-women. (9) For delight a female dyer. (10)

13. (One should seek) for assault a man with a thief's heart. (1) For animosity that may lead to murder a slanderer. (2) For discrimination a door-keeper. (3) For finding out secrets an attendent of the door-keeper. (4) For strength a follower. (5) For dignity a running footman. (6) For affection a sweet speaker. (7) For safety a horseman. (8) For worldly happiness an appropriate distributor. (9) For pleasure a meal-server. (10).

मन्यवेऽयस्तापं क्रोधाय निसरं योगाय योक्तारं शोकायाभिसर्तारं
क्षेमाय विमोक्तारं—मुत्कूलनिकूलेभ्यस्त्रिष्ठिनं वपुषे मानस्कृतं शीलायाञ्जनीकारीं
निर्ऋत्यै कोशकारीं यमायासूम् ॥ १४ ॥
यमाय यमसू—मथर्वभ्योऽवतोकां संवत्सराय पर्यायिणीं परिवत्सरायाविजाता—
मिदावत्सरायातीत्वरी—मिद्वत्सरायातिष्कद्वरीं वत्सराय विजर्जरां संवत्सराय पलिक्नी—
मृभुभ्योऽजिनसन्धं साध्येभ्यश्चर्मम्नम् ॥ १५ ॥
सरोभ्यो धैवर—मुपस्थावराभ्यो दाशं वैशन्ताभ्यो बैन्दं नड्वलाभ्यः शौष्कलं
पाराय मार्गार—मवाराय कैवर्तं तीर्थेभ्य आन्दं विषमेभ्यो मैनालं स्वनेभ्यः पर्णकं
गुहाभ्यः किरातं सानुभ्यो जम्भकं पर्वतेभ्यः किम्पूरुषम् ॥ १६ ॥
बीभत्सायै पौल्कसं वर्णाय हिरण्यकारं तुलायै वाणिजं पश्चादोषाय ग्लाविनं
विश्वेभ्यो भूतेभ्यः सिध्मलं भूत्यै जागरण—मभूत्यै स्वपन—मार्त्यै जनवादिनं
व्यृद्ध्या अपगल्भं संशराय प्रच्छिदम् ॥ १७ ॥

Manyave'yastāpaṁ (i) krodhāya nisaraṁ (ii) yogāya yoktāraṁ (iii) śokāyābhisartāraṁ (iv) kṣemāya vimoktāram (v) utkūlanikūlebhyastriṣṭhinaṁ (vi) vapuṣe mānaskṛtaṁ (vii) śīlāyāñjanīkārīṁ (viii) nirṛtyai kośakārīṁ (ix) yamāyāsūm (x). //14//

Yamāya yamasūm (i) atharvabhyo'vatokāṁ (ii) saṁvatsarāya paryāyiṇīṁ (iii) parivatsarāyāvijātām (iv) idāvatsarāyātit-varīṁ (v) idvatsarāyātiṣkadvarīṁ (vi) vatsarāya vijarjarāṁ (vii) saṁvatsarāya paliknīm (viii) ṛbhubhyo'jinasandhaṁ (ix) sādhyebhyaścarmamnam (x). //15//

Sarobhyo dhaivaram (i) upasthāvarābhyo dāśaṁ (ii) vaiśantābhyo baindaṁ (iii) naḍvalābhyaḥ śauṣkalaṁ (iv) pārāya mārgāram (v) avārāya kaivartaṁ (vi) tīrthebhya āndaṁ (vii) viṣamebhyo mainālaṁ (viii) svanebhyaḥ parṇakaṁ (ix) guhābhyaḥ kirātaṁ (x) sānubhyo jambhakaṁ (xi) parvatebhyaḥ kimpūruṣam (xii). //16//

Bībhatsāyai paulkasaṁ (i) varṇāya hiraṇyakāraṁ (ii) tulāyai vāṇijaṁ (iii) paścādoṣāya glāvinaṁ (iv) viśvebhyo bhūtebhyaḥ sidhmalaṁ (v) bhūtyai jāgaraṇam (vi) abhūtyai svapanam (vii) ārtyai janavādinaṁ (viii) vyṛddhyā apagalbhaṁ (ix) saṁśarāya pracchidam (x). //17//

14. (One should seek) for enthusiasm an iron-smelter. (1) For anger an impurity-remover. (2) For welding a welder. (3) For grief an assailant. (4) For weal a deliverer. (5) For high and low uneven surface, a tripod. (6) For handsome body a worshipping person. (7) For virtue a woman collyrium-maker. (8) For calamity (misery) a female scabbard-maker. (9) For discipline a childless woman. (10)

15. (One should seek) for twins a twin-bearing mother. (1) For a perseverer a woman prone to miscarriage. (2) For the first year of a five year cycle (Saṁvatsara) a way-ward fickle woman. (3) For the second year (Parivatsara) a woman, who does not bear any child. (4) For the third year (Idāvatsara) a woman, who is very sexy. (5) For the fourth year (Idvatsara) a woman with much menstruation. (6) For the fifth year (Vatsara) a worn out woman. (7) For a year in general a grey-haired woman. (8) For tanners a hide-dresser. (9) For makers of leather-articles a currier. (10)

16. (One should seek) for lakes a fisherman *(dhīvara)*. (1) For standing waters (near river or sea) a fisher (*dāśa*). (2) For ponds a son of a tribal (*niṣāda*). (3) For reed-beds a fish-seller (*śauṣkala*). (4) For the yonder bank of the river a deer-hunter (*mārgāra*). (5) For this bank of the river a boatman (*kaivarta*). (6) For fords a barrage-maker (*ānda*). (7) For unpredictable waters a skilled fisher (*maināla*). (8) For catching sounds a tribal (*bhilla*) who wears tree-leaves for clothes. (9) For caverns a hunter (*kirāta*). (10) For hills a rock-blaster (*jambhaka*). (11) For high mountains a beardless hillman *(kiṁpuruṣa)*. (12)

17. (One should seek) for obnoxious jobs a scavanger. (1) For colour a goldsmith. (2) For weighing balance a merchant. (3) For finding faults an unpleasant man. (4) For all the beings a procurer of comforts. (5) For prosperity an alert man. (6) For poverty a sleepy person. (7) For mischief a gossiper. (8) For defamation a shameless person. (9) For extreme violence a mincer. (10)

अक्षराजाय कितवं कृतायादिनवदर्शं त्रेतायै कल्पिनं द्वापरायाधिकल्पिनम्
आस्कन्दाय सभास्थाणुं मृत्यवे गोव्यच्छमन्तकाय गोघातम्
क्षुधे यो गां विकृन्तन्तं भिक्षमाण उपतिष्ठति दुष्कृताय चरकाचार्यं पाप्मने सैलगम् ॥१८॥
प्रतिश्रुत्काया अर्तनं घोषाय भषमन्ताय बहुवादिनमनन्ताय मूकम्
शब्दायाडम्बराघातं महसे वीणावादं क्रोशाय तूणवध्ममवरस्पराय शङ्खध्मम्
वनाय वनपमन्यतोअरण्याय दावपम् ॥ १९ ॥
नर्माय पुंश्चलूं हसाय कारिं यादसे शाबल्यां ग्रामण्यं गणकमभिक्रोशकम्
तान्महसे वीणावादं पाणिघ्नं तूणवध्मं तान्नृत्तायानन्दाय तलवम् ॥ २० ॥

Akṣarājāya kitavaṁ (i) kṛtāyādinavadarśaṁ (ii) tretāyai kalpinaṁ (iii) dvāparāyādhikalpinam (iv) āskandāya sabhāsthāṇuṁ (v) mṛtyave govyaccham (vi) antakāya goghātaṁ (vii) kṣudhe yo gāṁ vikṛntantaṁ bhikṣamāṇa upatiṣṭhati (viii) duṣkṛtāya carakācāryaṁ (ix) pāpmane sailagaṁ (x). //18//

Pratiśrutkāyā artanaṁ (i) ghoṣāya bhaṣam (ii) antāya bahuvādinam (iii) anantāya mūkaṁ (iv) sabdāyāḍambarāghātaṁ (v) mahase vīṇāvādaṁ (vi) krośāya tūṇavadhamam (vii) avarasparāya śaṅkhadhmaṁ (viii) vanāya vanapam (ix) anyatoraṇyāya dāvapam (x). //19//

Narmāya puṅścalūṁ (i) hasāya kāriṁ (ii) yādase śābalyāṁ (iii) grāmaṇyaṁ (iv) gaṇakam (v) abhikrośakaṁ (vi) tānmahase vīṇāvādaṁ (vii) pāṇighnaṁ (viii) tūṇavadhamaṁ tānnṛttāyā - (ix) nandāya talavam (x). //20//

18. (One should send) for winning a dice-game a gambler. (1) For inspection of finished work a fault-finder. (2) For a game of three players a referee. (3) For a game of two persons an umpire. (4) For a game of many persons a judge. (5) For death, a person who molests cows. (6) For killing, a person who slaughters cows. (7) For hunger (till death), a person who goes on begging from a person who cuts a cow to pieces. (8) For evil actions a master-quack. (9) For murder a murderer's son. (10)

19. (One should seek) for fulfilment of promise a truthful man (*ṛta* = truth). (1) For announcing a shouter. (2) For reaching a conclusion a talkative person. (3) For avoiding a conclusion a mute person. (4) For loud noise a drummer. (5) For festivity a lute-player. (6) For war-call a buglar. (7) For sending a signal from one place to the other a conch-blower. (8) For forest a forest-ranger. (9) For a big forest a forest-conservator. (10)

20. (One should seek) a harlot for pastime. (1) A jester for laughter. (2) A tribal woman for fish. (3) A village head-man, (4) a mathematician (5) and an announcer, these for grandeur. (6) A lute-player, (7) a drum-player, (8) and a flutist, these for folk dance. (9) A cymbal-musician for pleasure. (10)

अग्नये पीवानं पृथिव्यै पीठसर्पिणं वायवे चाण्डालमन्तरिक्षाय वंशनर्तिनं
दिवे खलतिं सूर्याय हर्यक्षं नक्षत्रेभ्यः किर्मिरं चन्द्रमसे किलासम्
अह्ने शुक्लं पिङ्गाक्षं रात्र्यै कृष्णं पिङ्गाक्षम् ॥ २१ ॥

अथैतानष्टौ विरूपाना लभतेऽतिदीर्घं चातिह्रस्वं चातिस्थूलं चातिकृशं चातिशुक्लं चातिकृष्णं
चातिकुल्वं चातिलोमशं च । अशूद्रा अब्राह्मणास्ते प्राजापत्याः ।
मागधः पुंश्चली कितवः क्लीबोऽशूद्रा अब्राह्मणास्ते प्राजापत्याः ॥ २२ ॥

Agnaye pīvānaṁ (i) pṛthivyai pīṭhasarpiṇaṁ (ii) vāyave cāṇḍālam (iii) antarikṣāya vaṁśanartinaṁ (iv) dive khalatiṁ (v) sūryāya haryakṣaṁ (vi) nakṣatrebhyaḥ kirmiraṁ (vii) candramase kilāsam (viii) ahne śuklaṁ piṅgākṣaṁ (ix) rātryai kṛṣṇaṁ piṅgākṣam (x). //21//

Athaitānaṣṭau virūpānālabhate' tidīrghaṁ cātihrasvaṁ cātisthūlaṁ cātikṛśaṁ cātiśuklaṁ cātikṛṣṇaṁ cātikulvaṁ cātilomaśaṁ ca. Aśūdrā abrāhmaṇāste prājāpatyāḥ.
Māgadhaḥ puṅścalī kitavaḥ klībo'śūdrā abrāhmaṇāste prājāpatyāḥ (i). //22//

21. For fire (one should select) a fat man. (1) For earth a cripple. (2) For wind a *cāṇḍāla* (disposer of dead bodies). (3) For mid-air a pole-dancer. (4) For the sky a bald-head. (5) For the sun a golden-eyed person. (6) For the stars a person with spotted skin. (7) For moon a person suffering from leucoderma. (8) For day a fair-skinned brown-eyed man. (9) For night a dark skinned brown-eyed man. (10)

22. Then one finds eight types of malformed persons; some unusually tall, some unusually small, some unusually fat, some unusually lean and thin, some unusually white, some unusually black, some unusually hairless and some having hairs on bodies. They are neither the *brāhmaṇas* (intellectuals) nor the *śudrās* (labourers); they are creatures of the Lord. Similarly, a bully, a harlot, a gambler, and an eunuch is neither a *brāhmaṇa* nor a *śūdra;* all of them are creatures of the Lord. (1)

अथैकत्रिंशोऽध्यायः ।

सहस्रशीर्षा पुरुषः सहस्राक्षः सहस्रपात् । स भूमिꣳ सर्वत स्पृत्वाऽत्यतिष्ठद्दशाङ्गुलम् ॥ १ ॥

पुरुष एवेदꣳ सर्वं यद्भूतं यच्च भाव्यम् । उतामृतत्वस्येशानो यदन्नेनातिरोहति ॥ २ ॥

एतावानस्य महिमातो ज्यायाँश्च पूरुषः । पादोऽस्य विश्वा भूतानि त्रिपादस्यामृतं दिवि ॥ ३ ॥

त्रिपादूर्ध्व उदैत्पुरुषः पादोऽस्येहाभवत् पुनः । ततो विष्वङ् व्यक्रामत्साशनानशने अभि ॥ ४ ॥

ततो विराडजायत विराजो अधि पूरुषः । स जातो अत्यरिच्यत पश्चाद्भूमिमथो पुरः ॥ ५ ॥

तस्माद्यज्ञात्सर्वहुतः सम्भृतं पृषदाज्यम् । पशूँस्ताँश्चक्रे वायव्यानारण्या ग्राम्याश्च ये ॥ ६ ॥

ATHAIKATRIṀŚO' DHYĀYAḤ

Sahasraśīrṣā puruṣaḥ sahasrākṣaḥ sahasrapāt.
Sa bhūmiṁ sarvata spṛtvā'tyatiṣṭhaddaśāṅgulam (i). //1//

Puruṣa evedaṁ sarvaṁ yadbhūtaṁ yacca bhāvyam.
Utāmṛtatvasyeśāno yadannenātirohati (i). //2//

Etāvānasya mahimāto jyāyāṅśca pūruṣaḥ.
Pādo' sya viśvā bhūtāni tripādasyāmṛtaṁ divi (i). //3//

Tripādūrdhva udaitpuruṣaḥ pādo'syehābhavat punaḥ.
Tato viṣvaṅ vyakrāmat sāśanānaśane abhi (i). //4//

Tato virāḍajāyata virājo adhi pūruṣaḥ.
Sa jāto atyaricyata paścādbhūmimatho puraḥ (i). //5//

Tasmādyajñātsarvahutaḥ sambhṛtaṁ pṛṣadājyam.
Paśūṅstāṅścakre vāyavyānāraṇyā grāmyāśca ye (i). //6//

CHAPTER THIRTY-ONE

1. The Cosmic Man has thousands of heads, thousands of eyes, and thousands of feet. Enveloping this whole universe, He exceeds it by ten finger-breadths all around. (1)

2. Whatever all this is, whatever has been in the past and whatever is going to be in future, all that is, in fact, the Cosmic Man Himself. He is the Lord of immortality, and of all what grows by food. (1)

3. Such is His grandeur. But in fact the Cosmic Man is greater even than this. The entire creation is only a quarter part of His being, the other three quarters are immortal in heaven. (1)

4. Three-fourths of that Cosmic Man rise up in the heaven. The one fourth is still here on the earth. Then He starts spreading in all directions towards all that eats and eats not. (1)

5. From that Cosmic Man, super-luminiscence is born and from superluminiscence again the creative factor is born. Expanding, He exceeds the earth backward and forward both. (1)

6. From that cosmic sacrifice, to which all things have been offered as oblations, milk and curd (sustaining food) are obtained. Thereon He makes creatures that fly in the air, and the animals, wild and domestic. (1)

तस्माद्यज्ञात् सर्वहुत ऋचः सामानि जज्ञिरे । छन्दांᳪसि जज्ञिरे तस्माद्यजुस्तस्मादजायत ॥ ७ ॥
तस्मादश्वा अजायन्त ये के चोभयादतः । गावो ह जज्ञिरे तस्मात्तस्माज्जाता अजावयः ॥८॥
तं यज्ञं बर्हिषि प्रौक्षन् पुरुषं जातमग्रतः । तेन देवा अयजन्त साध्या ऋषयश्च ये ॥ ९ ॥
यत्पुरुषं व्यदधुः कतिधा व्यकल्पयन् । मुखं किमस्यासीत् किं बाहू किमूरू पादा उच्येते ॥१०॥
ब्राह्मणोऽस्य मुखमासीद्बाहू राजन्यः कृतः । ऊरू तदस्य यद्वैश्यः पद्भ्याᳪशूद्रो अजायत ॥ ११ ॥
चन्द्रमा मनसो जातश्चक्षोः सूर्यो अजायत । श्रोत्राद्वायुश्च प्राणश्च मुखादग्निरजायत ॥ १२ ॥

नाभ्या आसीदन्तरिक्षᳪशीर्ष्णो द्यौः समवर्तत ।
पद्भ्यां भूमिर्दिशः श्रोत्रात्तथा लोकाँ२ अकल्पयन् ॥ १३ ॥

यत्पुरुषेण हविषा देवा यज्ञमतन्वत । वसन्तोऽस्यासीदाज्यं ग्रीष्म इध्मः शरद्धविः ॥ १४ ॥
सप्तास्यासन् परिधयस्त्रिः सप्त समिधः कृताः । देवा यद्यज्ञं तन्वाना अबध्नन् पुरुषं पशुम् ॥१५॥

Tasmādyajñat sarvahuta ṛcaḥ sāmāni jajñire.
Chandāṁsi jajñire tasmād yajustasmādajāyata (i). //7//

Tasmādaśvā ajāyanta ye ke cobhayādataḥ.
Gāvo ha jajñire tasmāt tasmājjāta ajāvayaḥ (i). //8//

Taṁ yajñaṁ barhiṣi praukṣan puruṣaṁ jātamagrataḥ.
Tena devā ayajanta sādhyā ṛṣayaśca ye (i). //9//

Yatpuruṣaṁ vyadadhuḥ katidhā vyakalpayan. Mukhaṁ kimasyāsīt kiṁ bāhū kimūrū pādā ucyete (i). //10//

Brāhmaṇo' sya mukhamāsīd bāhū rājanyaḥ kṛtaḥ.
Ūrū tadasya yadvaiśyaḥ padbhyāṁ śūdro ajāyata (i). //11//

Candramā manaso jātaścakṣoḥ sūryo ajāyata.
Śrotrādvāyuśca prāṇaśca mukhādagnirajāyata (i). //12//

Nābhyā āsīdantarikṣaṁ śīrṣṇo dyauḥ samavartata.
Padbhyāṁ bhūmirdiśaḥ śrotrāt tatha lokāñ akalpayan (i). //13//

Yatpuruṣeṇa haviṣā devā yajñamatanvata. Vasanto'syāsīdājyaṁ grīṣma idhmaḥ śaraddhaviḥ (i). //14//

Saptāsyāsan paridhayastriḥ sapta samidhaḥ kṛtāḥ. Devā yadyajñaṁ tanvānā abadhnan puruṣaṁ paśum (i). //15//

7. From that cosmic sacrifice in which everything has been offered as oblations, the Ṛks (verses) and the Sāmans (songs) are born. The Chandas (metres) of the Atharva, and the Yajuḥs are also born from that sacrifice. (1)

8. From that Cosmic sacrifice horses are born, and all other cattle having two rows of teeth. Cows are born out of it and so are goats and sheep. (1)

9. The Cosmic Man, who is born earliest of all, is placed on the cosmic sacrificial altar and is anointed; with Him the enlightened ones, the realized ones, and the sages perform sacrifice. (1)

10. The Man (the mankind) they create, in what portions do they figurize it? Which are His mouth, which the two arms, which the two thighs and which are said to be His feet? (1)

11. The Brāhmaṇa (the intellectual) is His mouth; the Kṣatriya (Rājanya or administrator) is His two arms; what is the Vaiśya (producer of wealth) is His thighs and the Śudra (labourer) is born of His two feet. (1)

12. The moon is created from His mind, and the sun is born from His eye. The wind and the life-breath are born from His ear and the fire from His mouth. (1)

13. The mid-space is created from His navel and the sky from His head; the earth from His feet; various quarters from His ear and in this way all these worlds are formed. (1)

14. In the cosmic sacrifice arranged by the Nature's bounties with the Cosmic Man as an oblation, Spring is the melted butter, Summer the fire-wood and Autumn is the offering. (1)

15. Seven are the enclosing pillars and thrice-seven the pieces of fire-wood, when the enlightened ones preparing for the sacrifice, tie up the Cosmic Man as an offering. (1)

यज्ञेन यज्ञमयजन्त देवास्तानि धर्माणि प्रथमान्यासन् ।
ते ह नाकं महिमानः सचन्त यत्र पूर्वे साध्याः सन्ति देवाः ॥ १६ ॥

अद्भ्यः सम्भृतः पृथिव्यै रसाच्च विश्वकर्मणः समवर्तताग्रे ।
तस्य त्वष्टा विदधद्रूपमेति तन्मर्त्यस्य देवत्वमाजानमग्रे ॥ १७ ॥

वेदाहमेतं पुरुषं महान्तमादित्यवर्णं तमसः परस्तात् ।
तमेव विदित्वाति मृत्युमेति नान्यः पन्था विद्यतेऽयनाय ॥ १८ ॥

प्रजापतिश्चरति गर्भे अन्तरजायमानो बहुधा वि जायते ।
तस्य योनिं परि पश्यन्ति धीरास्तस्मिन् ह तस्थुर्भुवनानि विश्वा ॥ १९ ॥

यो देवेभ्य आतपति यो देवानां पुरोहितः । पूर्वो यो देवेभ्यो जातो नमो रुचाय ब्राह्मये ॥२०॥

रुचं ब्राह्मं जनयन्तो देवा अग्रे तदब्रुवन् । यस्त्वैवं ब्राह्मणो विद्यात्तस्य देवा असन् वशे ॥२१॥

श्रीश्च ते लक्ष्मीश्च पत्न्यावहोरात्रे पार्श्वे नक्षत्राणि रूपमश्विनौ व्यात्तम् ।
इष्णन्निषाणामुं म इषाण सर्वलोकं म इषाण ॥ २२ ॥

Yajñena yajñamayajanta devāstāni dharmāṇi prathamānyāsan. Te ha nākaṁ mahimānaḥ sacanta yatra pūrve sādhyāḥ santi devāḥ (i). //16//

Adbhyaḥ sambhṛtaḥ pṛthivyai rasācca viśvakarmaṇaḥ samavartatāgre. Tasya tvaṣṭā vidadhadrūpameti tanmartyasya devatvamājānamagre (i). //17//

Vedāhametaṁ puruṣaṁ mahāntam ādityavarṇaṁ tamasaḥ parastāt. Tameva viditvāti mṛtyumeti nānyaḥ panthā vidya-te'yanāya (i). //18//

Prajāpatiścarati garbhe antarajāyamāno bahudhā vi jāyate. Tasya yoniṁ pari paśyanti dhīrāstasmin ha tasthurbhuvanāni viśvā (i). //19//

Yo devabhya ātapati yo devānāṁ purohitaḥ.
Pūrvo yo devebhyo jāto namo rucāya brāhmaye (i). //20//

Rucaṁ brāhmaṁ janayanto devā agre tadabruvan.
Yastvaivaṁ brāhmaṇo vidyāt tasya devā asan vaśe (i). //21//

Śrīśca te lakṣmīśca patnyāvahorātre pārśve nakṣatrāṇi rūpamaśvinau vyāttam.
Iṣṇanniṣāṇāmuṁ ma iṣāṇa sarvalokaṁ ma iṣāṇa (i). //22//

16. Enlightened ones worshipped the Supreme Lord with the sacrifice. These have been the earliest ordinances. They, the great ones, thus attain heaven, where the earlier realized ones dwell in their resplendence. (1)

17. He existed prior to waters, the earth, the saps and the sun in His fullness. The Supreme Architect comes outlining His features. Thus the godhood of the mortal one has been known for the first time. (1)

18. I have perceived this mighty Cosmic Man, with sunlike lustre and far beyond darkness. Only by knowing Him, one can overcome death. There is no other way for the final reach. (1)

19. Into the womb moves the Lord of creation. Though not born, He is born in sundry forms. Only the discerning sages see the source of His birth. All these worlds lie in Him only. (1)

20. We bow in reverence to the godly glare, that burns bright for gods, that is the foremost among gods, and is born long before gods. (1)

21. Begetting that godly glare, the gods say unto Him : "The gods would be under control of the devotee that knows you thus." (1)

22. Beauty and Wealth are your two wives; days and nights are your two sides; constellations are your form; heaven and earth are your gape. Animating all this, give it to me; give all these regions to me. (1)

अथ द्वात्रिंशोऽध्यायः ।

तदेवाग्निस्तदादित्यस्तद्वायुस्तदु चन्द्रमाः । तदेव शुक्रं तद्ब्रह्म ता आपः स प्रजापतिः ॥ १ ॥

सर्वे निमेषा जज्ञिरे विद्युतः पुरुषादधि । नैनमूर्ध्वं न तिर्यञ्चं न मध्ये परि जग्रभत् ॥ २ ॥

न तस्य प्रतिमा अस्ति यस्य नाम महद्यशः ।
हिरण्यगर्भ इत्येष मा मा हिंसीदित्येषा यस्मान्न जात इत्येषः ॥ ३ ॥

एषो ह देवः प्रदिशोऽनु सर्वाः पूर्वो ह जातः स उ गर्भे अन्तः ।
स एव जातः स जनिष्यमाणः प्रत्यङ् जनास्तिष्ठति सर्वतोमुखः ॥ ४ ॥

यस्माज्जातं न पुरा किं चनैव य आबभूव भुवनानि विश्वा ।
प्रजापतिः प्रजया संरराणस्त्रीणि ज्योतींषि सचते स षोडशी ॥ ५ ॥

ATHA DVĀTRIṀŚO' DHYĀYAḤ

Tadevāgnistadādityastadvāyustadū candramāḥ. Tadeva śukraṁ tadbrahma tā āpaḥ sa prajāpatiḥ (i). //1//

Sarve nimeṣā jajñire vidyutaḥ puruṣādadhi. Nainamūrdhvaṁ na tiryañcaṁ na madhye pari jagrabhat (i). //2//

Na tasya pratimā asti yasya nāma mahadyaśaḥ.
Hiraṇyagarbha ityeṣa mā mā hiṁsīdityeṣā yasmānna jāta ityeṣaḥ (i). //3//

Eṣo ha devaḥ pradiśo'nu sarvāḥ pūrvo ha jātaḥ sa u garbhe antaḥ.
Sa eva jātaḥ sa janiṣyamāṇaḥ pratyaṅ janāstiṣṭhati sarvatomukhaḥ (i). //4//

Yasmājjātaṁ na purā kiṁ canaiva ya ābabhūva bhuvanāni viśvā.
Prajāpatiḥ prajayā saṁrarāṇastrīṇi jyotīṁṣi sacate sa ṣoḍaśī (i). //5//

CHAPTER THIRTY-TWO

1. He Himself is the adorable (and hence known as Agni); He is the Lord Infinite and without parts (Āditya); He is pervading and vital (Vāyu) as well as the blissful delight (Candramas). He is the bright, the primeval seed (Śukram). He is the Lord supreme (Brahma). He is the permeating one (Āpaḥ) and the Lord of the creation (Prajāpati) is He. (1)

2. All the time factors have sprung from that blazing Cosmic Man. No one comprehends Him existing above, below, or in the middle. (1)

3. There is no image to compare with Him, who is the greatest glory and who is mentioned in the Vedic verses beginning with Hiraṇyagarbhaḥ (XXV. 10), and Mā mā hiṁsīt (XII. 102) and Yasmānna jātaḥ (VIII. 36). (1)

4. Surely this very Lord pervades all the regions. He was born before all, yet He is in the womb still. He is what has been born; also He is what shall be born hereafter. Having faces all around, He stands facing each and every person. (1)

5. Prior to whom nothing whatsoever is born and who is manifest in all the worlds; that Creator, having sixteen refinements (i.e. perfect in every respect), takes pleasure in His offerings and bears three lights. (1)

येन द्यौरुग्रा पृथिवी च दृढा येन स्व स्तभितं येन नाकः ।
यो अन्तरिक्षे रजसो विमानः कस्मै देवाय हविषा विधेम ॥ ६ ॥

यं क्रन्दसी अवसा तस्तभाने अभ्यैक्षेतां मनसा रेजमाने ।
यत्राधि सूर उदितो विभाति कस्मै देवाय हविषा विधेम ।
आपो ह यद्बृहती—र्यश्चिदापः + ॥ ७ ॥

वेनस्तत्पश्यन्निहितं गुहा सद्यत्र विश्वं भवत्येकनीडम् ।
तस्मिन्निदꣳ सं च वि चैति सर्वꣳ स ओतः प्रोतश्च विभूः प्रजासु ॥ ८ ॥

प्र तद्वोचेदमृतं नु विद्वान् गन्धर्वो धाम विभृतं गुहा सत् ।
त्रीणि पदानि निहिता गुहास्य यस्तानि वेद स पितुः पिताऽसत् ॥ ९ ॥

स नो बन्धुर्जनिता स विधाता धामानि वेद भुवनानि विश्वा ।
यत्र देवा अमृतमानशानास्तृतीये धामन्नध्यैरयन्त ॥ १० ॥

Yena dyaurugrā pṛthivī ca dṛḍhā yena sva stabhitaṁ yena nākaḥ.
Yo antarikṣe rajaso vimānaḥ kasmai devāya haviṣā vidhema (i). //6//

Yaṁ krandasī avasā tastabhāne abhyaikṣetāṁ manasā rejamāne. Yatrādhi sūra udito vibhāti kasmai devāya haviṣā vidhema. Āpo ha yadbṛhatīryaścidāpaḥ (i). //7//

Venastatpaśyannihitaṁ guhā sadyatra viśvaṁ bhavatyekanīḍam.
Tasminnidaṁ saṁ ca vi caiti sarvaṁ sa otaḥ protaśca vibhūḥ prajāsu (i). //8//

Pra tadvocedamṛtaṁ nu vidvān gandharvo dhāma vibhṛtaṁ guhā sat. Trīṇi padāni nihitā guhāsya yastāni veda sa pituḥ pitā'sat (i). //9//

Sa no bandhurjanitā sa vidhātā dhāmāni veda bhuvanāni viśvā.
Yatra devā amṛtamānaśānāstṛtīye dhāmannadhyairayanta (i) //10//

6. He who makes the sky blazing and the earth steady; who supports the realm of light and the heaven; and who is the measurer of the regions in the mid-space; to that Lord we offer our oblations. (1)

7. Whom heaven and earth, being supported with rain and food, look at with a thrilling heart, and in whom the rising sun shines; that Lord, we adore with our oblations. The verses beginning with Āpo ha yad bṛhatī (Yv. XXVII. 25) and Yaśchidāpaḥ (Yv. XXVII.26) also mention Him. (1)

8. The wise beholds Him, as if placed in a secret cave, in whom all this world finds a common nest. All this unites in Him and springs forth from Him. That omnipresent Lord is woven like warp and woof in all the creatures. (1)

9. Let the enlightened scholar, who knows, discourse in detail about the Immortal one, who is, as if in a secret cave, divided in different forms. Three of His feet are hidden in the cave. He, who knows them, is the father's father. (1)

10. He is our brother, father and our creator. He knows all the places and all the worlds, where the enlightened ones reside in the third abode (heaven) enjoying immortality. (1)

परीत्य भूतानि परीत्य लोकान् परीत्य सर्वाः प्रदिशो दिशश्च ।
उपस्थाय प्रथमजामृतस्यात्मनाऽऽत्मानमभि सं विवेश ॥ ११ ॥
परि द्यावापृथिवी सद्य इत्वा परि लोकान् परि दिशः परि स्वः ।
ऋतस्य तन्तुं विततं विचृत्य तदपश्यत्तदभवत्तदासीत् ॥ १२ ॥
सदसस्पतिमद्भुतं प्रियमिन्द्रस्य काम्यम् । सनिं मेधामयासिषꣳ स्वाहा ॥ १३ ॥
यां मेधां देवगणाः पितरश्चोपासते । तया मामद्य मेधयाऽग्ने मेधाविनं कुरु स्वाहा ॥ १४ ॥
मेधां मे वरुणो ददातु मेधामग्निः प्रजापतिः ।
मेधामिन्द्रश्च वायुश्च मेधां धाता ददातु मे स्वाहा ॥ १५ ॥
इदं मे ब्रह्म च क्षत्रं चोभे श्रियमश्नुताम् ।
मयि देवा दधतु श्रियमुत्तमां तस्यै ते स्वाहा ॥ १६ ॥

Parītya bhūtāni parītya lokān parītya sarvāḥ pradiśo diśaśca.
Upasthāya prathamajāmṛtasyātmanā" tmānamabhi saṁ viveśa (i). //11//

Pari dyāvāpṛthivī sadya itvā pari lokān pari diśaḥ pari svaḥ.
Ṛtasya tantuṁ vitataṁ vicṛtya tadapaśyat tadabhavat tadāsīt (i). //12//

Sadasaspatimadbhutaṁ priyamindrasya kāmyam. Saniṁ medhāmayāsiṣaṁ svāhā (i). //13//

Yāṁ medhāṁ devagaṇāḥ pitaraścopāsate. Tayā māmadya medhayā' gnẹ medhāvinaṁ kuru svāhā (i). //14//

Medhāṁ me varuṇo dadātu medhāmagniḥ prajāpatiḥ.
Medhāmindraśca vāyuśca medhāṁ dhātā dadātu me svāhā (i). //15//

Idaṁ me brahma ca kṣatraṁ cobhe śriyamaśnutām.
Mayi devā dadhatu śriyamuttamāṁ tasyai te svāhā (i). //16//

11. Having pervaded all the creatures, encompassing all the worlds, all the quarters and mid-quarters, and approaching the first daughter of Eternity, He entered directly by His self in Himself. (1)

12. Quickly going around the earth and heaven, around the worlds, around the quarters and around the realm of light, and having woven the well-spread threads of truth, He sees it, becomes it, and still is it. (1)

13. I beg to the Lord of sacrifice, that He may bestow on me the wealth of wisdom, which is dear to the resplendent Lord and is worth desiring. (1)

14. O adorable Lord, make me wise today by bestowing upon me that wisdom, which the learned and elders so keenly desire. Svāhā. (1)

15. May the Lord of justice bestow wisdom on me; may the adorable Lord and the Lord of all creatures bless me with the wisdom; may the resplendent Lord and the Creator grant me wisdom. Svāhā. (1)

16. May this intellect and this valour of mine, both achieve glory. May the enlightened ones bestow finest glory on me. To you O glory, hail. (1)

अथ त्रयस्त्रिंशोऽध्यायः ।

अस्याजरासो दमामरित्रा अर्चद्धूमासो अग्नयः पावकाः ।
श्वितीचयः श्वात्रासो भुरण्यवो वनर्षदो वायवो न सोमाः ॥ १ ॥

हरयो धूमकेतवो वातजूता उप द्यवि । यतन्ते वृथगग्नयः ॥ २ ॥

यजा नो मित्रावरुणा यजा देवाँ२ ऋतं बृहत् । अग्ने यक्षि स्वं दमम् ॥ ३ ॥

युक्ष्वा हि देवहूतमाँ२ अश्वाँ२ अग्ने रथीरिव । नि होता पूर्व्यः सदः ॥ ४ ॥

द्वे विरूपे चरतः स्वर्थे अन्याऽन्या वत्समुप धापयेते ।
हरिरन्यस्यां भवति स्वधावाञ्छुक्रो अन्यस्यां ददृशे सुवर्चाः ॥ ५ ॥

अयमिह प्रथमो धायि धातृभिर्होता यजिष्ठो अध्वरेष्वीड्यः ।
यमप्नवानो भृगवो विरुरुचुर्वनेषु चित्रं विभ्वं विशे-विशे ॥ ६ ॥

ATHA TRAYASTRIṀŚO' DHYĀYAḤ

Asyājarāso damāmaritrā arcaddhūmāso agnayaḥ pāvakāḥ.
Śvitīcayaḥ śvātrāso bhuraṇyavo vanarṣado vāyavo na somāḥ (i). //1//

Harayo dhūmaketavo vātajūtā upa dyavi. Yatante vṛthagagnayaḥ (i). //2//

Yajā no mitrāvaruṇā yajā devāṅ ṛtaṁ bṛhat. Agne yakṣi svaṁ damam (i). //3//

Yukṣvā hi devahūtamāṅ aśvāṅ agne rathīriva. Ni hotā pūrvyaḥ sadaḥ (i). //4//

Dve virūpe carataḥ svarthe anyā'nyā vatsamupa dhāpayete.
Hariranyasyāṁ bhavati svadhāvāñchukro anyasyāṁ dadṛśe suvarcāḥ (i). //5//

Ayamiha prathamo dhāyi dhātṛbhirhotā yajiṣṭho adhvareṣvīḍyaḥ.
Yamapnavāno bhṛgavo virurucurvaneṣu citraṁ vibhvaṁ viśe viśe (i). //6//

CHAPTER THIRTY-THREE

1. May this sacrificer's fires, never-exhausting, with sweet-smelling smoke, purifier, whitening, quick-acting, sustainers, seated in woods, and pleasing like divine elixirs, be protectors of homes. (1)

2. Your consuming fire flames, urged by the wind, bannered with the smoke, rise and go aloft diversely to heaven. (1)

3. O foremost fire-divine, may we worship you as the source of light and source of bliss and other divine virtues, and perform the sacred rites in your own house. (1)

4. O fire divine, like a charioteer, yoke your coursers, who are best invokers of the bounties of Nature. Be seated in this sacrifice as the ancient sacrificer. (1)

5. Two, opposed in their nature, are seen here working towards their respective goals. Both of them have one child each. One has golden sun, the self-sustained. The other has the brilliant and shining. (Sun is the child of the dawn and moon is the child of the night). (1)

6. This invoker of Nature's bounties, adored in worship, has been assigned a foremost place by the performers of noble deeds. This is the cosmic fire, marvellous in action, and sovereign over all, whom the wise sages and their descendants harness for domestic purposes and for the benefit of mankind. (1)

त्रीणि शता त्री सहस्राण्यग्निं त्रिꣳशच्च देवा नव चासपर्यन्।
औक्षन् घृतैरस्तृणन् बर्हिरस्मा आदिद्धोतारं न्यसादयन्त ॥ ७ ॥

मूर्धानं दिवो अरतिं पृथिव्या वैश्वानरमृत आ जातमग्निम्।
कविꣳ सम्राजमतिथिं जनानामासन्ना पात्रं जनयन्त देवाः ॥ ८ ॥

अग्निर्वृत्राणि जङ्घनद्द्रविणस्युर्विपन्यया। समिद्धः शुक्र आहुतः ॥ ९ ॥

विश्वेभिः सोम्यं मध्वग्न इन्द्रेण वायुना। पिबा मित्रस्य धामभिः ॥ १० ॥

आ यदिषे नृपतिं तेज आनट् शुचि रेतो निषिक्तं द्यौरभीके।
अग्निः शर्धमनवद्यं युवानꣳ स्वाध्यं जनयत् सूदयच्च ॥ ११ ॥

अग्ने शर्ध महते सौभगाय तव द्युम्नान्युत्तमानि सन्तु।
सं जास्पत्यꣳ सुयममा कृणुष्व शत्रूयतामभि तिष्ठा महाꣳसि ॥ १२ ॥

Trīṇi śatā trī sahasrāṇyagniṁ triṁśacca devā nava cāsaparyan.
Aukṣan ghṛtairastṛṇan barhirasmā ādiddhotāraṁ nyasādayanta (i). //7//

Mūrdhānaṁ divo aratim pṛthivyā vaiśvānaramṛta ā jātamagnim.
Kaviṁ samrājamatithiṁ janānāmāsannā pātraṁ janayanta devāḥ (i). //8//

Agnirvṛtrāṇi jaṅghanad draviṇasyurvipanyayā.
Samiddhaḥ śukra āhutaḥ (i). //9//

Viśvebhiḥ somyaṁ madhvagna indreṇa vāyunā. Pibā mitrasya dhāmabhiḥ (i). //10//

Ā yadiṣe nṛpatiṁ teja ānaṭ śuci reto niṣiktaṁ dyaurabhīke.
Agniḥ śardhamanavadyaṁ yuvānāṁ svādhyaṁ janayat sūdayacca (i). //11//

Agne śardha mahate saubhagāya tava dyumnānyuttamāni santu.
Saṁ jāspatyaṁ suyamamā kṛṇuṣva śatrūyatāmabhi tiṣṭhā mahāṁsi (i). //12//

7. Three thousand, three hundred and thirty-nine, i.e. countless enlightened ones pay homage to the fire divine. They profusely present loving devotion to Him and enshrine Him in their worshipful hearts and make Him their invoking priest. (1)

8. Divine forces of cosmos manifest the universal leader, the protective fire divine, who is a messenger of earthly beings and symbol of heavenly luminaries. He, an offspring of eternal order, is wise, sovereign, a guest dear to men and eternally existing. (1)

9. May radiant, adorable Lord, glorified by virtuous actions of devotees, propitiated by praise, and served with dedication, destroy all adversaries. (1)

10. O fire divine, may you enjoy the sweet devotional elixir in company of the lightning, wind and all other Nature's bounties from the sun's quarters. (1)

11. When pure, radiant light emerges out of the supreme fire, then from the heaven descends the limpid moisture. The fire-divine urges strong, blameless and ever-young clouds to assist in the production of food. (1)

12. May you suppress, O fire divine, our foes to ensure our great prosperity. May your effulgent splendour be excellent. May you preserve in concord the relation of man and wife, and may you overpower the energies of our adversaries. (1)

त्वाᳪ हि मन्द्रतममर्कशोकैर्ववृमहे महि नः श्रोष्यग्ने ।
इन्द्रं न त्वा शवसा देवता वायुं पृणन्ति राधसा नृतमाः ॥ १३ ॥

त्वे अग्ने स्वाहुत प्रियासः सन्तु सूरयः ।
यन्तारो ये मघवानो जनानामूर्वान् दयन्त गोनाम् ॥ १४ ॥

श्रुधि श्रुत्कर्ण वह्निभिर्देवैरग्ने सयावभिः ।
आ सीदन्तु बर्हिषि मित्रो अर्यमा प्रातर्यावाणो अध्वरम् ॥ १५ ॥

विश्वेषामदितिर्यज्ञियानां विश्वेषामतिथिर्मानुषाणाम् ।
अग्निर्देवानामव आवृणानः सुमृडीको भवतु जातवेदाः ॥ १६ ॥

महो अग्नेः समिधानस्य शर्मण्यनागा मित्रे वरुणे स्वस्तये ।
श्रेष्ठे स्याम सवितुः सवीमनि तद्देवानामवो अद्या वृणीमहे ॥ १७ ॥

Tvāṁ hi mandratamamarkaśokairvavṛmahe mahi naḥ śroṣyagne.
Indraṁ na tvā śavasā devatā vāyuṁ pṛṇanti rādhasā nṛtamāḥ (i). //13//

Tve agne svāhuta priyāsaḥ santu sūrayaḥ.
Yantāro ye maghavāno janānāmūrvān dayanta gonām (i). //14//

Śrudhi śrutkarṇa vahnibhirdevairagne sayāvabhiḥ.
Ā sīdantu barhiṣi mitro aryamā prātaryāvāṇo adhvaram (i). //15//

Viśveṣāmaditiryajñiyānāṁ viśveṣāmatithirmānuṣāṇām.
Agnirdevānāmava āvṛṇānaḥ sumṛḍīko bhavatu jātavedāḥ (i). //16//

Maho agneḥ samidhānasya śarmaṇyanāgā mitre varuṇe svastaye.
Śreṣṭhe syāma savituḥ savīmani taddevānāmavo adyā vṛṇīmahe (i). //17//

13. We celebrate your glory which is most adorable, and deserves to be glorified by sacred praises; the leaders earnestly honour you with offerings. Your divine resplendence is manifest in lightning and your strength in wind. (1)

14. O adorable, piously invoked Lord, may those learned scholars be dear to you; may they, the distinguished persons, be also dear to you who are bounteous, opulent, and who generously give away their stalls of kine as gifts. (1)

15. O adorable God, may you with your divine ears, please listen to my prayers. Let Nature's bounties like the sun and the morning breeze, and other morning glories appear and gracefully participate in the sacred performance of worship. (1)

16. The universal fire divine is the mother of all those divine powers, to whom the worship is offered. May He be dear, like a guest to all men. Receiving the offered homage, may He, knower of all that is born, be gracious to us. (1)

17. Today we invoke that favour of the enlightened ones, with which we may gain the shelter of the great, brilliant adorable Lord, for bliss, and may we be far from sin against the Lord venerable and friendly. May we remain under the best subservience of the impeller Lord. (1)

आपश्चित्पिप्यु स्तर्यो न गावो नक्षन्नृतं जरितारस्त इन्द्र ।
याहि वायुर्न नियुतो नो अच्छा त्वं हि धीभिर्दयसे वि वाजान् ॥ १८ ॥
गाव उपावतावतं मही यज्ञस्य रप्सुदा । उभा कर्णा हिरण्यया ॥ १९ ॥
यदद्य सूर उदितेऽनागा मित्रो अर्यमा । सुवाति सविता भगः ॥ २० ॥
आ सुते सिञ्चत श्रियं रोदस्योरभिश्रियम् । रसा दधीत वृषभम् ॥ तं प्रत्नथा ऽयं वेनः ॥ २१ ॥
आतिष्ठन्तं परि विश्वे अभूषञ्छ्रियो वसानश्चरति स्वरोचिः ।
महत्तद्वृष्णो असुरस्य नामा विश्वरूपो अमृतानि तस्थौ ॥ २२ ॥
प्र वो महे मन्दमानायान्धसोऽर्चा विश्वानराय विश्वाभुवे ।
इन्द्रस्य यस्य सुमखं सहो महि श्रवो नृम्णं च रोदसी सपर्यतः ॥ २३ ॥

Āpaścitpipyu staryo na gāvo nakṣannṛtaṁ jaritārasta indra.
Yāhi vāyurna niyuto no acchā tvaṁ hi dhībhirdayase vi vājān (i). //18//

Gāva upāvatāvataṁ mahī yajñasya rapsudā. Ubhā karṇā hiraṇyayā (i). //19//

Yadadya sūra udite'nāgā mitro aryamā. Suvāti savitā bhagaḥ (i). //20//

Ā sute siñcata śriyaṁ rodasyorabhiśriyam. Rasā dadhīta vṛṣabham.
Taṁ pratnathā' yaṁ venaḥ (i). //21//

Ātiṣṭhantaṁ pari viśve abhūṣañchriyo vasānaścarati svarociḥ.
Mahattadvṛṣṇo asurasya nāmā viśvarūpo amṛtāni tasthau (i). //22//

Pra vo mahe mandamnayāndhaso'rcā viśvānarāya viśvābhuve.
Indrasya yasya sumakhaṁ saho mahi śravo nṛmṇaṁ ca rodasī saparyataḥ (i). //23//

18. O resplendent Lord, may the waters spread like sun-rays. May your worshippers possess water in abundance. May you come like the divine wind with the enormous speedy waves. Verily, you bestow upon us nourishment when propitiated by holy hymns. (1)

19. Draw near, O cows, to the cauldron, the two mighty ones—heaven and earth. The sacrificial fire has been fed plentifully and is fruit-giving; both the ears of the cauldron are golden. (1)

20. May the Lord of light, the destroyer of sins, and the Lord of cosmic order and the gracious Lord of creation bestow upon us, today at sun-rise what we pray for. (1)

21. Drop into the milked stream the admixture of sacred offering which reaches both the heaven and earth; supply the offering of the liquids (mixture of soma and milk) to the fire, the showerer of blessings. Taṁ pratnathā (Yv., VII. 12) and Ayaṁ venaḥ (Yv. VII. 16) are to be repeated here. (1)

22. They all adorn him, who is riding in his chariot of human form; self luminous, he travels clothed in splendour. Wonderful are the acts of this showerer of benefits, the influencer of universal conscience, who being omniform stays in the domain of immortality. (1)

23. Worship, O men, the great resplendent Lord, who is the joy-giving food, benefactor of all men, pervading all the universe and whose power of good actions, great fame and wealth is acknowledged by the heaven and earth as well. (1)

बृहन्निदिध्म एषां भूरि शस्तं पृथुः स्वरुः । येषामिन्द्रो युवा सखा ॥ २४ ॥

इन्द्रेहि मत्स्यन्धसो विश्वेभिः सोमपर्वभिः । महाँ२ अभिष्टिरोजसा ॥ २५ ॥

इन्द्रो वृत्रमवृणोच्छर्धनीतिः प्र मायिनाममिनाद्वर्पणीतिः ।
अहन् व्यंसमुशधग्वनेष्वाविर्धेना अकृणोद्राम्याणाम् ॥ २६ ॥

कुतस्त्वमिन्द्र माहिनः सन्नेको यासि सत्पते किं त इत्था ।
सं पृच्छसे समराणः शुभानैर्वोचेस्तन्नो हरिवो यत्ते अस्मे ।
महाँ२ इन्द्रो य ओजसा कदा चन स्तरीरसि कदा चन प्र युच्छसि+ ॥ २७ ॥

आ तत्त इन्द्रायवः पनन्ताभि य ऊर्वं गोमन्तं तितृत्सान् ।
सकृत्स्वं ये पुरुपुत्रां महीं सहस्रधारां बृहतीं दुदुक्षन् ॥ २८ ॥

Bṛhannididhma eṣām bhūri śastaṁ pṛthuḥ svaruḥ. Yeṣāmindro yuvā sakhā (i). //24//

Indrehi matsyandhaso viśvebhiḥ somaparvabhiḥ. Mahāñ abhiṣṭirojasā (i). //25//

Indro vṛtramavṛṇocchardhanītiḥ pra māyināmamināad varpaṇītiḥ.
Ahan vyaṁsamuśadhagvaneṣvāvirdhenā akṛṇodrāmyāṇāṁ (i). //26//

Kutastvamindra māhinaḥ sanneko yāsi satpate kiṁ ta itthā.
Saṁ pṛcchase samarāṇaḥ śubhānairvocestanno harivo yatte asme.
Mahāñ indro ya ojasā kadā cana starīrasi kadā cana pra yucchasi (i). //27//

Ā tatta indrāyavaḥ panantābhi ya ūrvaṁ gomantaṁ titṛtsān.
Sakṛtsvaṁ ye puruputrāṁ mahīṁ sahasradhārāṁ bṛhatīṁ duduksan (i). //28//

24. Ample is their fuel to burn, many their hymns to sing, and large their swords, in case their close friend is the ever-young resplendent Lord. (1)

25. Come to us, resplendent God, with all your grandeur and majesty, to guide the sincere seeker of truth in his pursuit and accept his homage with delight. (1)

26. The resplendent self, the inspirer of glorious deeds, destroys evils; resistless in combat, he overcomes deceivers who resolve to consume him. He completely annihilates the mutilated demoniac ideas lurking in the confused human brain and recovers the stolen wisdom to win over conflicts of life. (1)

27. Whither O mighty self, are you going alone? What has happened to you, O protector of the pious men? We speak to you, whilst accompanying you. O brilliant one, speak to us; O possessor of radiant thoughts, say to us in sweet voice all that which you have to say to us. Mahāṅ indro ya ojasā (Yv. VII. 40) Kadā cana starīrasi (VIII. 2) and Kadā cana prayucchasi (VIII.3) are to be repeated here. (1)

28. O resplendent Lord, those men praise you, who desire to press out divine elixir rich with milk, and who want to milk the vast earth that bears only once, that has lots of sons and is watered by a thousand streams. (1)

इमां ते धियं प्र भरे महो महीमस्य स्तोत्रे धिषणा यत्त आनजे ।
तमुत्सवे च प्रसवे च सासहिमिन्द्रं देवासः शवसामदन्ननु ॥ २९ ॥

विभ्राड् बृहत्पिबतु सोम्यं मध्वायुर्दधद्यज्ञपतावविहुतम् ।
वातजूतो यो अभिरक्षति त्मना प्रजाः पुपोष पुरुधा वि राजति ॥ ३० ॥

उदु त्यं जातवेदसं देवं वहन्ति केतवः । दृशे विश्वाय सूर्यम् ॥ ३१ ॥

येना पावक चक्षसा भुरण्यन्तं जनाँ२ अनु । त्वं वरुण पश्यसि ॥ ३२ ॥

दैव्यावध्वर्यू आ गतꣳ रथेन सूर्यत्वचा । मध्वा यज्ञꣳ समञ्जाथे ॥
तं प्रत्नथाऽयं वेनश्चित्रं देवानाम् ॥ ३३ ॥

आ न इडाभिर्विदथे सुशस्ति विश्वानरः सविता देव एतु ।
अपि यथा युवानो मत्सथा नो विश्वं जगदभिपित्वे मनीषा ॥ ३४ ॥

Imāṁ te dhiyaṁ pra bhare maho mahīmasya stotre dhiṣaṇā yatta ānaje.
Tamutsave ca prasave ca sāsahimindraṁ devāsaḥ śavasāmadannanu (i). //29//

Vibhrāḍ bṛhat pibatu somyaṁ madhvāyurdadhad yajñapatāvavihrutam.
Vātajūto yo abhirakṣati tmanā prajāḥ pupoṣa purudhā vi rājati (i). //30//

Udu tyaṁ jātavedasaṁ devaṁ vahanti ketavaḥ. Dṛśe viśvāya sūryam (i). //31//

Yenā pāvaka cakṣasā bhuraṇyantaṁ janāñ anu. Tvaṁ varuṇa paśyasi (i). //32//

Daivyāvadhvaryū ā gataṁ rathena sūryatvacā. Madhvā yajñaṁ samañjāthe.
Taṁ pratnathā' yaṁ venaścitraṁ devānām (i).//33//

Ā na iḍābhirvidathe suśasti viśvānaraḥ savitā deva etu.
Api yathā yuvāno matsathā no viśvaṁ jagadabhipitve manīṣā (i). //34//

29. For you, O mighty resplendent Lord, I compose and offer my excellent hymns; may I become worthy of your compassion through my sincere devotion to you. The enlightened devotees exhilarate the victorious Lord through the strength of their prayers to obtain riches and prosperity. (1)

30. May the great shining one drink this divine elixir sweetened with honey, bestowing unhindered long life on the sacrificer, and who speeded, as if, by the wind guards us, nourishes all the creatures with food and appears with elegance in various ways. (1)

31. The banners of glory speak high of God, who knows all that lives, so that all may look on Him. (1)

32. It is your divine light that purifies our soul, and keeps us away from evil thoughts and actions. (1)

33. O two priests of divinities (i.e. the two healers), may you come here riding a chariot shining as the sun. May you fill our sacrifice with sweetness of honey. The verses Taṁ pratnathā (Yv. VII. 12),Ayaṁ venaḥ (VII. 16), and Citraṁ devānām (VII. 42) are to be repeated here. (1)

34. May the divine sun, the benefactor of all men, come benignly to our cosmic sacrifice together with Nature's other divinities. May you, ever-young, gladden all our people by your participation. (1)

यदद्य कच्च वृत्रहन्नुदगा अभि सूर्य । सर्वं तदिन्द्र ते वशे ॥ ३५ ॥

तरणिर्विश्वदर्शतो ज्योतिष्कृदसि सूर्य । विश्वमा भासि रोचनम् ॥ ३६ ॥

तत्सूर्यस्य देवत्वं तन्महित्वं मध्या कर्तोर्विततꣳ सं जभार ।
यदेदयुक्त हरितः सधस्थादाद्रात्री वासस्तनुते सिमस्मै ॥ ३७ ॥

तन्मित्रस्य वरुणस्याभिचक्षे सूर्यो रूपं कृणुते द्योरुपस्थे ।
अनन्तमन्यद्रुशदस्य पाजः कृष्णमन्यद्धरितः सं भरन्ति ॥ ३८ ॥

बण्महाँ२ असि सूर्य बडादित्य महाँ२ असि ।
महस्ते सतो महिमा पनस्यतेऽद्धा देव महाँ२ असि ॥ ३९ ॥

बट् सूर्य श्रवसा महाँ२ असि सत्रा देव महाँ२ असि ।
मह्ना देवानामसुर्यः पुरोहितो विभु ज्योतिरदाभ्यम् ॥ ४० ॥

Yadadya kacca vṛtrahannudagā abhi sūrya. Sarvaṁ tadindra te vaśe (i). //35//

Taraṇirviśvadarśato jyotiṣkṛdasi sūrya. Viśvamābhāsi rocanam (i). //36//

Tatsūryasya devatvaṁ tanmahitvaṁ madhyā kartorvitataṁ saṁ jabhāra.
Yadedayukta haritaḥ sadhasthādādrātrī vāsastanute simasmai (i). //37//

Tanmitrasya varuṇasyābhicakṣe sūryo rūpaṁ kṛṇute dyorupasthe.
Anantamanyadruśadasya pājaḥ kṛṣṇamanyaddharitaḥ saṁbharanti (i). //38//

Baṇ mahān̆ asi sūrya baḍāditya mahān̆ asi.
Mahaste sato mahimā panasyate' ddhā deva mahān̆ asi (i). //39//

Baṭ sūrya śravasā mahān̆ asi satrā deva mahān̆ asi.
Mahnā devānāmasuryaḥ purohito vibhu jyotiradābhyam (i). //40//

35. Whatsoever, O sun, destroyer of darkness, you have risen upon today as ever, it is all under your control. (1)

36. O self-radiant God, you are the supreme light that outstrips all in speed, and it is your spiritual radiance that awakens each one of us, and shines through the entire firmament. (1)

37. Such is the divinity, such is the majesty of the radiant sun, that, when he sets, he withdraws into himself the diffused light (which has been shed upon the unfinished task). When he withdraws the beams from his aura of glory, as if unyoking the coursers from the chariot, the night extends the veiling darkness over all. (1)

38. In the middle of the heavens, the radiant sun displays his form to enable us to see properly the light and life. His rays extend brilliant power on the one hand, and on the other, bring on the darkness of the night. (1)

39. Verily, you are great, O radiant sun; verily you are great, O eternal, the greatness of the great one we adore. Verily you are great, O supreme God. (1)

40. Verily, O sun, you are great in fame; O divine, you are indeed mighty among the divine forces in might. You are destroyer of the wicked. You are the preceptor. Your glory is wide-spread and unconquerable. (1)

श्रायन्त इव सूर्यं विश्वेदिन्द्रस्य भक्षत ।
वसूनि जाते जनमान ओजसा प्रति भागं न दीधिम ॥ ४१ ॥

अद्या देवा उदिता सूर्यस्य निरंहसः पिपृता निरवद्यात् ।
तन्नो मित्रो वरुणो मामहन्तामदितिः सिन्धुः पृथिवी उत द्यौः ॥ ४२ ॥

आ कृष्णेन रजसा वर्तमानो निवेशयन्नमृतं मर्त्यं च ।
हिरण्ययेन सविता रथेना देवो याति भुवनानि पश्यन् ॥४३ ॥

प्र वावृजे सुप्रया बर्हिरेषामा विश्पतीव बीरिट इयाते ।
विशामक्तोरुषसः पूर्वहूतौ वायुः पूषा स्वस्तये नियुत्वान् ॥ ४४ ॥

इन्द्रवायू बृहस्पतिं मित्राग्निं पूषणं भगम् । आदित्यान् मारुतं गणम् ॥ ४५ ॥

वरुणः प्राविता भुवन्मित्रो विश्वाभिरूतिभिः । करतां नः सुराधसः ॥४६ ॥

अधि न इन्द्रैषां विष्णो सजात्यानाम् । इता मरुतो अश्विना ॥
तं प्रत्नथा ऽयं वेनो ये देवास आ न इडाभि—
र्विश्वेभिः सोम्यं मध्वो—मासश्चर्षणीधृतः+ ॥ ४७ ॥

Śrāyanta iva sūryaṁ viśvedindrasya bhakṣata.
Vasūni jāte janamāna ojasā prati bhāgaṁ na dīdhima (i). //41//

Adyā devā uditā sūryasya niraṁhasaḥ piprtā niravadyāt.
Tanno mitro varuṇo māmahantāmaditiḥ sindhuḥ pṛthivī uta dyauḥ (i). //42//

Ā kṛṣṇena rajasā vartamāno niveśayannamṛtaṁ martyaṁ ca. Hiraṇyayena savitā rathenā devo yāti bhuvanāni paśyan (i). //43//

Pra vāvṛje suprayā barhireṣāmā viśpatīva bīriṭa iyāte.
Viśāmaktoruṣasaḥ pūrvahūtau vāyuḥ pūṣā svastaye niyutvān (i). //44//

Indravāyū bṛhaspatiṁ mitrāgniṁ pūṣaṇaṁ bhagam.
Ādityān mārutaṁ gaṇam (i). //45//

Varuṇaḥ prāvitā bhuvanmitro viśvābhirūtibhiḥ. Karatāṁ naḥ surādhasaḥ (i). //46//

Adhi na indraiṣāṁ viṣṇo sajātyānām. Itā maruto aśvinā.
Taṁ pratnathā' yaṁ veno ye devāsa ā na iḍābhir-viśvebhiḥ somyaṁ madhvomāsaścarṣaṇīdhṛtaḥ (i). //47//

41. As the gathering solar rays proceed to the sun, so the vital principles turn back to the Lord of resplendence and by their power divide all His loftiest glories among those, who have been or will be born; may we meditate on our shares. (1)

42. O bounties of Nature, this day at the time of sun-rise may you make us free from sin and ill-repute. May the Lord friendly and venerable, and also the Eternity, the ocean, the earth and the heaven grant us this prayer of ours. (1)

43. The refulgent sun, springing through the obscure regions, arousing mortal and immortal, beholding the several worlds, comes as if mounted on a golden chariot. (1)

44. Preparation for food-bestowing sacred ceremony is complete. Of the two lords of people, one, the wind, with yoked horses, is pleasantly blowing, and the other, the nourisher sun, is about to appear. May we invoke them at the break of the dawn, upon the close of the night. Let the sun rise up now in the firmament for the welfare of mankind. (1)

45. We invoke you, the supreme source of intellect, with names such as resplendent, the source of vitality, supreme Lord, surveyor, adorable, nourisher, gracious, and the vital complex. (1)

46. May the venerable God protect us on all occasions; may the sun provide us with all defences; may both of them make us most opulent. (1)

47. Come to us, O Lord of lightning, the sun, the cloud-bearing winds and the twin-divines; we are kith and kin to you. Taṁ pratnathā (Yv. VII.12), Ayaṁ venaḥ (VII.16), Ye devāsaḥ (VII.19), Ā na iḍābhiḥ (XXXIII.34), Viśvebhiḥ somyaṁ madhu (XXXIII. 10) and Omāsaścarṣaṇīdhṛtaḥ (VII. 33) are to be repeated here. (1)

अग्न इन्द्र वरुण मित्र देवाः शर्धः प्र यन्त मारुतोत विष्णो ।
उभा नासत्या रुद्रो अध ग्नाः पूषा भगः सरस्वती जुषन्त ॥ ४८ ॥

इन्द्राग्नी मित्रावरुणादितिꣳ स्वः पृथिवीं द्यां मरुतः पर्वताँ२ अपः ।
हुवे विष्णुं पूषणं ब्रह्मणस्पतिं भगं नु शꣳसꣳ सवितारमूतये ॥ ४९ ॥

अस्मे रुद्रा मेहना पर्वतासो वृत्रहत्ये भरहूतौ सजोषाः ।
यः शꣳसते स्तुवते धायि पज्र इन्द्रज्येष्ठा अस्माँ२ अवन्तु देवाः ॥ ५० ॥

अर्वाञ्चो अद्या भवता यजत्रा आ वो हार्दि भयमानो व्ययेयम् ।
त्राध्वं नो देवा निजुरो वृकस्य त्राध्वं कर्तादवपदो यजत्राः ॥ ५१ ॥

विश्वे अद्य मरुतो विश्व ऊती विश्वे भवन्त्वग्नयः समिद्धाः ।
विश्वे नो देवा अवसा गमन्तु विश्वमस्तु द्रविणं वाजो अस्मे ॥ ५२ ॥

Agna indra varuṇa mitra devāḥ śardhaḥ pra yanta mārutota viṣṇo.
Ubhā nāsatyā rudro adha gnāḥ pūṣā bhagaḥ sarasvatī juṣanta (i). //48//

Indrāgnī mitrāvaruṇāditiṁ svaḥ pṛthivīṁ dyāṁ marutaḥ parvatān̐ apaḥ.
Huve viṣṇuṁ pūṣaṇaṁ brahmaṇaspatiṁ bhagaṁ nu śam̐-saṁ savitāramūtaye (i). //49//

Asme rudrā mehanā parvatāso vṛtrahatye bharahūtau sajoṣāḥ.
Yaḥ śam̐sate stuvate dhāyi pajra indrajyeṣṭhā asmān avantu devāḥ (i). //50//

Arvāñco adyā bhavatā yajatrā ā vo hārdi bhayamāno vyayeyam.
Trādhvaṁ no devā nijuro vṛkasya trādhvaṁ kartādavapado yajatrāḥ (i). //51//

Viśve adya maruto viśva ūtī viśve bhavantvgnayaḥ samiddhāḥ
Viśve no devā avasā gamantu viśvamastu draviṇaṁ vājo asme (i). //52//

48. May you the cosmic divine powers, such as the lightning, the vapours, the vital principles, the pervading ethereal element and the sun, confer strength upon us. May the twin divines (dawn and dusk), cosmic vitality, the speech, the nourishments, the gracious elements and the divine enlightenment be blessings to us. (1)

49. I invoke for protection the Nature's bounties like lightning and fire, light and plasma, the mother infinity, the heaven, the earth, the vital principles, the clouds, the waters, the air divine, the nourisher, as well as, above all, the supreme Lord of the universe, the Creator. (1)

50. May the cosmic forces of vitality and showering clouds come to us to rejoice in the battle-challenge of life, meant to destroy the devil of Nescience. We, the reciters and singers, invoke all Nature's bounties, along with the resplendent Lord at their head, to give us protection. (1)

51. O adorable illustrious ones, abide by me today, so that I cast off fear and gain your affectionate love. May you protect us from the rapacity of the wolf and the wicked. May you protect us from him, who works us misfortune. (1)

52. May today all the cloud-bearing winds come here with all their help. May the fires be kindled well. May all the bounties of Nature come here with their protection to us. May we gain all sorts of riches and power. (1)

विश्वे देवाः शृणुतेमꣳ हवं मे ये अन्तरिक्षे य उप द्यवि ष्ठ ।
ये अग्निजिह्वा उत वा यजत्रा आसद्यास्मिन्बर्हिषि मादयध्वम् ॥ ५३ ॥

देवेभ्यो हि प्रथमं यज्ञियेभ्योऽमृतत्वꣳ सुवसि भागमुत्तमम् ।
आदिद्दामानꣳ सवितर्व्यूर्णुषेऽनूचीना जीविता मानुषेभ्यः ॥ ५४ ॥

प्र वायुमच्छा बृहती मनीषा बृहद्रयिं विश्ववारꣳ रथप्राम् ।
द्युतद्यामा नियुतः पत्यमानः कविः कविमियक्षसि प्रयज्यो ॥ ५५ ॥

इन्द्रवायू इमे सुता उप प्रयोभिरा गतम् । इन्दवो वामुशन्ति हि ॥ ५६ ॥

मित्रꣳ हुवे पूतदक्षं वरुणं च रिशादसम् । धियं घृताचीꣳ साधन्ता ॥ ५७ ॥

दस्रा युवाकवः सुता नासत्या वृक्तबर्हिषः । आ यातꣳ रुद्रवर्त्तनी ॥
तं प्रत्नथा ऽयं वेनः × ॥ ५८ ॥

Viśve devāḥ śṛṇutemaṁ havaṁ me ye antarikṣe ya upa dyavi ṣṭha.
Ye agnijihvā uta vā yajatrā āsadyāsmin barhiṣi mādayadhvam (i). //53//

Devebhyo hi prathamaṁ yajñiyebhyo' mṛtatvaṁ suvasi bhāgamuttamam.
Ādiddāmānaṁ savitarvyūrṇuṣe'nūcīnā jīvitā mānuṣebhyaḥ. (i). //54//

Pra vāyumacchā bṛhatī manīṣā bṛhadrayiṁ viśvavāraṁ rathaprām.
Dyutadyāmā niyutaḥ patyamānaḥ kaviḥ kavimiyakṣasi prayajyo (i). //55//

Indravāyū ime sutā upa prayobhirāgatam. Indavo vāmuśanti hi (i). //56//

Mitraṁ huve pūtadakṣaṁ varuṇaṁ ca riśādasam. Dhiyaṁ ghṛtācīṁ sādhantā (i). //57//

Dasrā yuvākavaḥ sutā nāsatyā vṛktabarhiṣaḥ. Ā yātaṁ rudravarttanī.
Taṁ pratnathā' yaṁ venaḥ (i). //58//

53. O divine powers, hear this invocation, whether you inhabit the mid-region or the celestial. You receive oblations conveyed by the flame of fire divine. May you, seated in our hearts, rejoice. (1)

54. O Creator, you grant the best gift of immortality to the enlightened and dedicated men of the first category. To the liberal givers, you open the portals of light and to the common men, you award the continuous cycle of existence. (1)

55. May our earnest praise proceed to pay tribute to the Lord of vital wind, the possessor of vast riches, loved by all, filler of its chariot, and most wealthy. May this most adorable Lord of harnessed horses promptly show favour to His adorer. (1)

56. O resplendent Lord and the Lord of cosmic vitality, these devotions have been poured out. Come here with your fast-moving steeds. These devotions are yearning for you. (1)

57. I invoke the Lord, the source of light and bliss. He is the dispeller of evil forces. Verily, with His blessings, the worshippers will be bestowed with happiness and wisdom in life. (1)

58. O twins, you are dispeller of evils. You are a protection for us from untruth and you are the inspirer of our organs of actions and perceptions. May you come and dwell within for achieving fulfilment of all that is knowable, and enjoyable. Taṁ pratnathā (Yv. VII. 12) and Ayaṁ venaḥ (VII. 16) are to be repeated here. (1)

विदद्यदी सरमा रुग्णमद्रेर्महि पाथः पूर्व्यꣳ सध्र्यक्कः ।
अग्रं नयत्सुपद्यक्षराणामच्छा रवं प्रथमा जानती गात् ॥ ५९ ॥

नहि स्पशमविदन्नन्यमस्माद्वैश्वानरात्पुर एतारमग्नेः ।
एमेनमवृधन्नमृता अमर्त्यं वैश्वानरं क्षैत्रजित्याय देवाः ॥ ६० ॥

उग्रा विघनिना मृध इन्द्राग्नी हवामहे । ता नो मृडात ईदृशे ॥ ६१ ॥
उपास्मै गायता नरः पवमानायेन्दवे । अभि देवाँ२ इयक्षते ॥ ६२ ॥

ये त्वांऽहिहत्ये मघवन्नवर्धन्ये शाम्बरे हरिवो ये गविष्टौ ।
ये त्वा नूनमनुमदन्ति विप्राः पिबेन्द्र सोमꣳ सगणो मरुद्भिः ॥ ६३ ॥

जनिष्ठा उग्रः सहसे तुराय मन्द्र ओजिष्ठो बहुलाभिमानः ।
अवर्धन्निन्द्रं मरुतश्चिदत्र माता यद्वीरं दधनद्धनिष्ठा ॥ ६४ ॥

Vidadyadī saramā rugṇamadrermahi pāthaḥ pūrvyaṁ sadhryakkaḥ.
Agraṁ nayatsupadyakṣarāṇāmacchā ravaṁ prathamā jānatī gāt (i). //59//

Nahi spaśamavidannanyamasmād vaiśvānarāt pura etāramagneḥ.
Emenamavṛdhannamṛtā amartyaṁ vaiśvānaraṁ kṣaitrajityāya devāḥ (i). //60//

Ugrā vighaninā mṛdha indrāgnī havāmahe. Tā no mṛḍāta īdṛśe (i). //61//

Upāsmai gāyatā naraḥ pavamānāyendave. Abhi devāñ iyakṣate (i). //62//

Ye tvā' hihatye maghavannavardhan ye śāmbare harivo ye gaviṣṭau.
Ye tvā nūnamanumadanti viprāḥ pibendra somaṁ sagaṇo marudbhiḥ (i). //63//

Janiṣṭhā ugraḥ sahase turāya mandra ojiṣṭho bahulābhimānaḥ.
Avardhannindraṁ marutaścidatra mātā yadvīraṁ dadhanad dhaniṣṭhā (i). //64//

59. When the sanctified mind discovers the broken entrance of the mountain of dark forces, then the soul first makes a straight and broad path as previously promised. Then the sure-footed mind, recognizing as if by lowing, proceeds and comes close to the imperishable cows of spirituality. (1)

60. The enlightened ones do not find any herald other than this fire divine, benefactor of all men, who will come forward on every occasion. They, free from fear of death, strenghten this benefactor of all men, having no fear of death for the sake of winning the field. (1)

61. We invoke the fierce forces of lightning and fire of cosmos, the destroyers of adversaries; may they be kind to one like me. (1)

62. Sing, O leaders of ceremonies, to the glory of pure flowing drop of divine love. It is keen to offer worship to Nature's bounties. (1)

63. O bounteous resplendent self, may you, associated with those vital faculties, who assist you to subdue serpentine impulses and help you in the conflict with destructive elements and in the recovery of wisdoms, and who, possessed of wisdom, contribute verily to your exhilaration, accept our loving devotion. (1)

64. O aspirant, you are born aggressive for quick victorious valour, praiseworthy, mightiest and full of pride. Men strengthen you here, when the affluent mother bears the son in her womb. (1)

आ तू न इन्द्र वृत्रहन्नस्माकमर्धमा गहि । महान्महीभिरूतिभिः ॥६५॥
त्वमिन्द्र प्रतूर्तिष्वभि विश्वा असि स्पृधः ।
अशस्तिहा जनिता विश्वतूरसि त्वं तूर्य तरुष्यतः ॥ ६६ ॥
अनु ते शुष्मं तुरयन्तमीयतुः क्षोणी शिशुं न मातरा ।
विश्वास्ते स्पृधः श्नथयन्त मन्यवे वृत्रं यदिन्द्र तूर्वसि ॥ ६७ ॥
यज्ञो देवानां प्रत्येति सुम्नमादित्यासो भवता मृडयन्तः ।
आ वोऽर्वाची सुमतिर्ववृत्यादꣳहोश्चिद्या वरिवोवित्तरासत् ॥ ६८ ॥
अदब्धेभिः सवितः पायुभिष्ट्वꣳ शिवेभिरद्य परि पाहि नो गयम् ।
हिरण्यजिह्वः सुविताय नव्यसे रक्षा माकिर्नो अघशꣳस ईशत ॥ ६९ ॥
प्र वीरया शुचयो दद्रिरे वामध्वर्युभिर्मधुमन्तः सुतासः ।
वह वायो नियुतो याह्यच्छा पिबा सुतस्यान्धसो मदाय ॥ ७० ॥

Ā tū na indra vṛtrahannasmākamardhamā gahi. Mahān mahībhirūtibhiḥ (i). //65//

Tvamindra pratūrtiṣvabhi viśvā asi spṛdhaḥ.
Aśastihā janitā viśvatūrasi tvaṁ tūrya taruṣyataḥ (i). //66//

Anu te śuṣmaṁ turayantamīyatuḥ kṣoṇī śiśuṁ na mātarā.
Viśvāste spṛdhaḥ śnathayanta manyave vṛtraṁ yadindra tūrvasi (i). //67//

Yajño devānāṁ pratyeti sumnamādityāso bhavatā mṛḍayantaḥ.
Ā vo' rvācī sumatirvavṛtyadaṁhościdyā varivovittarāsat (i). //68//

Adabdhebhiḥ savitaḥ pāyubhiṣṭvaṁ śivebhiradya pari pāhi no gayam.
Hiraṇyajihvaḥ suvitāya navyase rakṣā mākirno aghaśaṁsa īśata (i). //69//

Pra vīrayā śucayo dadrire vāmadhvaryubhirmadhumantaḥ sutāsaḥ.
Vaha vāyo niyuto yāhyacchā pibā sutasyāndhaso madāya (i). //70//

65. O mighty resplendent Lord, dispeller of darkness, may you come to help us with mighty protections. (1)

66. O resplendent Lord, you are the subduer of all opposing elements in conflicts. You are the vanquisher of the wicked. You are the progenitor. You are the destroyer of all enemies. O opposer, you beat down the opponents. (1)

67. Heaven and earth follow your destructive forces as mothers their child; since you smite the demon of nescience, all the hostile hosts shrink and faint at your wrath, O resplendent. (1)

68. The sacrifice is pleasing to the enlightened ones. O suns, be bestowers of joy to us. Towards us, may your favour be inlcined. Be our best deliverers from the sin. (1)

69. May you, O Lord of illumination, provide our dwellings with uninjurable protections, and confer happiness. May you, O golden-tongued, be vigilant for our fresh prosperity; protect us; dare not any calumniator harm us. (1)

70. For you two the stems of the soma plant, cleansed and honey sweet, have been crushed and pressed by the priests. O vital wind, carry it. Come implored by us. Drink to your full satisfaction this pressed out elixir for nutritive exhilaration. (1)

गाव उपावतावतं मही यज्ञस्य रप्सुदा । उभा कर्णा हिरण्यया ॥ ७१ ॥

काव्ययोराजानेषु क्रत्वा दक्षस्य दुरोणे । रिशादसा सधस्थ आ ॥ ७२ ॥

दैव्यावध्वर्यू आ गतं रथेन सूर्यत्वचा । मध्वा यज्ञं समञ्जाथे ॥
तं प्रत्नथा ऽयं वेनः + ॥ ७३ ॥

तिरश्चीनो विततो रश्मिरेषामधः स्विदासी३दुपरि स्विदासी३त् ।
रेतोधा आसन्महिमान आसन्त्स्वधा अवस्तात्प्रयतिः परस्तात् ॥ ७४ ॥

आ रोदसी अपृणदा स्वर्महज्जातं यदेनमपसो अधारयन् ।
सो अध्वराय परि णीयते कविरत्यो न वाजसातये चनोहितः ॥ ७५ ॥

उक्थेभिर्वृत्रहन्तमा या मन्दाना चिदा गिरा । आङ्गूषैराविवासतः ॥ ७६ ॥

उप नः सूनवो गिरः शृण्वन्त्वमृतस्य ये । सुमृडीका भवन्तु नः ॥ ७७ ॥

Gāva' upāvatāvatam mahī yajñasya rapsudā. Ubhā karṇā hiraṇyayā (i). //71//

Kāvyayorājāneṣu kratvā dakṣasya duroṇe. Riśādasā sadhastha ā (i). //72//

Daivyāvadhvaryū ā gatam̐ rathena sūryatvacā. Madhvā yajñam̐ samañjāthe.
Tam̐ pratnathā' yam̐ venaḥ (i). //73//

Tiraścīno vitato raśmireṣāmadhaḥ svidāsīdupari svidāsīt. Retodhā āsan mahimāna āsantsvadhā avastāt prayatiḥ parastāt (i). //74//

Ā rodasī apṛṇadā svarmahajjātam̐ yadenamapaso adhārayan.
So adhvarāya pari ṇīyate kaviratyo na vājasātaye canohitaḥ (i). //75//

Ukthebhirvṛtrahantamā yā mandānā cidā girā. Āṅgūṣairāvivāsataḥ (i). //76//

Upa naḥ sūnavo giraḥ śṛṇvantvamṛtasya ye. Sumṛḍīkā bhavantu naḥ (i). //77//

71. Draw near, O cows, to the cauldron, the two mighty ones– the heaven and the earth. The sacrificial fire has been fed plentifully and is fruit-giving; both the ears of the cauldron are golden. (1)

72. May you two, O slayers of evil forces, come to the place of assembly, the birth place of the fame of two great poets. Enter this dwelling with keenness of intellect. (1)

73. O two priests of divinities (i.e. the two healers), may you come here riding a chariot shining as the sun. May you fill our sacrifice with sweetness of honey. The verses Taṁ pratnathā (Yv. VII.12), Ayaṁ venaḥ (VII.16) are to be repeated here. (1)

74. Transversely drawn is the line dividing the two (being and not being); it is below also; it is above as well. Begetters are there; mighty powers are there. The matter is here and the effort comes from far away. (1)

75. The fire divine fills heaven and earth and also the great realm of light, as soon as manifest. The wise men glorify him by their noble deeds. He, the giver of food, is led forth to the place of worship like a steed, so that he may grant us wealth and wisdom. (1)

76. Utter destroyers of nescience, with all joy, may you come hither, while you are being worshipped with prayers, hymns and songs. (1)

77. May all sons of the immortal Lord hear our words and be the source of happiness to us. (1)

ब्रह्माणि मे मतयः शꣳ सुतासः शुष्म इयर्ति प्रभृतो मे अद्रिः ।
आ शासते प्रति हर्यन्त्युक्थेमा हरी वहतस्ता नो अच्छ ॥ ७८ ॥

अनुत्तमा ते मघवन्नकिर्नु न त्वावाँ२ अस्ति देवता विदानः ।
न जायमानो नशते न जातो यानि करिष्या कृणुहि प्रवृद्ध ॥ ७९ ॥

तदिदास भुवनेषु ज्येष्ठं यतो जज्ञ उग्रस्त्वेषनृम्णः ।
सद्यो जज्ञानो नि रिणाति शत्रूननु यं विश्वे मदन्त्यूमाः ॥ ८० ॥

इमा उ त्वा पुरूवसो गिरो वर्धन्तु या मम ।
पावकवर्णाः शुचयो विपश्चितोऽभि स्तोमैरनूषत ॥ ८१ ॥

यस्यायं विश्व आर्यो दासः शेवधिपा अरिः ।
तिरश्चिदर्ये रुशमे पवीरवि तुभ्येत्सो अज्यते रयिः ॥ ८२ ॥

अयꣳ सहस्रमृषिभिः सहस्कृतः समुद्र इव पप्रथे ।
सत्यः सो अस्य महिमा गृणे शवो यज्ञेषु विप्रराज्ये ॥ ८३ ॥

Brahmāṇi me matayaḥ śaṁ sutāsaḥ śuṣma iyarti prabhṛto me adriḥ. Ā śāsate prati haryantyukthemā harī vahatastā no accha (i). //78//

Anuttamā te maghavannakirnu na tvāvāṅ asti devatā vidānaḥ. Na jāyamāno naśate na jāto yāni kariṣyā kṛṇuhi pravṛddha (i). //79//

Tadidāsa bhuvaneṣu jyeṣṭhaṁ yato jajña ugrastveṣa-nṛmṇaḥ.
Sadyo jajñāno ni riṇāti śatrūnanu yaṁ viśve madantyūmāḥ (i). //80//

Imā u tvā purūvaso giro vardhantu yā mama. Pāvakavarṇāḥ śucayo vipaścito' bhi stomairanūṣata (i). //81//

Yasyāyaṁ viśva āryo dāsaḥ śevadhipā ariḥ. Tiraścidarye ruśame pavīravi tubhyetso ajyate rayiḥ (i). //82//

Ayaṁ sahasramṛṣibhiḥ sahaskṛtaḥ samudra iva paprathe. Satyaḥ so asya mahimā gṛṇe śavo yajñeṣu viprarājye (i). //83//

78. May the sacred rites be mine; may the sacred songs be pleasing to me, and may the offering be delightful. May my adamantine will be hurled against evils. These hymns are for me and for my praise. May those twin forces, vital and mental, carry us towards our destination. (1)

79. O bounteous self, nothing done by you is unavailing. No nature's force could be as effective as you. No one that is to be born, nor any one that has been born, could surpass you in these deeds which you have achieved, O exceedingly mighty self. (1)

80. That is certainly the most supreme in all the worlds from which has sprung the formidable one, rich in brilliance. Soon after birth, he slays his enemies, and then all his supporters are filled with joy. (1)

81. O Lord of immense riches, may these songs of praise exalt you. The learned men, pure and brilliant like fire, offer hymns to you for you glorification. (1)

82. You (the bounteous and resplendent Lord) are that wealth personified, which is coveted by every generous master of riches, and even by the humblest miser. May that wealth be brought directly close to you, the energetic devotee. (1)

83. He, with His might augmented by sages and seers, attains thousandfold fame, which becomes vast as an ocean. His true magnanimity is glorified at the solemn ceremonies and at the places where pious persons are held in esteem. (1)

अदब्धेभिः सवितः पायुभिष्ट्वꣳ शिवेभिरद्य परि पाहि नो गयम्।
हिरण्यजिह्वः सुविताय नव्यसे रक्षा माकिर्नो अघशꣳस ईशत ॥ ८४ ॥

आ नो यज्ञं दिविस्पृशं वायो याहि सुमन्मभिः।
अन्तः पवित्र उपरि श्रीणानोऽयꣳ शुक्रो अयामि ते ॥ ८५ ॥

इन्द्रवायू सुसन्दृशा सुहवेह हवामहे।
यथा नः सर्व इज्जनोऽनमीवः सङ्गमे सुमना असत् ॥ ८६ ॥

ऋधगित्था स मर्त्यः शशमे देवतातये।
यो नूनं मित्रावरुणावभिष्टय आचक्रे हव्यदातये ॥ ८७ ॥

आ यातमुप भूषतं मध्वः पिबतमश्विना।
दुग्धं पयो वृषणा जेन्यावसू मा नो मर्धिष्टमा गतम् ॥ ८८ ॥

प्रैतु ब्रह्मणस्पतिः प्र देव्येतु सूनृता। अच्छा वीरं नर्यं पङ्क्तिराधसं देवा यज्ञं नयन्तु नः ॥ ८९ ॥

Adabdhebhiḥ savitaḥ pāyubhiṣṭvaṁ śivebhiradya pari pāhi no gayam.
Hiraṇyajihvaḥ suvitāya navyase rakṣā mākirno aghaśaṁsa īśata (i). //84//

Ā no yajñaṁ divispṛśaṁ vāyo yāhi sumanmabhiḥ.
Antaḥ pavitra upari śrīṇāno' yaṁ śukro ayāmi te (i).//85//

Indravāyū susandṛśā suhaveha havāmahe. Yathā naḥ sarva ijjano' namīvaḥ saṅgame sumanā asat (i). //86//

Ṛdhagitthā sa martyaḥ śaśame devatātaye. Yo nūnaṁ mitrāvaruṇāvabhiṣṭaya ācakre havyadātaye (i). //87//

Ā yātamupa bhūṣataṁ madhvaḥ pibatamaśvinā.
Dugdhaṁ payo vṛṣaṇā jenyāvasū mā no mardhiṣṭamā gatam (i). //88//

Praitu brahmaṇaspatiḥ pra devyetu sūnṛtā. Acchā vīraṁ naryaṁ paṅktirādhasaṁ devā yajñaṁ nayantu naḥ (i). //89//

84. May you, O Lord of illumination, provide our dwellings with uninjurable protections, and confer happiness. May you, O golden-tongued, be vigilant for our fresh prosperity; protect us; dare not any calumniator harm us. (1)

85. Come, O Lord of vitality, to our heaven-reaching prayer with its beautiful hymns of praise. This bright elixir of devotion has been kept aside and poured out for you through the purifying strainer. (1)

86. We invoke the Lord, resplendent and energetic, beautiful to see and easy to call, so that all of our men may be free from disease, and of concord in the assembly. (1)

87. The offerer of worship, who succeeds in invoking the Light and Bliss for the attainment of his desires, in fact consecrates the oblation for the cosmic sacrifice. (1)

88. Come, O twin divines, and grace us with your presence; drink of the sweet libation. May you, O showerers of blessings, rich in genuine wealth, come here. May you milk the rain from the firmament. May you come to us, but not for an injury. (1)

89. May the high Preceptor come to us. May brilliant divine virtues come to us. May Nature's bounties lead us to glory and drive away every adversary, and help us in the cause, beneficial to men, and measures leading to respectable prosperity. (1)

चन्द्रमा अप्स्वन्तरा सुपर्णो धावते दिवि ।
रयिं पिशङ्गं बहुलं पुरुस्पृहꣳ हरिरेति कनिक्रदत् ॥ ९० ॥
देवं देवं वोऽवसे देवं-देवमभिष्टये । देवं-देवꣳ हुवेम वाजसातये गृणन्तो देव्या धिया ॥ ९१ ॥
दिवि पृष्टो अरोचताग्निर्वैश्वानरो बृहन् ।
क्ष्मया वृधान ओजसा चनोहितो ज्योतिषा बाधते तमः ॥ ९२ ॥
इन्द्राग्नी अपादियं पूर्वागात् पद्वतीभ्यः ।
हित्वी शिरो जिह्वया वावदच्चरत् त्रिꣳशत्पदा न्यक्रमीत् ॥ ९३ ॥
देवासो हि ष्मा मनवे समन्यवो विश्वे साकꣳ सरातयः ।
ते नो अद्य ते अपरं तुचे तु नो भवन्तु वरिवोविदः ॥ ९४ ॥
अपाधमदभिशस्तीरशस्तिहाथेन्द्रो द्युम्न्याभवत् ।
देवास्त इन्द्र सख्याय येमिरे बृहद्भानो मरुद्गण ॥ ९५ ॥

Candramā apsvantara suparṇo dhāvate divi.
Rayiṁ piśaṅgaṁ bahulaṁ puruspṛhaṁ harireti kanikradat (i). //90//

Devaṁ devaṁ vo'vase devaṁ devamabhiṣṭaye. Devaṁ devaṁ huvema vājasātaye gṛṇanto devyā dhiyā (i).//91//

Divi pṛṣṭo arocatāgnirvaiśvānaro bṛhan.
Kṣmayā vṛdhāna ojasā canohito jyotiṣā bādhate tamaḥ (i). //92//

Indrāgnī apādiyaṁ pūrvāgāt padvatībhyaḥ.
Hitvī śiro jihvayā vāvadaccharat triṁśatpadā nyakramīt (i) //93//

Devāso hi ṣmā manave samanyavo viśve sākaṁ sarātayaḥ.
Te no adya te aparaṁ tuce tu no bhavantu varivovidaḥ (i). //94//

Apādhamadabhiśastīraśastihāthendro dyumnyābhavat.
Devāsta indra sakhyāya yemire bṛhadbhāno marudgaṇa (i). //95//

90. The moon runs in the waters of the midspace, and the sun with beauteous wings in the celestial region. The thundering resplendent self comes to the yellow-hued abundant riches desired by the multitude. (1)

91. We invoke every divine force for protection and for the fulfilment of our aspirations. We invoke and glorify with sacred hymns each and every divine force for the acquisition of food. (1)

92. The great fire seated in the sky, benefactor of all men, shines bright. The same fire, flourishing on earth, is beneficial for food-grains by its heat and it dispels darkness by its light. (1)

93. This dawn, O lightning and fire divine, though herself footless, comes before the footed sleepers, and stretching her head, she awakens people, who then utter sounds with their tongues, and passing onward, she traverses thirty steps. (1)

94. May the universal divine forces be together and with one accord grant gracious gifts to mortal men. May they increase our strength today and hereafter and be the bestowers of wealth upon us and upon our posterity. (1)

95. The Lord of resplendence, the destroyer of unbelievers, drives away the malevolent and becomes glorious. O radiant one of mighty splendour, lord of troops of vital forces, Nature's bounties are invoking you for your friendship. (1)

प्र व इन्द्राय बृहते मरुतो ब्रह्मार्चत । वृत्रꣳ हनति वृत्रहा शतक्रतुर्वज्रेण शतपर्वणा ॥ ९६ ॥
अस्येदिन्द्रो वावृधे वृष्ण्यꣳ शवो मदे सुतस्य विष्णवि ।
अद्या तमस्य महिमानमायवोऽनु ष्टुवन्ति पूर्वथा ।
इमा उ त्वा यस्यायमयꣳ सहस्रमूर्ध्व ऊ षु णः ॥९७ ॥

Pra va indrāya bṛhate maruto brahmārcata. Vṛtraṁ hanati vṛtrahā śatakraturvajreṇa śataparvaṇā (i). //96//

Asyedindro vāvṛdhe vṛṣṇyaṁ śavo made sutasya viṣṇavi.
Adyā tamasya mahimānamāyavo' nuṣṭuvanti pūrvathā.
Imā u tvā yasyāyamayaṁ sahasramūrdhva ū ṣu ṇaḥ (i).//97//

96. O priest, may you utter forth the hymn to your great Lord of resplendence. Let the performer of hundreds of selfless works, the slayer of shrouding Nescience, conquer the devil with the hundred-edged thunderbolt. (1)

97. The resplendent Lord augments the energy of devotees, when the exhilaration of divine love pours forth through His manifestations. Men sing forth praises to His majesty today as ever. Imā u tvā (Yv. XXXIII. 81), Yasyāyaṁ (XXXIII. 82), Ayaṁ sahasraṁ (XXXIII. 83), Ūrdhva ū ṣu ṇaḥ (XI. 42) are to be repeated here. (1)

अथ चतुस्त्रिंशोऽध्यायः ।

यज्जाग्रतो दूरमुदैति दैवं तदु सुप्तस्य तथैवैति ।
दूरङ्गमं ज्योतिषां ज्योतिरेकं तन्मे मनः शिवसङ्कल्पमस्तु ॥ १ ॥
येन कर्माण्यपसो मनीषिणो यज्ञे कृण्वन्ति विदथेषु धीराः ।
यदपूर्वं यक्षमन्तः प्रजानां तन्मे मनः शिवसङ्कल्पमस्तु ॥ २ ॥
यत्प्रज्ञानमुत चेतो धृतिश्च यज्ज्योतिरन्तरमृतं प्रजासु ।
यस्मान्न ऋते किं चन कर्म क्रियते तन्मे मनः शिवसङ्कल्पमस्तु ॥ ३ ॥
येनेदं भूतं भुवनं भविष्यत् परिगृहीतममृतेन सर्वम् ।
येन यज्ञस्तायते सप्तहोता तन्मे मनः शिवसङ्कल्पमस्तु ॥ ४ ॥
यस्मिन्नृचः साम यजूंषि यस्मिन् प्रतिष्ठिता रथनाभाविवाराः ।
यस्मिंश्चित्तं सर्वमोतं प्रजानां तन्मे मनः शिवसङ्कल्पमस्तु ॥ ५ ॥

ATHA CATUSTRIṀŚO' DHYĀYAḤ

Yajjāgrato dūramudaiti daivaṁ tadu suptasya tathaivaiti.
Dūraṅgamaṁ jyotiṣāṁ jyotirekaṁ tanme manaḥ śivasaṅkalpamastu (i). //1//

Yena karmāṇyapaso manīṣiṇo yajñe kṛṇvanti vidatheṣu dhīrāḥ.
Yadapūrvaṁ yakṣamantaḥ prajānāṁ taṇme manaḥ śivasaṅkalpamastu (i). //2//

Yatprajñanamuta ceto dhṛtiśca yajjyotirantaramṛtaṁ prajāsu.
Yasmānna ṛte kiṁ cana karma kriyate tanme manaḥ śivasaṅkalpamastu (i). //3//

Yenedaṁ bhūtaṁ bhūvanaṁ bhaviṣyat parigṛhīta-mamṛtena sarvam.
Yena yajñastāyate saptahotā tanme manaḥ śivasaṅkalpamastu (i). //4//

Yasminnṛcaḥ sāma yajūm̐ṣi yasmin pratiṣṭhitā rathanābhāvivārāḥ.
Yasmiñścittaṁ sarvamotaṁ prajānāṁ tanme manaḥ śivasaṅkalpamastu (i). //5//

CHAPTER THIRTY-FOUR

1. A waking person's mind, which endowed with divine virtues, moves far and high, that of a person asleep moves in the same way; racing far and wide, and the sole enlightener of all lights, may that mind of mine be always guided by the best of intentions. (1)

2. Whereby the wise and talented ones perform their duties in assemblies and the active ones at sacrifices; which is the foremost motivating spirit embedded within all the creatures, may that mind of mine be always guided by the best of intentions. (1)

3. The mind, which is the knowledge supreme, the awakening as well as the resolution, and which is the immortal light embedded within all the creatures; without which no action whatsoever is performed, may that mind of mine be always guided by the best of intentions. (1)

4. Wherewith the immortal one, all that ever existed, all that at present exists and all that will ever exist in future, is comprehended; wherewith the sacrifice with seven priests is spread, may that mind of mine be always guided by the best of intentions. (1)

5. Wherein the Ṛks (praise verses), the Sāmans (lyrics), and the Yajuḥs (sacrificial formulae) are well placed like spokes in the nave of a wheel; wherein like a warf the thought of all the creatures is woven, may that mind of mine be always guided by the best of intentions. (1)

सुषारथिरश्वानिव यन्मनुष्यान्नेनीयतेऽभीशुभिर्वाजिन इव ।
हृत्प्रतिष्ठं यदजिरं जविष्ठं तन्मे मनः शिवसङ्कल्पमस्तु ॥ ६ ॥

पितुं नु स्तोषं महो धर्माणं तविषीम् । यस्य त्रितो व्योजसा वृत्रं विपर्वमर्दयत् ॥ ७ ॥
अन्विदनुमते त्वं मन्यासै शं च नस्कृधि । क्रत्वे दक्षाय नो हिनु प्र ण आयूंषि तारिषः ॥ ८ ॥
अनु नोऽद्यानुमतिर्यज्ञं देवेषु मन्यताम् । अग्निश्च हव्यवाहनो भवतं दाशुषे मयः ॥ ९ ॥
सिनीवालि पृथुष्टुके या देवानामसि स्वसा । जुषस्व हव्यमाहुतं प्रजां देवि दिदिड्ढि नः ॥ १० ॥
पञ्च नद्यः सरस्वतीमपि यन्ति सस्रोतसः । सरस्वती तु पञ्चधा सो देशेऽभवत्सरित् ॥ ११ ॥

त्वमग्ने प्रथमो अङ्गिरा ऋषिर्देवो देवानामभवः शिवः सखा ।
तव व्रते कवयो विद्मनापसोऽजायन्त मरुतो भ्राजदृष्टयः ॥ १२ ॥

Suṣārathiraśvāniva yanmanuṣyānnenīyate' bhīśubhir-vājina iva.
Hṛtpratiṣṭhaṁ yadajiraṁ javiṣṭhaṁ tanme manaḥ śivasaṅkalpamastu (i). //6//

Pituṁ nu stoṣaṁ maho dharmāṇaṁ taviṣīm. Yasya trito vyojasā vṛtraṁ viparvamardayat (i). //7//

Anvidanumate tvaṁ manyāsai śaṁ ca naskṛdhi. Kratve dakṣāya no hinu pra ṇa āyūṁṣi tāriṣaḥ (i). //8//

Anu no' dyānumatiryajñaṁ deveṣu manyatām. Agniśca havyavāhano bhavataṁ dāśuṣe mayaḥ (i). //9//

Sinīvāli pṛthuṣṭuke yā devānāmasi svasā. Juṣasva havyamāhutaṁ prajāṁ devi didiḍḍhi naḥ (i). //10//

Pañca nadyaḥ sarasvatīmapi yanti sasrotasaḥ. Sarasvatī tu pañcadhā so deśe' bhavatsarit (i)-//11//

Tvamagne prathamo aṅgirā ṛṣīrdevo devānāmabhavaḥ śivaḥ sakhā.
Tava vrate kavayo vidmanāpaso'jāyanta maruto bhrājadṛṣṭayaḥ (i). //12//

6. Which, like a skilful charioteer his speedy horses, leads and controls men as if holding them by the reins; which is well placed within the heart; which is free from decay, and is the speediest of all, may that mind of mine be always guided by the best of intentions. (1)

7. Now I shall glorify food that bestows great strength and by whose vigour creatures in all the three regions (water, earth and air) are able to overcome obstacles and acquire wealth. (1)

8. O divine favour (*anumati*), may you favour our sacrifice and may you grant us weal. May you impel us to skilful deeds and vouchsafe us long and trouble-free span of life. (1)

9. May the divine favour (*anumati*) approve our sacrifice today among the enlightened ones. May she and the fire, bearer of oblations, become bliss for the generous sacrificer. (1)

10. O night of extensive and deep darkness (the new moon night), dear as sister to Nature's bounties, may you enjoy the homage offered to you. May you bless us with prosperous children, O divine night. (1)

11. Five channels of sense-organs, originating from a common source, flow to meet the divine speech. And the divine speech on the land, becomes a channel flowing in five branches. (1)

12. O adorable God, you are the first and foremost essence of life; you are the revealer of the divine knowledge. You are the giver of bliss to the enlightened persons, and friend to your devotees, whose actions are guided by your eternal laws. In your supervision the righteous persons, activated through wisdom, become seers and virtuous. (1)

त्वं नो अग्ने तव देव पायुभिर्मघोनो रक्ष तन्वश्च वन्द्य ।
त्राता तोकस्य तनये गवामस्यनिमेषꣳ रक्षमाणस्तव व्रते ॥ १३ ॥

उत्तानायामव भरा चिकित्वान्त्सद्यः प्रवीता वृषणं जजान
अरुषस्तूपो रुशदस्य पाज इडायास्पुत्रो वयुनेऽजनिष्ट ॥ १४ ॥

इडायास्त्वा पदे वयं नाभा पृथिव्या अधि । जातवेदो निधीमह्यग्ने हव्याय वोढवे ॥ १५ ॥

प्र मन्महे शवसानाय शूषमाङ्गूषं गिर्वणसे अङ्गिरस्वत् ।
सुवृक्तिभि स्तुवत ऋग्मियायार्चामार्कं नरे विश्रुताय ॥ १६ ॥

प्र वो महे महि नमो भरध्वमाङ्गूष्यꣳ शवसानाय साम ।
येना नः पूर्वे पितरः पदज्ञा अर्चन्तो अङ्गिरसो गा अविन्दन् ॥ १७ ॥

Tvaṁ no agne tava deva pāyubhirmaghono rakṣa tanvaśca vandya.
Trātā tokasya tanaye gavāmasyanimeṣaṁ rakṣamāṇastava vrate (i). //13//

Uttānāyāmava bharā cikitvāntsadyaḥ pravītā vṛṣaṇaṁ jajāna.
Aruṣastūpo ruśadasya pāja iḍāyāsputro vayune'janiṣṭa (i).//14//

Iḍāyāstvā pade vayaṁ nābhā pṛthivyā adhi. Jātavedo nidhīmahyagne havyāya voḍhave (i). //15//

Pra manmahe śavasānāya śūṣamāṅgūṣam girvaṇase aṅgirasvat.
Suvṛktibhi stuvata ṛgmiyāyārcāmārkaṁ nare viśrutāya (i). //16//

Pra vo mahe mahi namo bharadhvamāṅgūṣyaṁ śavasānāya sāma.
Yenā naḥ pūrve pitaraḥ padajña arcanto aṅgiraso gā avindan. (i) //17//

13. O adorable God, preserve your devotees with your bounties; you are the defender of cattle for the son of my son, who is ever assiduous in you worship. (1)

14. Let the intelligent priest place the lower side of the sticks with the face upwards, and the upper with the surface downward, so that quickly impregnated it generates the flame, the showerer of benefits. With his red pillar, radiant in splendour, the flame, produced by the process (of attrition) be generated as the son of the goddess of wisdom. (1)

15. We set this omnipresent fire divine upon the central point of the earth – which is the seat of the knowledge – for the purpose of receiving oblations. (1)

16. Just as our vital elements are devoted to us, so may we meditate on all powerful attributes of the resplendent Lord, with our noble actions free from evil and with loving words. May we repeat our prayers to the celebrated leader of all, adored by His worshippers. (1)

17. May you offer adorations to that resplendent God and chant praises to Him, who is exceedingly mighty. Through Him our forefathers, adept in the science of vital elements and conscious of their high positions, could recover the deluded intellects, whilst worshipping Him. (1)

इच्छन्ति त्वा सोम्यासः सखायः सुन्वन्ति सोमं दधति प्रयांसि ।
तितिक्षन्ते अभिशस्तिं जनानामिन्द्र त्वदा कश्चन हि प्रकेतः ॥ १८॥

न ते दूरे परमा चिद्रजांस्या तु प्र याहि हरिवो हरिभ्याम् ।
स्थिराय वृष्णे सवना कृतेमा युक्ता ग्रावाणः समिधाने अग्नौ ॥ १९ ॥

अषाढं युत्सु पृतनासु पप्रिं स्वर्षामप्सां वृजनस्य गोपाम् ।
भरेषुजां सुक्षितिं सुश्रवसं जयन्तं त्वामनु मदेम सोम ॥ २० ॥

सोमो धेनुं सोमो अर्वन्तमाशुं सोमो वीरं कर्मण्यं ददाति ।
सादन्यं विदथ्यं सभेयं पितृश्रवणं यो ददाशदस्मै ॥ २१ ॥

त्वमिमा ओषधीः सोम विश्वास्त्वमपो अजनयस्त्वं गाः ।
त्वमा ततन्थोर्वन्तरिक्षं त्वं ज्योतिषा वि तमो ववर्थ ॥ २२ ॥

Icchanti tvā somyāsaḥ sakhāyaḥ sunvanti somaṁ dadhati prayāṁsi.
Titikṣante abhiśastiṁ janānāmindra tvadā kaścana hi praketaḥ (i). //18//

Na te dūre paramā cidrajāṁsyā tu pra yāhi harivo haribhyām.
Sthirāya vṛṣṇe savanā kṛtemā yuktā grāvāṇaḥ samidhāne agnau (i). //19//

Aṣāḍhaṁ yutsu pṛtanāsu papriṁ svarṣāmapsāṁ vrjanasya gopām.
Bhareṣujāṁ sukṣitiṁ suśravasaṁ jayantaṁ tvāmanu madema soma (i). //20//

Somo dhenuṁ somo arvantamāśuṁ somo vīraṁ karmaṇyaṁ dadāti.
Sādanyaṁ vidathyaṁ sabheyaṁ pitṛśravaṇaṁ yo dadāśadasmai (i).//21//

Tyamimā oṣadhīḥ soma viśvāstvamapo ajanayastvaṁ gāḥ.
Tvamātatanthorvantarikṣaṁ tvaṁ jyotiṣā vi tamo vavartha (i).//22//

18. O resplendent Lord, your loving friends wish to commune with you. They sing sweet melodies and offer you their homage. Supported by you, they endure patiently the calumny of men; for who is wiser than you? (1)

19. O Lord of sun-rays, the remotest regions are not remote for you; please do come speedily with your radiance. O steady showerer of benefits, these offerings are for your presentation. While inner fire is being kindled, we are pouring forth the expressions of devotion, as juice from herbs flows out when pressed between stones. (1)

20. O blissful Lord, invincible in battles, triumphant, granter of bliss, Lord of rain and sunshine, preserver through luminous regions, winner of wars, having a firm base, O glorious one, may we rejoice in your victories. (1)

21. To him, who worships you, O blissful Lord, you give a milch cow, a swift horse, and a son, who is worthy of noble deeds, eminent in society and an honour to his father. He is assiduous in worship and valorous in action. (1)

22. O blissful Lord, you have generated herbs, waters and milch kine; you dispelled darkness with light; you have sustained and expanded the vast mid-regions. (1)

देवेन नो मनसा देव सोम रायो भागꣳ सहसावन्नभि युध्य।
मा त्वा तनदीशिषे वीर्यस्योभयेभ्यः प्रचिकित्सा गविष्टौ ॥२३॥
अष्टौ व्यख्यत् ककुभः पृथिव्यास्त्री धन्व योजना सप्त सिन्धून्।
हिरण्याक्षः सविता देव आगाद्दधद्रत्ना दाशुषे वार्याणि ॥ २४ ॥
हिरण्यपाणिः सविता विचर्षणिरुभे द्यावापृथिवी अन्तरीयते।
अपामीवां बाधते वेति सूर्यमभि कृष्णेन रजसा द्यामृणोति ॥२५॥
हिरण्यहस्तो असुरः सुनीथः सुमृडीकः स्ववाँ यात्वर्वाङ्।
अपसेधन् रक्षसो यातुधानानस्थाद्देवः प्रतिदोषं गृणानः ॥ २६ ॥
ये ते पन्थाः सवितः पूर्व्यासोऽरेणवः सुकृता अन्तरिक्षे।
तेभिर्नो अद्य पथिभिः सुगेभी रक्षा च नो अधि च ब्रूहि देव ॥ २७ ॥

Devena no manasā deva soma rāyo bhāgaṁ sahasāvannabhi yudhya.
Mā tvā tanadīśiṣe vīryasyobhayebhyaḥ pracikitsā gaviṣṭau (i). //23//

Aṣṭau vyakhyat kakubhaḥ pṛthivyāstrī dhanva yojanā sapta sindhūn.
Hiraṇyākṣaḥ savitā deva āgād dadhadratnā dāśuṣe vāryāṇi (i). //24//

Hiraṇyapāṇiḥ savitā vicarṣaṇirubhe dyāvāpṛthivī antarīyate.
Apāmīvām bādhate veti sūryamabhi kṛṣṇena rajasā dyāmṛṇoti (i). //25//

Hiraṇyahasto asuraḥ sunīthaḥ sumṛḍīkaḥ svavāṅ yātvarvāṅ.
Apasedhan rakṣaso yātudhānānasthāddevaḥ pratidoṣaṁ gṛṇānaḥ (i). //26//

Ye te panthāḥ savitaḥ pūrvyāso' reṇavaḥ sukṛtā antarikṣe.
Tebhirno adya pathibhiḥ sugebhī rakṣā ca no adhi ca brūhi deva (i). //27//

23. O blissful Lord, divine and illustrious, bestow upon us a fraction of your wisdom. May you be favourable to us in any dual or conflict, for your judgement is the guide in our life. (1)

24. He (the sun) has lighted up the eight points of the horizon (East, North, West and South and the four at comers), the three regions of the living beings and the seven galaxies. May the golden-eyed sun come hither. May he bestow worthy riches on the Nature's lover. (1)

25. The golden-handed, all-beholding luminary travels between the two regions of heaven and earth, dispels diseases, and this, verily, is known as the sun, and it finally overspreads the sky, extending from the dark interspace to the celestial region. (1)

26. May the golden-handed, life-bestowing, well guiding, exhilarating and affluent sun be present with us at the place of worship. The solar radiations drive away worms and germs, particularly in the evening, if duly utilized. (1)

27. O sun, your paths are set from olden days; they are free from dust, and well determined in space. May you travel along these paths, unobstructed and preserve us day to day. O effulgent, may you bless us. (1)

उभा पिबतमश्विनोभा नः शर्म यच्छतम्। अविद्रियाभिरूतिभिः ॥ २८ ॥

अप्नस्वतीमश्विना वाचमस्मे कृतं नो दस्रा वृषणा मनीषाम्।
अद्यूत्येऽवसे नि ह्वये वां वृधे च नो भवतं वाजसातौ ॥ २९ ॥

द्युभिरक्तुभिः परि पातमस्मानरिष्टेभिरश्विना सौभगेभिः।
तन्नो मित्रो वरुणो मामहन्तामदितिः सिन्धुः पृथिवी उत द्यौः ॥ ३० ॥

आ कृष्णेन रजसा वर्तमानो निवेशयन्नमृतं मर्त्यं च।
हिरण्ययेन सविता रथेना देवो याति भुवनानि पश्यन् ॥ ३१ ॥

आ रात्रि पार्थिवꣳ रजः पितुरप्रायि धामभिः।
दिवः सदाꣳसि बृहती वि तिष्ठस आ त्वेषं वर्तते तमः ॥ ३२ ॥

उषस्तच्चित्रमा भरास्मभ्यं वाजिनीवति। येन तोकं च तनयं च धामहे ॥ ३३ ॥

Ubhā pibatamaśvinobhā naḥ śarma yacchatam. Avidriyābhirūtibhiḥ (i). //28//

Apnasvatīmaśvinā vācamasme kṛtaṁ no dasrā vṛṣaṇā manīṣām.
Adyūtye'vase ni hvaye vāṁ vṛdhe ca no bhavataṁ vājasātau (i). //29//

Dyubhiraktubhiḥ pari pātamasmānariṣṭebhiraśvinā saubhagebhiḥ.
Tanno mitro varuṇo māmahantāmaditiḥ sindhuḥ pṛthivī uta dyauḥ (i). //30//

Ā kṛṣṇena rajasā vartamāno niveśayannamṛtaṁ martyaṁ ca.
Hiraṇyayena savitā rathenā devo yāti bhuvanāni paśyan. (i). //31//

Ā ratri pārthivaṁ rajaḥ pituraprāyi dhāmabhiḥ.
Divaḥ sadāṁsi bṛhatī vi tiṣṭhasa ā tveṣaṁ vartate tamaḥ (i). //32//

Uṣastaccitramā bharāsmabhyaṁ vājinīvati. Yena tokaṁ ca tanayaṁ ca dhāmahe (i). //33//

28. O twins, may you both participate in the spiritual joy and may you both bestow everlasting peace upon us through your irreproachable protection. (1)

29. O twin divines, showerers of benefits, subduers of our evil desires and invigorators of our understanding, may you sanctify our words with works. We invoke you both for our protection in the last watch of our life's night. May you be with us for increase in the provision of food. (1)

30. O twin divines, may you cherish us both by day and by night with undiminished blessings; may the friend, venerable and indivisible Lord, with His bounties, including the oceans, the earth, and the celestial regions, grant us our wishes. (1)

31. The refulgent sun, springing through the obscure regions, arousing mortal and immortal, beholding the several worlds, comes as if mounted on a golden chariot. (1)

32. O night, you have filled the terrestrial realm, alongwith the mid-space. Overspreading you have firmly occupied the realms of heaven also. It is stark darkness all around now. (1)

33. O glamorous dawn, enriched with ample wealth, may you bestow upon us such gifts as may sustain our sons and their sons (1)

प्रातरग्निं प्रातरिन्द्रꣳ हवामहे प्रातर्मित्रावरुणा प्रातरश्विना ।
प्रातर्भगं पूषणं ब्रह्मणस्पतिं प्रातः सोममुत रुद्रꣳ हुवेम ॥ ३४ ॥

प्रातर्जितं भगमुग्रꣳ हुवेम वयं पुत्रमदितेर्यो विधर्ता ।
आध्रश्चिद्यं मन्यमानस्तुरश्चिद्राजा चिद्यं भगं भक्षीत्याह ॥ ३५ ॥

भग प्रणेतर्भग सत्यराधो भगेमां धियमुदवा ददन्नः ।
भग प्र णो जनय गोभिरश्वैर्भग प्र नृभिर्नृवन्तः स्याम ॥ ३६ ॥

उतेदानीं भगवन्तः स्यामोत प्रपित्व उत मध्ये अह्नाम् ।
उतोदिता मघवन्त्सूर्यस्य वयं देवानाꣳ सुमतौ स्याम ॥ ३७ ॥
भग एव भगवाँ२ अस्तु देवास्तेन वयं भगवन्तः स्याम ।
तं त्वा भग सर्व इज्जोहवीति स नो भग पुरएता भवेह ॥ ३८ ॥

Prātaragnim prātarindram̐ havāmahe prātarmitrāvaruṇā prātaraśvinā.
Prātarbhagam pūṣaṇam brahmaṇaspatim prātaḥ somamuta rudram̐ huvema (i). //34//

Prātarjitam bhagamugram̐ huvema vayam putramaditeryo vidhartā.
Ādhraścidyam manyamānasturaścidrājā cidyam bhagam bhakṣītyāha (i) //35//

Bhaga praṇetarbhaga satyarādho bhagemām dhiyamudavā dadannaḥ.
Bhaga pra no janaya gobhiraśvairbhaga pra nṛbhirnṛvantaḥ syāma (i). //36//

Utedānīm bhagavantaḥ syāmota prapitva uta madhye ahnām.
Utoditā maghavantsūryasya vayam devānām̐ sumatau syāma (i). //37//

Bhaga eva bhagavām̐ astu devāstena vayam bhagavantaḥ syāma.
Tam tvā bhaga sarva ijjohavīti sa no bhaga pura etā bhaveha (i). //38//

34. We invoke at dawn the fire divine; at dawn the Lord supreme; at dawn the Lord of light and plasma; at dawn the pair of twin divines; at dawn the Lord of riches and nourishment, and the universal priest; at dawn the Lord of bliss and vitality. (1)

35. We invoke at dawn the powerful gracious bounty, the son of mother infinity; he is the sustainer of the universe, to whom the common man, even the opulent prays and says, give me (wealth) for my enjoyment. (1)

36. O Lord gracious, the foremost guide to our sacred work, and faithful promiser of wealth, may you, granting our wishes, make our ceremony effective, and enrich us with wisdom and vitality. May we, O gracious Lord, be rich in leaders and followers. (1)

37. May we, at this hour, be fortunate; also in the forenoon or at midday, or at sunrise, may we, O bounteous Lord, be happy in the loving kindness of all divine powers. (1)

38. O gracious Lord, possessor of graces you are; through you, may we obtain the graces. Every one, verily, repeatedly invokes you. O gracious Lord, may you be our champion at this solemnity. (1)

समध्वरायोषसो नमन्त दधिक्रावेव शुचये पदाय ।
अर्वाचीनं वसुविदं भगं नो रथमिवाश्वा वाजिन आ वहन्तु ॥ ३९ ॥
अश्वावतीर्गोमतीर्न उषासो वीरवतीः सदमुच्छन्तु भद्राः ।
घृतं दुहाना विश्वतः प्रपीता यूयं पात स्वस्तिभिः सदा नः ॥ ४० ॥
पूषन् तव व्रते वयं न रिष्येम कदा चन । स्तोतारस्त इह स्मसि ॥ ४१ ॥
पथस्पथः परिपतिं वचस्या कामेन कृतो अभ्यानडर्कम् ।
स नो रासच्छुरुधश्चन्द्राग्रा धियं-धियं सीषधाति प्र पूषा ॥ ४२ ॥
त्रीणि पदा वि चक्रमे विष्णुर्गोपा अदाभ्यः । अतो धर्माणि धारयन् ॥ ४३ ॥
तद्विप्रासो विपन्यवो जागृवांसः समिन्धते । विष्णोर्यत्परमं पदम् ॥ ४४ ॥

Samadhvarāyoṣaso namanta dadhikrāveva śucaye padāya.
Arvācīnaṁ vasuvidaṁ bhagaṁ no rathamivāśvā vājina ā vahantu (i). //39//

Aśvāvatīrgomatīrna uṣāso vīravatıḥ sadamucchantu bhadrāḥ.
Ghṛtaṁ duhānā viśvataḥ prapītā yūyaṁ pāta svastibhiḥ sadā naḥ (i). //40//

Pūṣan tava vrate vayaṁ na riṣyema kadā cana. Stotārasta iha smasi (i). //41//

Pathaspathaḥ paripatiṁ vacasyā kāmena kṛto abhyānaḍarkam.
Sa no rāsacchurudhaścandrāgrā dhiyaṁ dhiyaṁ sīṣadhāti pra pūṣā (i). //42//

Trīṇi pada vi cakrame viṣṇurgopā adābhyaḥ. Ato dharmāṇi dhārayan (i). //43//

Tadviprāso vipanyavo jāgṛvāṁsaḥ samindhate. Viṣṇoryatparamaṁ padam (i). //44//

39. May the dawns come to bless our worship with the speed of a cyclone moving to its target. May the dawns bring hitherwards grace, the bestower of prosperity, just as horses draw a chariot. (1)

40. May the auspicious dawns come to us, with wealth of vitality, wisdom and valiant posterity. May they come streaming with all abundance and affection. May you along with the divine forces ever cherish us with blessings. (1)

41. O Lord, the nourisher, may we never suffer detriment when engaged in your worship; we are here to sing your praises. (1)

42. May the worshipper, inspired by expectation of obtaining rewards, approach with praise the adorable provider of food, the guardian of one and every path. May He grant us weapons provided with penetrating golden arrow heads. May the provider of nutritions make our intellects effective. (1)

43. The omnipresnet God, preserver of the indomitable, created three regions – the earth, the mid region and the celestial. He sustains and preserves the sanctity of all vital functions that keep life ticking. (1)

44. By transcendental meditation and pious acts the vigilant seeker of truth realizes the all-pervading God within the innermost cavity, the supreme abode of the Lord. (1)

घृतवती भुवनानामभिश्रियोर्वी पृथ्वी मधुदुघे सुपेशसा ।
द्यावापृथिवी वरुणस्य धर्मणा विष्कभिते अजरे भूरिरेतसा ॥ ४५ ॥

ये नः सपत्ना अप ते भवन्त्विन्द्राग्निभ्यामव बाधामहे तान् ।
वसवो रुद्रा आदित्या उपरिस्पृशं मोग्रं चेत्तारमधिराजमक्रन् ॥ ४६ ॥

आ नासत्या त्रिभिरेकादशैरिह देवेभिर्यातं मधुपेयमश्विना ।
प्रायुस्तारिष्टं नी रपांसि मृक्षतं सेधतं द्वेषो भवतं सचाभुवा ॥ ४७ ॥

एष व स्तोमो मरुत इयं गीर्मान्दार्यस्य मान्यस्य कारोः ।
एषा यासीष्ट तन्वे वयां विद्यामेषं वृजनं जीरदानुम् ॥ ४८ ॥

सहस्तोमाः सहच्छन्दस आवृतः सहप्रमा ऋषयः सप्त दैव्याः ।
पूर्वेषां पन्थामनुदृश्य धीरा अन्वालेभिरे रथ्यो न रश्मीन् ॥ ४९ ॥

Ghṛtavatī bhuvanānām abhisriyorvī pṛthvī madhudughe supeśasā.
Dyāvāpṛthivī varuṇasya dharmaṇā viṣkabhite ajare bhūriretasā (i). //45//

Ye naḥ sapatnā apa te bhavantvindrāgnibhyāmava bādhāmahe tān.
Vasavo rudrā ādityā uparispṛśaṁ mograṁ cettāramadhirājamakran (i). //46//

Ā nāsatyā tribhirekādaśairiha devebhiryātaṁ madhupeyamaśvinā.
Prāyustāriṣṭaṁ nī rapāṁsi mṛkṣataṁ sedhataṁ dveṣo bhavataṁ sacābhuvā (i). //47//

Eṣa va stomo maruta iyaṁ gīrmāndāryasya mānyasya kāroḥ.
Eṣā yāsīṣṭa tanve vayāṁ vidyāmeṣaṁ vṛjanaṁ jīradānum (i). //48//

Sahastomāḥ sahacchandasa āvṛtaḥ sahapramā ṛṣayaḥ sapta daivyāḥ.
Pūrveṣāṁ panthāmanudṛśya dhīrā anvālebhire rathyo na raśmīn (i).//49//

45. O radiant heaven and earth, the asylum of created beings, you are spacious, manifold, water-yielding and lovely. By the decree of the venerable Lord, both of you stand parted, each from each. You are undecaying and rich in creative elements. (1)

46. Let those, who are our rivals, get away from us. We drive them away with the grace of the Lord resplendent and adorable. The young, adult and old sages have made me the topmost, mighty and discerning overlord. (1)

47. May your three times eleven, i.e. never-failing divine sources of reality, lead us to the path of consummate bliss. May God bless our offerings, prolong our life, efface our faults, restrain our evils and be ever with us. (1)

48. O vital senses, this praise is for you; this sacred hymn sung by the venerable poet is for you. May you confer delight on the singer; may this praise reach you, for the good of your persons; may we thence obtain food, strength and long life. (1)

49. Well-versed in praise-songs and sacred verses, skilful in actions and well-equipped with knowledge, the seven divine seers, patient and firm, take up the reins (of the sacrifice), like expert charioteers, keeping in view the path shown by previous sages. (1)

आयुष्यं वर्चस्यꣳ रायस्पोषमौद्भिदम् । इदꣳ हिरण्यं वर्चस्वज्जैत्रायाविशतादु माम् ॥ ५० ॥

न तद्रक्षाꣳसि न पिशाचास्तरन्ति देवानामोजः प्रथमजꣳ ह्येतत् ।
यो बिभर्ति दाक्षायणꣳ हिरण्यꣳ स देवेषु कृणुते दीर्घमायुः स मनुष्येषु कृणुते दीर्घमायुः ॥५१॥

यदाबध्नन् दाक्षायणा हिरण्यꣳ शतानीकाय सुमनस्यमानाः ।
तन्म आ बध्नामि शतशारदायायुष्माञ्जरदष्टिर्यथासम् ॥ ५२ ॥

उत नोऽहिर्बुध्न्यः शृणोत्वज एकपात्पृथिवी समुद्रः ।
विश्वे देवा ऋतावृधो हुवाना स्तुता मन्त्राः कविशस्ता अवन्तु ॥ ५३ ॥

इमा गिर आदित्येभ्यो घृतस्नूः सनाद्राजभ्यो जुह्वा जुहोमि ।
शृणोतु मित्रो अर्यमा भगो नस्तुविजातो वरुणो दक्षो अꣳशः ॥ ५४ ॥

सप्त ऋषयः प्रतिहिताः शरीरे सप्त रक्षन्ति सदमप्रमादम् ।
सप्तापः स्वपतो लोकमीयुस्तत्र जागृतो अस्वप्नजौ सत्रसदौ च देवौ ॥ ५५ ॥

Āyuṣyaṁ varcasyaṁ rāyaspoṣamaudbhidam. Idaṁ hiraṇyaṁ varcasvajjaitrāyāviśatādu mām (i). //50//

Na tadrakṣāṁsi na piśācāstaranti devānāmojaḥ prathamajaṁ hyetat.
Yo bibharti dākṣāyaṇaṁ hiraṇyaṁ sa deveṣu kṛṇute dīrghamāyuḥ sa manuṣyeṣu kṛṇute dīrghamāyuḥ (i). //51//

Yadābadhnan dākṣāyaṇā hiraṇyaṁ śatānikāya sumanasyamānāḥ.
Tanma ā badhnāmi śataśāradāyāyuṣmāñjaradaṣṭirya-thāsam (i).//52//

Uta no' hirbudhnyaḥ śṛṇotvaja ekapāt pṛthivī samudraḥ.
Viśve devā ṛtāvṛdho huvānā stutā mantrāḥ kaviśastā avantu (i). //53//

Ima gira ādityebhyo ghṛtasnūḥ sanādrājabhyo juhvā juhomi.
Śṛṇotu mitro aryamā bhago nastuvijāto varuṇo dakṣo aṁśaḥ (i). //54//

Sapta ṛṣayaḥ pratihitāḥ śarīre sapta rakṣanti sadamapramādam.
Saptāpaḥ svapato lokamīyustatra jāgṛto asvapnajau satrasadau ca devau (i). //55//

50. May the shining gold, bestower of long life, bestower of lustre, bestower of plenty of nourishment, uprooter of all miseries, may come to me from all sides to make me victorious. (1)

51. The gold is, verily, the first offspring and the foremost gift of the bounties of Nature. No demons or evil spirited person can ignore it. One, who wears gold as an ornament, lives long among the enlightened ones; he lives long among men too. (1)

52. The gold ornament, which the expert ornament makers tie with affection to the lord of a hundred armies, I tie the same to myself, so that I may have a long span of life of a hundred autumns and reach the ripe old age. (1)

53. May the cloud of the mid-space listen to our invocation; may the wind, the earth, the ocean also listen. May all the bounties of Nature, promoters of sacrifices, having been invoked, praised with hymns and lauded by seers, protect us. (1)

54. I offer my invocations with words of sacred hymns and intense love to the sons of Mother Infinity, the cosmic stars of self effulgence. May the sun, the dwarf stars, cold stars, giant stars and other twinkling ones, listen to us. (1)

55. Seven seers have been posted in the body. Seven guard it all the time with constant alertness. Seven pervading ones reach the world of sleeping and there keep awake the two life bestowers, that never sleep and that stand by to protect good people. (1)

उत्तिष्ठ ब्रह्मणस्पते देवयन्तस्त्वेमहे । उप प्र यन्तु मरुतः सुदानव इन्द्र प्राशूर्भवा सचा ॥ ५६ ॥
प्र नूनं ब्रह्मणस्पतिर्मन्त्रं वदत्युक्थ्यम् ।
यस्मिन्निन्द्रो वरुणो मित्रो अर्यमा देवा ओकांꣳसि चक्रिरे ॥ ५७ ॥
ब्रह्मणस्पते त्वमस्य यन्ता सूक्तस्य बोधि तनयं च जिन्व ।
विश्वं तद्भद्रं यदवन्ति देवा बृहद्वदेम विदथे सुवीराः ॥
य इमा विश्वा विश्वकर्मा यो नः पिता ऽन्नपतेऽन्नस्य नो देहि + ॥ ५८ ॥

Uttiṣṭha brahmaṇaspate devayantastvemahe. Upa pra yantu marutaḥ sudānava indra prāśūrbhavā sacā (i). //56//

Pra nūnaṁ brahmaṇaspatirmantraṁ vadatyukthyam.
Yasminnindro varuṇo mitro aryamā devā okāṁsi cakrire (i). //57//

Brahmaṇaspate tvamasya yantā sūktasya bodhi tanayaṁ ca jinva.
Viśvaṁ tadbhadraṁ yadavanti devā bṛhadvadema vidathe suvīrāḥ.
Ya imā viśvā viśvakarmā yo naḥ pitā' nnapate' nnasya no dehi (i). //58//

56. Rise up O high preceptor; we, your devotees, solicit your nearness to us. May the charitable vital forces come to our help. May our resplendent God be eager to accept our devotional offerings. (1)

57. Verily, the high preceptor proclaims the sacred prayer in which the resplendent Lord and Nature's bounties such as clouds, the lightning, the dawn, and the sun, all of them have a respectable reference. (1)

58. The Lord suprascient, who is the controller of this world, understands and appreciates this hymn of ours and grants us posterity. All that which the divines regard with love is blessed. May we and our family loudly praise you in these sacrificial assemblies. Ya imā viśvā (Yv. XVII. 17), Viśvakarmā (XVII. 26) Yo naḥ pitā (XVII. 27) and Annapate' nnasya no dehi (XI. 83) are to be repeated here. (1)

अथ पञ्चत्रिंशोऽध्यायः ।

अपेतो यन्तु पणयोऽसुम्ना देवपीयवः । अस्य लोकः सुतावतः ।
द्युभिरहोभिरक्तुभिर्व्यक्तं यमो ददात्ववसानमस्मै ॥ १ ॥

सविता ते शरीरेभ्यः पृथिव्याँल्लोकमिच्छतु । तस्मै युज्यन्तामुस्रियाः ॥ २ ॥

वायुः पुनातु सविता पुनात्वग्नेर्भ्राजसा सूर्यस्य वर्चसा । वि मुच्यन्तामुस्रियाः ॥ ३ ॥

अश्वत्थे वो निषदनं पर्णे वो वसतिष्कृता । गोभाज इत्किलासथ यत्सनवथ पूरुषम् ॥ ४ ॥

सविता ते शरीराणि मातुरुपस्थ आ वपतु । तस्मै पृथिवि शं भव ॥ ५ ॥

प्रजापतौ त्वा देवतायामुपोदके लोके नि दधाम्यसौ । अप नः शोशुचदघम् ॥ ६ ॥

ATHA PAÑCATRIMŚO'DHYĀYAḤ

Apeto yantu paṇayo' sumnā devapīyavaḥ. Asya lokaḥ sutāvataḥ (i).
Dyubhirahobhiraktubhirvyaktaṁ yamo dadātvavasāna-masmai (ii). //1//

Savitā te śarīrebhyaḥ pṛthivyāṅllokamicchatu. Tasmai yujyantāmusriyāḥ (i). //2//

Vāyuḥ punātu (i) savitā punātva-(ii) gnerbhrājasā (iii) sūryasya varcasā (iv) vimucyantāmusriyāḥ (v). //3//

Aśvatthe vo niṣadanaṁ parṇe vo vasatiṣkṛtā. Gobhāja itkilāsatha yatsanavatha pūruṣam (i). //4//

Savitā te śarīrāṇi māturupastha ā vapatu. Tasmai pṛthivi śam bhava (i). //5//

Prajāpatau tvā devatāyāmupodake loke ni dadhāmyasau. Apa naḥ śośucadagham (i) //6//

CHAPTER THIRTY-FIVE

1. May the evil bargainers, mischievous and jealous of the enlightened ones, go away hence. This place belongs to him, who has enjoyed devotional bliss. (1) May the ordainer Lord grant rest to this person in all the seasons day and night. (2)

2. May the impeller Lord grant a place (i.e. body) for your physical existence on earth. Let the sense-organs be harnessed for it. (1)

3. May the wind purify it. (1) May the Impeller Lord purify it; (2) with the glow of fire; (3) with the radiance of the sun. (4) Let the sense-organs be unharnessed. (5)

4. Your abode is on the holy fig tree; and on *parṇa* (Butea frondosa) is your residence. You have been sent to the earth, so that you may serve (sick) men. (1)

5. May the impeller Lord commit your bodies to the bosom of the mother Earth. O mother Earth, may you be pleasing to this person. (1)

6. I, so and so, place you at this spot, adjacent to water, under the care of the divine Lord of progeny. May He burn our sins away. (1)

परं मृत्यो अनु परेहि पन्थां यस्ते अन्य इतरो देवयानात्।
चक्षुष्मते शृण्वते ते ब्रवीमि मा नः प्रजां रीरिषो मोत वीरान्॥ ७॥
शं वातः शं हि ते घृणिः शं ते भवन्त्विष्टकाः।
शं ते भवन्त्वग्नयः पार्थिवासो मा त्वाऽभि शूशुचन्॥ ८॥
कल्पन्तां ते दिशस्तुभ्यमापः शिवतमास्तुभ्यं भवन्तु सिन्धवः।
अन्तरिक्षं शिवं तुभ्यं कल्पन्तां ते दिशः सर्वाः॥ ९॥
अश्मन्वती रीयते सं रभध्वमुत्तिष्ठत प्र तरता सखायः।
अत्रा जहीमोऽशिवा ये असञ्छिवान्वयमुत्तरेमाभि वाजान्॥ १०॥
अपाघमप किल्बिषमप कृत्यामपो रपः। अपामार्ग त्वमस्मदप दुःष्वप्न्यं सुव॥ ११॥
सुमित्रिया न आप ओषधयः सन्तु दुर्मित्रियास्तस्मै सन्तु
योऽस्मान्द्वेष्टि यं च वयं द्विष्मः॥१२॥

Paraṁ mṛtyo anu parehi panthāṁ yaste anya itaro devayānāt.
Cakṣuṣmate śṛṇvate te bravīmi mā naḥ prajāṁ rīriṣo mota vīrān (i). //7//

Śaṁ vātaḥ śaṁ hi te ghṛṇiḥ śaṁ te bhavantviṣṭakāḥ.
Śaṁ te bhavantvagnayaḥ pārthivāso mā tvā' bhi śūśucan (i). //8//

Kalpantāṁ te diśastubhyamāpaḥ śivatamāstubhyaṁ bhavantu sindhavaḥ.
Antarikṣaṁ śivaṁ tubhyaṁ kalpantāṁ te diśaḥ sarvāḥ (i). //9//

Aśmanvatī rīyate saṁ rabhadhvamuttiṣṭhata pra taratā sakhāyaḥ.
Atrā jahīmo' śivā ye asañchivānvayamuttaremābhi vājān (i). //10//

Apāghamapa kilbiṣamapa kṛtyāmapo rapaḥ. Apāmāraga tvamasmadapa duḥṣvapnyaṁ suva (i). //11//

Sumitriyā na āpa oṣadhayaḥ santu durmitriyāstasmai santu yo' smandveṣṭi yaṁ ca vayaṁ dviṣmaḥ (i). //12//

7. O death, go away. Take that road of yours which is different from the path along which the enlightened ones travel. To you, with eyes to see and ears to hear, I say : "Do not destroy our progeny, nor our brave sons." (1)

8. May the wind be propitious; may the glare of the sun be pleasing to you; may all the desirable things be helpful to you; may the terrestrial fires be auspicious to you and may they not scorch you. (1)

9. May the regions be favourable to you and so be the waters. May the rivers be most auspicious to you. May the mid-space be propitious to you and may all the regions and mid-regions be helpful to you. (1)

10. The rocky river is flowing fast. Gird up yourselves, O friends; get up and swim across it. Here we quit whatever is evil and may we swim across to the auspicious treasures. (1)

11. O cleanser of evils, keep the sin away from us; keep the evil away; keep the evil designs away; keep the guilt away from us. May you keep the bad dreams away from us. (1)

12. May the waters and herbs be friendly to us; and unfriendly to him, who hates us and whom we do hate. (1)

अनड्वाहमन्वारभामहे सौरभेयं स्वस्तये। स न इन्द्र इव देवेभ्यो वह्निः सन्तारणो भव ॥१३॥

उद्वयं तमसस्परि स्वः पश्यन्त उत्तरम्। देवं देवत्रा सूर्यमगन्म ज्योतिरुत्तमम् ॥ १४ ॥

इमं जीवेभ्यः परिधिं दधामि मैषां नु गादपरो अर्थमेतम्।
शतं जीवन्तु शरदः पुरूचीरन्तर्मृत्युं दधतां पर्वतेन ॥ १५ ॥

अग्न आयूंषि पवस आ सुवोर्जमिषं च नः। आरे बाधस्व दुच्छुनाम् ॥ १६ ॥

आयुष्मानग्ने हविषा वृधानो घृतप्रतीको घृतयोनिरेधि।
घृतं पीत्वा मधु चारु गव्यं पितेव पुत्रमभि रक्षतादिमान्त्स्वाहा ॥ १७ ॥

परीमे गामनेषत पर्यग्निमहृषत। देवेष्वक्रत श्रवः क इमाँ२ आ दधर्षति ॥ १८ ॥

क्रव्यादमग्निं प्र हिणोमि दूरं यमराज्यं गच्छतु रिप्रवाहः।
इहैवायमितरो जातवेदा देवेभ्यो हव्यं वहतु प्रजानन् ॥ १९ ॥

Anaḍvāhamanvārabhāmahe saurabheyaṁ svastaye. Sa na indra iva devebhyo vahniḥ santāraṇo bhava (i). //13//

Udvayaṁ tamasaspari svaḥ paśyanta uttaram. Devaṁ devatrā sūryamaganma jyotiruttamam (i). //14//

Imaṁ jīvebhyaḥ paridhiṁ dadhāmi maiṣāṁ nu gādaparo arthametaṁ. Śataṁ jīvantu śaradaḥ purūcīrantarmṛtyuṁ dadhatāṁ parvatena (i). //15//

Agna āyūṁṣi pavasa ā suvorjamiṣaṁ ca naḥ. Āre bādhasva ducchunām (i). //16//

Āyuṣmānagne haviṣā vṛdhāno ghṛtapratīko ghṛtayoniredhi. Ghṛtaṁ pītvā madhu cāru gavyaṁ piteva putramabhi rakṣatādimāntsvāhā (i). //17//

Parīme gāmaneṣata paryagnimahṛṣata. Deveṣvakrata śravaḥ ka imāṅ ā dadharṣati (i). //18//

Kravyādamagniṁ pra hiṇomi dūraṁ yamarājyaṁ gacchatu ripravāhaḥ.
Ihaivāyamitaro jātavedā devebhyo havyaṁ vahatu prajānan (i). //19//

13. We invoke the cart-puller, full of fragrance, for our well-being. May he be a carrier as well as deliverer to us as the resplendent Lord is to the enlightened ones. (1)

14. Beholding the uprising divine light beyond the mundane darkness, we, by and by, approach the spiritual one, the divine of divines. (1)

15. I hereby set this a limit for the living (men). Let none of them follow a different course other than this. May they live a hundred autumns for multi-benevolent activities. May this keep death on the other side of the mountain. (1)

16. O adorable Lord, you purify our lives. May you kindly grant us vigour and food. Drive wicked dogs away from us. (1)

17. O fire, bestower of longevity, flourishing with offerings, born out of purified butter, may your mouth remain always full of purified butter. Having consumed sweet and delicious cow-butter, may you protect these people, just as a father protects his son. Svāhā. (1)

18. They have been taking cows around (for grazing); they have been keeping the fire blazing all around; they have been entertaining the enlightened ones; who can think of overwhelming them? (1)

19. I drive the corpse-consuming fire far away; let that carrier of sin go to the death's territory. Let this other fire remain here, so that he may carry our oblations to the bounties of Nature knowing them well. (1)

वह वपां जातवेदः पितृभ्यो यत्रैनान्वेत्थ निहितान् पराके।
मेदसः कुल्या उप तान्त्स्रवन्तु सत्या एषामाशिषः सं नमन्ताᳬ स्वाहा ॥२०॥
स्योना पृथिवि नो भवानृक्षरा निवेशनी। यच्छा नः शर्म सप्रथाः।
अप नः शोशुचदघम् ॥ २१ ॥
अस्मात्त्वमधि जातोऽसि त्वदयं जायतां पुनः। असौ स्वर्गाय लोकाय स्वाहा ॥ २२ ॥

Vaha vapāṁ jātavedaḥ pitṛbhyo yatrainān vettha nihitān parāke.
Medasaḥ kulyā upa tāntsravantu satyā eṣāmāśiṣaḥ saṁ namantāṁ svāhā (i). //20//

Syonā pṛthivi no bhavānṛkṣarā niveśanī. Yacchā naḥ śarma saprathāḥ (i).
Apa naḥ śośucadagham (ii). //21//

Asmāttvamadhi jāto'si tvadayaṁ jāyatāṁ punaḥ. Asau svargāya lokāya svāhā (i). //22//

20. O omniscient Lord, carry this leather-cask for our elders, to the place where you know them residing far away. May the streams of fat (melted butter) flow near them and their blessings come out true. Svāhā. (1)

21. O pleasant Earth, may you become a thornless place of rest for us. Provide us with spacious accommodation. (1) May you burn the sin away from us. (2)

22. You are born from him; may he be born from you again; may so and so (go) to the world of bliss. Svāhā. (1)

अथ षट्त्रिंशोऽध्यायः ।

ऋचं वाचं प्र पद्ये मनो यजुः प्र पद्ये साम प्राणं प्र पद्ये चक्षुः श्रोत्रं प्र पद्ये ।
वागोजः सहौजो मयि प्राणापानौ ॥ १ ॥

यन्मे छिद्रं चक्षुषो हृदयस्य मनसो वातितृण्णं बृहस्पतिर्मे तद्दधातु ।
शं नो भवतु भुवनस्य यस्पतिः ॥ २ ॥

भूर्भुवः स्वः तत्सवितुर्वरेण्यं भर्गो देवस्य धीमहि । धियो यो नः प्रचोदयात् ॥ ३ ॥

कया नश्चित्र आ भुवदूती सदावृधः सखा । कया शचिष्ठया वृता ॥ ४ ॥

कस्त्वा सत्यो मदानां मंहिष्ठो मत्सदन्धसः । दृढा चिदारुजे वसु ॥ ५ ॥

अभी षु णः सखीनामविता जरितॄणाम् । शतं भवास्यूतिभिः ॥ ६ ॥

कया त्वं न ऊत्याभि प्र मन्दसे वृषन् । कया स्तोतृभ्य आ भर ॥ ७ ॥

ATHA ṢAṬTRIṀŚO' DHYĀYAḤ

Ṛcaṁ vācaṁ pra padye mano yajuḥ pra padye sāma prāṇaṁ pra padye cakṣuḥ śrotraṁ pra padye. Vāgojaḥ sahaujo mayi prāṇāpānau (i). //1//

Yanme chidraṁ cakṣuṣo hṛdayasya manaso vātitṛṇṇaṁ bṛhaspatirme taddadhātu. Śaṁ no bhavatu bhuvansya yaspatiḥ (i). //2//

Bhūrbhuvaḥ svaḥ tat saviturvareṇyaṁ bhargo devasya dhīmahi. Dhiyo yo naḥ pracodayāt (i). //3//

Kayā naścitra ā bhuvadūti sadāvṛdhaḥ sakhā. Kayā śaciṣṭhayā vṛtā (i). //4//

Kastvā satyo madānāṁ maṁhiṣṭho matsadandhasaḥ. Dṛḍhā cidāruje vasu (i). //5//

Abhī ṣu ṇaḥ sakhīnām avitā jaritṝṇām. Śataṁ bhavāsyūtibhiḥ (i). //6//

Kayā tvaṁ na ūtyābhi pra mandase vṛṣan. Kayā stotṛbhya ā bhara (i). //7//

CHAPTER THIRY-SIX

1. I acquire Ṛks (verses of praise), the speech; I acquire Yajuḥ (sacrificial texts), the mind; I acquire Sāmans (lyrics), the vital breath; I acquire the eyes and ears as well. May I get the force of speech and the strength of overcoming. May my out-breath and in-breath be in perfect order. (1)

2. Whatever distressing lacuna I have in my vision, in my heart or in my thought, may the Lord Supreme remove that. May gracious to us be He, who is the Lord of the whole universe. (1)

3. May we imbibe in ourselves the choicest effulgence of the divine Creator, so that He evokes our intellects. (1)

4. By what means may He, who is ever-augmenting, wonderful and friendly, come to us, and by what most effective contribution? (1)

5. What genuine and most earnest devotional offerings like nourishing food, would inspirit you to win over evil thoughts and procure formidable treasures? (1)

6. May you, O our protector, your friends and admirers, come to us with a hundred protections. (1)

7. O resplendent Lord, being pleased, with what protective measures do you delight us? What are the riches that you grant to your worshippers? (1)

इन्द्रो विश्वस्य राजति । शं नो अस्तु द्विपदे शं चतुष्पदे ॥ ८ ॥
शं नो मित्रः शं वरुणः शं नो भवत्वर्यमा । शं न इन्द्रो बृहस्पतिः शं नो विष्णुरुरुक्रमः ॥ ९ ॥
शं नो वातः पवताꣳ शं नस्तपतु सूर्यः । शं नः कनिक्रदद्देवः पर्जन्यो अभि वर्षतु ॥ १० ॥
अहानि शं भवन्तु नः शꣳ रात्रीः प्रति धीयताम् ।
शं न इन्द्राग्नी भवतामवोभिः शं न इन्द्रावरुणा रातहव्या ।
शं न इन्द्रापूषणा वाजसातौ शमिन्द्रासोमा सुविताय शं योः ॥ ११ ॥
शं नो देवीरभिष्टय आपो भवन्तु पीतये । शं योरभि स्रवन्तु नः ॥ १२ ॥
स्योना पृथिवि नो भवानृक्षरा निवेशनी । यच्छा नः शर्म सप्रथाः ॥ १३ ॥
आपो हि ष्ठा मयोभुवस्ता न ऊर्जे दधातन । महे रणाय चक्षसे ॥ १४ ॥

Indro viśvasya rājati. Śaṁ no astu dvipade śaṁ catuṣpade (i). //8//

Śaṁ no mitraḥ śaṁ varuṇaḥ śaṁ no bhavatvaryamā. Śaṁ na indro bṛhaspatiḥ śaṁ no viṣṇururukramaḥ (i). //9//

Śaṁ no vātaḥ pavatām̐ śaṁ nastapatu sūryaḥ. Śaṁ naḥ kanikradaddevaḥ parjanyo abhi varṣatu (i). //10//

Ahāni śaṁ bhavantu naḥ śam̐ rātrīḥ prati dhīyatām.
Śaṁ na indrāgnī bhavatāmavobbiḥ śaṁ na indrāvaruṇā rātahavyā.
Śaṁ na indrāpūṣaṇā vājasātau śamindrāsomā suvitāya śaṁ yoḥ (i). //11//

Śaṁ no devirabhiṣṭaya āpo bhavantu pītaye. Śaṁ yorabhi sravantu naḥ (i). //12//

Śyonā pṛthivi no bhavānṛkṣarā niveśanī. Yacchā naḥ śarma saprathāḥ (i). //13//

Āpo hi ṣṭhā mayobhuvastā na ūrje dadhātana. Mahe raṇāya cakṣase (i). //14//

8. The resplendent Lord illumines the universe. May He be gracious to us all, the bipeds as well as the quadrupeds. (1)

9. May the friendly Lord be gracious to us; may the venerable Lord, and the controller Lord be gracious to us. May the resplendent Lord, the Lord supreme be gracious to us, and may the omnipresent Lord of wide strides be gracious to us. (1)

10. May the wind blow pleasantly for us; may the sun be warm pleasantly for us; and may the divine loud-thundering cloud send showers for our pleasure. (1)

11. May the days be pleasing to us; may the Lord make nights pleasing to us. May the Lord resplendent and adorable be gracious to us with protective measures; may the Lord resplendent and venerable satisfied with our oblations, be gracious to us. May the Lord resplendent and nourisher be gracious to us in battle; may the Lord resplendent and blissful be gracious to us by urging us on right ways. May our diseases be cured and fears kept away. (1)

12. May the divine waters be pleasing to us for drinking and fulfilment of desires. May they rain all over us for prosperity and cure of ills. (1)

13. O pleasant Earth, may you become a thornless place of rest for us. Provide us with spacious accommodation. (1)

14. O waters, you are bestowers of happiness. So help us to have vigour as well as the grand and pleasing vision. (1)

यो वः शिवतमो रसस्तस्य भाजयतेह नः । उशतीरिव मातरः ॥ १५ ॥
तस्मा अरं गमाम वो यस्य क्षयाय जिन्वथ । आपो जनयथा च नः ॥ १६ ॥
द्यौः शान्तिरन्तरिक्षꣳ शान्तिः पृथिवी शान्तिरापः शान्तिरोषधयः शान्तिः ।
वनस्पतयः शान्तिर्विश्वे देवाः शान्तिर्ब्रह्म शान्तिः सर्वꣳ
शान्तिः शान्तिरेव शान्तिः सा मा शान्तिरेधि ॥ १७ ॥
दृते दृꣳह मा मित्रस्य मा चक्षुषा सर्वाणि भूतानि समीक्षन्ताम् ।
मित्रस्याहं चक्षुषा सर्वाणि भूतानि समीक्षे । मित्रस्य चक्षुषा समीक्षामहे ॥ १८ ॥
दृते दृꣳह मा । ज्योक्ते सन्दृशि जीव्यासं ज्योक्ते सन्दृशि जीव्यासम् ॥ १९ ॥
नमस्ते हरसे शोचिषे नमस्ते अस्त्वर्चिषे ।
अन्याँस्ते अस्मत्तपन्तु हेतयः पावको अस्मभ्यꣳ शिवो भव ॥ २० ॥
नमस्ते अस्तु विद्युते नमस्ते स्तनयित्नवे । नमस्ते भगवन्नस्तु यतः स्वः समीहसे ॥२१ ॥

Yo vaḥ śivatamo rasastasya bhājayateha naḥ. Uśatīriva mātaraḥ (i). //15//

Tasmā araṁ gamāma vo yasya kṣayāya jinvatha. Āpo janayathā ca naḥ (i). //16//

Dyau śāntirantarikṣaṁ śāntiḥ pṛthivī śāntirāpaḥ śāntiroṣadhayaḥ śāntiḥ.
Vanaspatayaḥ śāntirviśve devāḥ śāntirbrahma śāntiḥ sarvaṁ śāntiḥ śāntireva śāntiḥ sā mā śantiredhi (i). //17//

Dṛte dṛṁha mā mitrasya mā cakṣuṣā sarvāṇi bhūtāni samīkṣantām.
Mitrasyāhaṁ cakṣūṣā sarvāṇi bhūtāni samīkṣe. Mitrasya cakṣuṣā samīkṣāmahe (i). //18//

Dṛte dṛṁha mā. Jyokte sandṛśi jīvyāsaṁ jyokte sandṛśi jīvyāsam (i). //19//

Namaste harase śociṣe namaste astvarciṣe.
Anyāṅste asmattapantu hetayaḥ pāvako asmabhyaṁ śivo bhava (i). //20//

Namaste astu vidyute namaste stanayitnave. Namaste bhagavannastu yataḥ svaḥ samīhase (i). //21//

15. O waters, make us enjoy here the most blissful sap, which you have, like mothers full of affectionate love. (1)

16. May we have enough of your that sap to our full satisfaction, with which you nourish the whole world. And may we be born for this again. (1)

17. May the sky be peaceful; may the mid-space be peaceful; may the earth be peaceful; may the waters be peaceful; may the annual plants be peaceful; may the forests be peaceful; may all the bounties of Nature be peaceful; may the knowledge be peaceful; may all the things be peaceful; may there be peace and peace only; may such a peace come to me. (1)

18. O Lord, make me firm in times of distress. May all the beings look at me with a friendly eye. May I see all the beings with a friendly eye. Thus may we all be looked at with a friendly eye. (1)

19. O powerful Lord, may you steady me in the calamities. May I live long, beholding you; may I live long beholding you. (1)

20. Our homage be to your desiccation and to your glow. Our obeisance be to your illuminating light. May your weapons torment others than us. May you be purifier and gracious to us. (1)

21. Our homage be to you, the lightning bright; homage to you, the thundering loud. O bounteous Lord, our homage be to you as you strive to lead us to the world of light. (1)

यतो॑यतः स॒मीह॑से॒ ततो॑ नो॒ अभ॑यं कुरु। शं नः॑ कुरु प्र॒जाभ्योऽभ॑यं नः प॒शुभ्यः॑ ॥ २२ ॥

सु॒मि॒त्रि॒या न॒ आप॒ ओष॑धयः सन्तु दुर्मि॒त्रि॒यास्तस्मै॑ सन्तु॒ योऽस्मान् द्वेष्टि॒ यं च॑ व॒यं द्वि॒ष्मः ॥ २३ ॥

तच्चक्षु॑र्दे॒वहि॑तं पु॒रस्ता॑च्छु॒क्रमुच्च॑रत्। पश्ये॑म श॒रदः॑ श॒तं जीवे॑म श॒रदः॑ श॒तꣳ शृणु॑याम
श॒रदः॑ श॒तं प्र ब्र॑वाम श॒रदः॑ श॒तमदी॑नाः स्याम श॒रदः॑ श॒तं भूय॑श्च श॒रदः॑ श॒तात् ॥ २४ ॥

Yato yataḥ samīhase tato no abhayaṁ kuru. Śaṁ naḥ kuru prajābhyo' bhayaṁ naḥ paśubhyaḥ (i). //22//

Sumitriyā na āpa oṣadhayaḥ santu durmitriyāstasmai santu yo' smān dveṣṭi yaṁ ca vayaṁ dviṣmaḥ (i). //23//

Taccakṣurdevahitaṁ purastācchukramuccarat paśyema śaradaḥ śataṁ jīvema śaradaḥ śataṁ śṛṇuyāma śaradaḥ śataṁ pra bravāma śaradaḥ śatamadīnāḥ syāma śaradaḥ śataṁ bhūyaśca śaradaḥ śatāt (i). //24//

22. From whatever quarter you strive to lead us, may you provide us safety thence. May you grant happiness to our progeny and safety to our cattle. (1)

23. May waters and herbs be friendly to us; and unfriendly to him, who hates us and whom we do hate. (1)

24. May we be fortunate enough to look at the eye, set up by the bounties of Nature, rising brightly in front of us for a hundred autumns; may we live for a hundred autumns; may our hearing remain unimparied for a hundred autumns; may we speak clearly for a hundred autumns; may we never be indigent in a life span of a hundred autumns, and even much more than a hundred autumns. (1)

अथ सप्तत्रिंशोऽध्यायः ।

देवस्य त्वा सवितुः प्रसवेऽश्विनोर्बाहुभ्यां पूष्णो हस्ताभ्याम् । आ ददे नारिरसि ॥ १ ॥

युञ्जते मनं उत युञ्जते धियो विप्रा विप्रस्य बृहतो विपश्चितः ।
वि होत्रा दधे वयुनाविदेक इन्मही देवस्य सवितुः परिष्टुतिः ॥ २ ॥

देवी द्यावापृथिवी मखस्य वामद्य शिरो राध्यासं देवयजने पृथिव्याः ।
मखाय त्वा मखस्य त्वा शीर्ष्णे ॥ ३ ॥

देव्यो वम्रयो भूतस्य प्रथमजा मखस्य वोऽद्य शिरो राध्यासं देवयजने पृथिव्याः ।
मखाय त्वा मखस्य त्वा शीर्ष्णे ॥ ४ ॥

इयत्यग्र आसीन्मखस्य तेऽद्य शिरो राध्यासं देवयजने पृथिव्याः ।
मखाय त्वा मखस्य त्वा शीर्ष्णे ॥ ५ ॥

ATHA SAPTATRIṀŚO' DHYĀYAḤ

Devasya tvā savituḥ prasave' śvinorbāhubhyāṁ pūṣṇo hastābhyām. Ā dade nārirasi (i). //1//

Yuñjate mana uta yuñjate dhiyo viprā viprasya bṛhato vipaścitaḥ.
Vi hotrā dadhe vayunāvideka inmahī devasya savituḥ pariṣṭutiḥ (i). //2//

Devī dyāvāpṛthivī makhasya vāmadya śiro rādhyāsaṁ devayajane pṛthivyāḥ.
Makhāya tvā makhasya tvā śīrṣṇe (i). //3//

Devyo vamryo bhūtasya prathamajā makhasya vo' dya śiro rādhyāsaṁ devayajane pṛthivyāḥ. Makhāya tvā makhasya tvā śīrṣṇe (i). //4//

Iyatyagra āsīnmakhasya te'dya śiro rādhyāsaṁ devayajane pṛthivyāḥ.
Makhāya tvā makhasya tvā śīrṣṇe (i). //5//

CHAPTER THIRTY-SEVEN

1. At the impulsion of the creator God, I take you up with arms of the healers and with hands of the nourisher. You are not an enemy. (1)

2. Discerning intellectuals harness their minds as well as their intellect towards the supreme learned intellectual. Cognizant of all the deeds, He alone accomplishes the cosmic sacrifice. Great is the glory of the creator God. (1)

3. O divine sky and earth, may I be able to perform the greatest of the sacrifices today on this sacrificial altar of the enlightened ones on the earth. I invoke you for the sacrifice; I invoke you for the greatest of the sacrifices. (1)

4. O divine ant-hills, first-born among all the beings, may I be able to perform the greatest of the sacrifices today on this sacrificial altar of the enlightened ones on the earth. I invoke you for the sacrifice; I invoke you for the greatest of the sacrifices. (1)

5. In the beginning, you were only this much. May I be able to perform the greatest of the sacrifices today on this sacrificial altar of the enlightened ones on the earth. I invoke you for the sacrifice; I invoke you for the greatest of the sacrifices. (1)

इन्द्रस्यौजं स्थ मखस्य वोऽद्य शिरो राध्यासं देवयजने पृथिव्याः ।
मखाय त्वा मखस्य त्वा शीर्ष्णे । मखाय त्वा मखस्य त्वा शीर्ष्णे ।
मखाय त्वा मखस्य त्वा शीर्ष्णे ॥ ६ ॥
प्रैतु ब्रह्मणस्पतिः प्र देव्येतु सूनृता । अच्छा वीरं नर्यं पङ्क्तिराधसं देवा यज्ञं नयन्तु नः ।
मखाय त्वा मखस्य त्वा शीर्ष्णे । मखाय त्वा मखस्य त्वा शीर्ष्णे ।
मखाय त्वा मखस्य त्वा शीर्ष्णे ॥ ७ ॥

मखस्य शिरोऽसि । मखाय त्वा मखस्य त्वा शीर्ष्णे ।
मखस्य शिरोऽसि । मखाय त्वा मखस्य त्वा शीर्ष्णे ।
मखस्य शिरोऽसि । मखाय त्वा मखस्य त्वा शीर्ष्णे ।
मखाय त्वा मखस्य त्वा शीर्ष्णे मखाय त्वा मखस्य त्वा शीर्ष्णे ।
मखाय त्वा मखस्य त्वा शीर्ष्णे ॥ ८ ॥

Indrasyauja stha makhasya vo'dya śiro rādhyāsaṁ devayajane pṛthivyāḥ.
Makhāya tvā makhasya tvā śīrṣṇe (i). Makhāya tvā makhasya tvā śīrṣṇe (ii).
Makhāya tvā makhasya tvā sīrṣṇe (iii). //6//

Praitu brahmaṇaspatiḥ pra devyetu sūnṛtā. Acchā vīraṁ naryaṁ paṅktirādhasaṁ devā yajñaṁ nayantu naḥ (i).
Makhāya tvā makhasya tvā śīrṣṇe (ii). Makhāya tvā makhasya tvā sīrṣṇe (iii).
Makhāya tvā makhasya tvā śīrṣṇe (iv). //7//

Makhasya śiro' si. Makhāya tvā makhasya tvā śīrṣṇe (i).
Makhasya śiro' si. Makhāya tvā makhasya tvā sīrṣṇe (ii).
Makhasya śiro' si. Makhāya tvā makhasya tvā śīrṣṇe (iii).
Makhāya tvā makhasya tvā śīrṣṇe (iv) makhāya tvā makhasya tvā sīrṣṇe (v).
Makhāya tvā makhasya tvā śīrṣṇe (vi). //8//

6. You are the vigour of the resplendent Lord. May I be able to perform the greatest of the sacrifice today on this sacrificial altar of the enlightened ones on the earth. I invoke you for the sacrifice; I invoke you for the greatest of the sacrifices. (1) I invoke you for the sacrifice; I invoke you for the greatest of the sacrifices. (2) I invoke you for the sacrifice; I invoke you for the greatest of the sacrifices. (3)

7. May the high preceptor come to us. May brilliant divine virtues comes to us. May Nature's bounties lead us to glory and drive away every adversary and help us in the cause beneficial to men and measures leading to prosperity. (1) I invoke you for the sacrifice; I invoke you for the greatest of the sacrifices. (2) I invoke you for the sacrifice; I invoke you for the greatest of the sacrifices. (3) I invoke you for the sacrifice; I invoke you for the greatest of the sacrifices. (4)

8. You are the apex of the sacrifice. I invoke you for the sacrifice; I invoke you for the greatest of the sacrifices. (1) You are the apex of the sacrifice. I invoke you for the sacrifice; I invoke you for the greatest of the sacrifices. (2) You are the apex of the sacrifice. I invoke you for the sacrifice; I invoke you for the greatest of the sacrifices. (3) I invoke you for the sacrifice; I invoke you for the greatest of the sacrifices. (4) I invoke you for the sacrifice; I invoke you for the greatest of the sacrifices. (5) I invoke you for the sacrifice; I invoke you for the greatest of the sacrifices. (6)

अश्वस्य त्वा वृष्णः शक्ना धूपयामि देवयजने पृथिव्याः । मखाय त्वा मखस्य त्वा शीर्ष्णे ।
अश्वस्य त्वा वृष्णः शक्ना धूपयामि देवयजने पृथिव्याः । मखाय त्वा मखस्य त्वा शीर्ष्णे ।
अश्वस्य त्वा वृष्णः शक्ना धूपयामि देवयजने पृथिव्याः । मखाय त्वा मखस्य त्वा शीर्ष्णे ।
मखाय त्वा मखस्य त्वा शीर्ष्णे । मखाय त्वा मखस्य त्वा शीर्ष्णे ।
मखाय त्वा मखस्य त्वा शीर्ष्णे ॥ ९ ॥

ऋजवे त्वा साधवे त्वा सुक्षित्यै त्वा । मखाय त्वा मखस्य त्वा शीर्ष्णे ।
मखाय त्वा मखस्य त्वा शीर्ष्णे । मखाय त्वा मखस्य त्वा शीर्ष्णे ॥ १० ॥

यमाय त्वा मखाय त्वा सूर्यस्य त्वा तपसे । देवस्त्वा सविता मध्वानक्तु
पृथिव्याः सꣳस्पृशस्पाहि । अर्चिरसि शोचिरसि तपोऽसि ॥ ११ ॥

Aśvasya tvā vṛṣṇaḥ śaknā dhūpayāmi devayajane pṛthivyāḥ. Makhāya tvā makhasya tvā śīrṣṇe (i). Aśvasya tvā vṛṣṇaḥ śaknā dhūpayāmi devayajane pṛthivyāḥ. Makhāya tvā makhasya tvā śīrṣṇe (ii). Aśvasya tvā vṛṣṇaḥ śaknā dhūpayāmi devayajane pṛthivyāḥ. Makhāya tvā makhasya tvā śīrṣṇe (iii). Makhāya tvā makhasya tvā śīrṣṇe (iv). Makhāya tvā makhasya tvā śīrṣṇe (v). Makhāya tvā makhasya tvā śīrṣṇe (vi). //9//

Ṛjave tvā (i) sādhave tvā (ii) sukṣityai tvā (iii). Makhāya tvā makhasya tvā śīrṣṇe (iv). Makhāya tvā makhasya tvā śīrṣṇe (v). Makhāya tvā makhasya tvā śīrṣṇe (vi). //10//

Yamāya tvā (i) makhāya tvā (ii) sūryasya tvā tapase (iii). Devastvā savitā madhvānaktu (iv) pṛthivyāḥ saṁspṛśaspāhi (v). Arcirasi śocirasi tapo' si (vi). //11//

9. At this sacrificial altar of the enlightened ones on the earth, I worship you with the strength of a virile horse. I invoke you for the sacrifice; I invoke you for the greatest of the sacrifices. (1) At this sacrificial altar of the enlightened ones on the earth, I worship you with the strength of a virile horse. I invoke you for the sacrifice; I invoke you for the greatest of the sacrifices. (2) At this sacrificial altar of the enlightened ones on the earth, I worship you with the strength of a virile horse. I invoke you for the sacrifice; I invoke you for the greatest of the sacrifices. (3) I invoke you for the sacrifice; I invoke you for the greatest of the sacrifices. (4) I invoke you for the sacrifice; I invoke you for the greatest of the sacrifices. (5) I invoke you for the sacrifice; I invoke you for the greatest of the sacrifices. (6)

10. I invoke you for uprightness. (1) I invoke you for sincerity. (2) I invoke you for good shelter. (3) I invoke you for the sacrifice; I invoke you for the greatest of the sacrifices. (4) I invoke you for the sacrifice; I invoke you for the greatest of the sacrifices. (5) I invoke you for the sacrifice; I invoke you for the greatest of the sacrifices. (6)

11. (I dedicate) you to the controlling Lord. (1) You to the sacrifice. (2) You to the brilliance of the sun. (3) May the creator Lord balm you with honey. (4) Save us from the contaminations of the earth. (5) You are the flame; you are the glow; you are the heat. (6)

अनाधृष्टा पुरस्ताद॒ग्नेराधिपत्य आयुर्मे दाः पुत्रवती दक्षिणत इन्द्रस्याधिपत्ये प्रजां मे दाः ।
सुषदा पश्चाद्देवस्य सवितुराधिपत्ये चक्षुर्मे दा आश्रुतिरुत्तरतो धातुराधिपत्ये रायस्पोषं मे दाः ।
विधृतिरुपरिष्टाद्बृहस्पतेराधिपत्य ओजो मे दा विश्वाभ्यो मा नाष्ट्राभ्यस्पाहि
मनोरश्वासि ॥ १२ ॥

स्वाहा मरुद्भिः परि श्रीयस्व दिवः सꣳस्पृशस्पाहि । मधु मधु मधु ॥ १३ ॥

गर्भो देवानां पिता मतीनां पतिः प्रजानाम् । सं देवो देवेन सवित्रा गत सꣳ सूर्येण रोचते ॥ १४ ॥

समग्निरग्निना गत सं दैवेन सवित्रा सꣳ सूर्येणारोचिष्ट ।
स्वाहा समग्निस्तपसा गत सं दैव्येन सवित्रा सꣳ सूर्येणारूरुचत ॥ १५ ॥

धर्ता दिवो वि भाति तपसस्पृथिव्यां धर्ता देवो देवानाममर्त्यस्तपोजाः ।
वाचमस्मे नि यच्छ देवायुवम् ॥ १६ ॥

अपश्यं गोपामनिपद्यमानमा च परा च पथिभिश्चरन्तम् ।
स सध्रीचीः स विषूचीर्वसान आ वरीवर्ति भुवनेष्वन्तः ॥ १७ ॥

Anādhṛṣṭā purastādagnerādhipatya āyurme dāḥ (i) putravatī dakṣiṇata indrasyādhipatye prajāṁ me dāḥ (ii). Suṣadā paścāddevasya saviturādhipatye cakṣurme dā-(iii) āśrutiruttarato dhāturādhipatye rāyaspoṣaṁ me dāḥ (iv). Vidhṛtiruparisṭādbṛhaspaterādhipatya ojo me dā-(v) viśvābhyo mā nāṣṭrābhyaspāhi (vi) manoraśvāsi (vii). //12//

Svāhā marudbhiḥ pari śrīyasva (i) divaḥ saṁspṛsaspāhi (ii). Madhu madhu madhu (iii). //13//

Garbho devānāṁ pitā matīnāṁ patiḥ prajānām. Saṁ devo devena savitrā gata saṁ sūryeṇa rocate (i). //14//

Samagniragninā gata saṁ daivena savitrā saṁ sūryeṇārociṣṭa.
Svāhā samgnistapasā gata saṁ daivyena savitrā saṁ sūryeṇārūrucata (i). //15//

Dhartā divo vi bhāti tapasaspṛthivyāṁ dhartā devo devānāmamartyastapojāḥ. Vācamasme ni yaccha devāyuvam (i). //16//

Apaśyaṁ gopāmanipadyamānamā ca parā ca pathibhiścarantam.
Sa sadhrīcīḥ sa viṣūcīrvasāna ā varīvarti bhuvaneṣvantaḥ (i). //17//

12. (O Earth) always unconquered, from the east, under the overlordship of the adorable Lord, may you bestow long life on me. (1) O blessed with sons, from the south, under the overlordship of the resplendent Lord, may you bestow progeny on me. (2) O pleasing to rest upon, from the west, under the overlordship of the creator Lord, may you bestow vision on me. (3) O good of audition, from the north, under the overlordship of the sustainer Lord, bestow riches and nourishment on me. (4) O great support, from zenith, under the overlordship of the Lord supreme, may you bestow vigour on me. (5) May you protect me from all the miseries. You are the driving force of man. (6)

13. Svāhā ! May you be surrounded by sun-rays. (1) Save us from contaminations from the sky. (2) Sweet, sweet, sweet! (3)

14. Embryo of the enlightened ones, father of intellects, and the protector Lord of all the creatures, radiant He goes along with the radiant creator Lord, and He shines with the sun. (1)

15. The adorable Lord shines forth along with the fire, along with the radiant creator and along with the sun. Svāhā! The adorable Lord shines forth along with austerity, along with the creator divine, and along with the sun. (1)

16. The upholder of the sky, upholder of the bounties of Nature, immortal and born of austerities, shines on the earth by His austerity. May He grant us the speech that endears us to the enlightened ones (1)

17. I have beheld the unwearied protector of the universe, the sun, travelling (spirally) upwards and downwards by various orbits; invested with aggregative and diffusive radiance, he revolves in the midst of the regions. (1)

विश्वांसां भुवां पते विश्वंस्य मनसस्पते विश्वंस्य वचसस्पते सर्वंस्य वचसस्पते ।
देवश्रुत्त्वं देव घर्म देवो देवान् पाह्यत्र प्रावीरनु वां देववीतये ।
मधु माध्वीभ्यां मधु माधूचीभ्याम् ॥ १८ ॥
हृदे त्वा मनसे त्वा दिवे त्वा सूर्याय त्वा । ऊर्ध्वो अध्वरं दिवि देवेषु धेहि ॥ १९ ॥

पिता नोऽसि पिता नो बोधि नमस्ते अस्तु मा मा हिᳪंसीः ।
त्वष्टृमन्तस्त्वा सपेम पुत्रान्पशून्मयि धेहि प्रजामस्मासु धेह्यरिष्टाऽहᳪं सह पत्या भूयासम् ॥ २० ॥
अहः केतुना जुषताᳪं सुज्योतिर्ज्योतिषा स्वाहा ।
रात्रिः केतुना जुषताᳪं सुज्योतिर्ज्योतिषा स्वाहा ॥ २१ ॥

Viśvāsāṁ bhuvāṁ pate viśvasya manasaspate viśvasya vacasaspate sarvasya vacasaspate.
Devaśruttvaṁ deva gharma devo devān pāhyatra prāvīranu vāṁ devavītaye.
Madhu mādhvībhyāṁ madhu mādhūcībhyām (i). //18//

Hṛde tvā manase tvā dive tvā sūryāya tvā. Ūrdhvo adhvaraṁ divi deveṣu dhehi (i). //19//

Pitā no' si pitā no bodhi namaste astu mā mā hiṁsīḥ (i).
Tvaṣṭṛmantastvā sapema putrān paśūn mayi dhehi prajāmasmāsu dhehyariṣṭā' haṁ saha patyā bhūyāsam (ii). //20//

Ahaḥ ketunā juṣatāṁ sujyotirjyotiṣā svāhā.
Rātriḥ ketunā juṣatāṁ sujyotirjyotiṣā svāhā (i). //21//

18. O Lord of all the worlds, O Lord of all the thought, O Lord of all the speech, O Lord of the speech of all, you listen to the invocations of the enlightened ones; O shining Lord, may you protect the enlightened ones. May He protect both of you for well-being of the enlightened ones. (May there be) sweetness for the lovers of sweet; sweetness for the seekers of sweet. (1)

19. O Lord, we invoke you for (purification of) heart; we invoke you for mind. We invoke you for heaven. We invoke you for the sun. May you place our sacrifice above in the heaven among the enlightened ones. (1)

20. You are our father. May you enlighten us as father. We bow in reverence to you. May you not harm me. (1) Filled with creative impulse, may we approach you. May you bestow sons as well as cattle on me. May you bestow progeny on me. May I remain uninjured along with my husband. (2)

21. May the day, full of good light, pass in the light of good actions. Svāhā. May the night, full of good lights, pass in the light of good thoughts. Svāhā. (1)

अथाष्टात्रिंशोऽध्यायः ।

देवस्य त्वा सवितुः प्रसवेऽश्विनोर्बाहुभ्यां पूष्णो हस्ताभ्याम् । आ ददेऽदित्यै रास्नाऽसि ॥ १ ॥
इड एह्यदित एहि सरस्वत्येहि । असावेह्यसावेह्यसावेहि ॥ २ ॥
अदित्यै रास्नाऽसीन्द्राण्या उष्णीषः । पूषाऽसि घर्माय दीष्व ॥ ३ ॥
अश्विभ्यां पिन्वस्व सरस्वत्यै पिन्वस्वेन्द्राय पिन्वस्व ।
स्वाहेन्द्रवत् स्वाहेन्द्रवत् स्वाहेन्द्रवत् ॥ ४ ॥
यस्ते स्तनः शशयो यो मयोभूर्यो रत्नधा वसुविद्यः सुदत्रः ।
येन विश्वा पुष्यसि वार्याणि सरस्वति तमिह धातवेऽकः । उर्वन्तरिक्षमन्वेमि ॥ ५ ॥

ATHĀṢṬĀTRIṀŚO' DHYĀYAḤ

Devasya tvā savituḥ prasave' śvinorbāhubhyāṁ pūṣṇo hastābhyām. Ā dade' dityai rāsnā' si (i). //1//

Iḍa ehya - (i) dita ehi (ii) sarasvatyehi. Asāvehyasāvehyasāvehi (iii). //2//

Adityai rāsnā' sīndrāṇyā uṣṇīṣaḥ (i). Pūṣā'si (ii) gharmāya dīṣva (iii). //3//

Aśvibhyāṁ pinvasva (i) sarasvatyai pinvasve -(ii) ndrāya pinvasva (iii). Svāhendravat (iv) svāhendravat (v) svāhendravat (vi). //4//

Yaste stanaḥ śaśayo yo mayobhūryo ratnadhā vasuvidyaḥ sudatraḥ.
Yena viśvā puṣyasi vāryāṇi sarasvati tamiha dhātave' kaḥ (i). Urvantarikṣamanvemi (ii). //5//

CHAPTER THIRTY-EIGHT

1. At the impulsion of the creator God, I take you up with arms of the healers and with hands of the nourisher. You are the girdle of the Eternity. (1)

2. Come O divine intellect. (1) Come O mother Eternity. (2) Come O divine speech. Come hither so and so; come hither so and so; come hither so and so. (3)

3. You are the girdle of the Eternity and diadem of the resplendent deity. (1) You are the nourisher. (2) Donate for the sacrifice. (3)

4. Flow abundantly for the twin divines. (1) Flow abundantly for the divine speech. (2) Flow abundantly for the resplendent Lord. (3) Dedicated to one devoted to the resplendent Lord. (4) Dedicated to one devoted to the resplendent Lord. (5) Dedicated to one devoted to the resplendent Lord. (6)

5. O divine speech, may you suckle me your breast that brings sleep, and is source of bliss, store of jewels, finder of treasures, and liberal donor, and with which you nourish all the covetable things. (1) I hereby move into the vast mid-space. (2)

गायत्रं छन्दोऽसि त्रैष्टुभं छन्दोऽसि द्यावापृथिवीभ्यां त्वा परि गृह्णाम्यन्तरिक्षेणोप यच्छामि ।
इन्द्राश्विना मधुनः सारघस्य घर्मं पात वसवो यजत वाट् ।
स्वाहा सूर्यस्य रश्मये वृष्टिवनये ॥ ६ ॥

समुद्राय त्वा वाताय स्वाहा सरिराय त्वा वाताय स्वाहा ।
अनाधृष्याय त्वा वाताय स्वाहाऽप्रतिधृष्याय त्वा वाताय स्वाहा ।
अवस्यवे त्वा वाताय स्वाहाऽशिमिदाय त्वा वाताय स्वाहा ॥ ७ ॥
इन्द्राय त्वा वसुमते रुद्रवते स्वाहेन्द्राय त्वाऽऽदित्यवते स्वाहेन्द्राय त्वाऽभिमातिघ्ने स्वाहा ।
सवित्रे त्वऽऋभुमते विभुमते वाजवते स्वाहा बृहस्पतये त्वा विश्वदेव्यावते स्वाहा ॥ ८ ॥
यमाय त्वाऽङ्गिरस्वते पितृमते स्वाहा । स्वाहा घर्माय स्वाहा घर्मः पित्रे ॥ ९ ॥
विश्वा आशा दक्षिणसद्विश्वान् देवानयाडिह । स्वाहाकृतस्य घर्मस्य मधोः पिबतमश्विना ॥ १० ॥
दिवि धा इमं यज्ञमिमं यज्ञं दिवि धाः । स्वाहाऽग्नये यज्ञियाय शं यजुर्भ्यः ॥ ११ ॥

Gāyatraṁ chando' si (i) traiṣṭubhaṁ chando' si (ii) dyāvāpṛthivībhyāṁ tvā pari gṛhṇāmya- (iii) ntarikṣeṇopa-yacchāmi (iv).

Indrāśvinā madhunaḥ sāraghasya gharmaṁ pāta vasavo yajata vāṭ. Svāhā sūryasya raśmaye vṛṣṭivanaye (v). //6//

Samudrāya tvā vātāya svāhā (i) sarirāya tvā vātāya svāhā (ii). Anādhṛṣyāya tvā vātāya svāhā-(iii) 'pratidhṛṣyāya tvā vātāya svāhā (iv)
Avasyave tvā vātāya svāhā-(v) 'śimidāya tvā vātāya svāhā (vi). //7//

Indrāya tvā vasumate rudravate svāhe-(i) ndrāya tvā'dityavate svāhe -(ii) ndrāya tvā' bhimātighne svāhā (iii). Savitre tva ṛbhumate vājavate svāhā (iv) bṛhaspataye tvā viśvadevyāvate svāhā (v). //8//

Yamāya tvā'ṅgirasvate pitṛmate svāhā (i). Svāhā gharmāya (ii) svāhā gharmaḥ pitre (iii). //9//

Viśvā āśā dakṣiṇasad viśvān devānayāḍiha. Svāhākṛtasya gharmasya madhoḥ pibatamaśvinā (i).//10//

Divi dhā imaṁ yajñamimaṁ yajñaṁ divi dhāḥ (i) Svā-hā'gnaye yajñiyāya śaṁ yajurbhyaḥ (ii). //11//

6. (O divine speech), you are the Gāyatrī metre. (1) You are the Triṣṭubh metre. (2) I grasp you with the heaven and earth. (3) I raise you up with the mid-space. (4) O resplendent Lord and O twin divines, may you protect our sacrifice, which is as sweet as bee's, honey. O young sages, may you offer oblation. Dedicate it to the sun-beam that brings rain. (5)

7. I dedicate you to Samudra (ocean) wind; (1) I dedicate you to Sarira (water) wind; (2) I dedicate you to Anādhṛṣya (unconquerable) wind, (3) I dedicate you to the Apratidhṛṣya (irresistible) wind; (4) I dedicate you to Avasyu (protective) wind;(5) I dedicate you to Aśimida (tranquilizer) wind. (6)

8. I dedicate you to the resplendent Lord that holds the riches and punishing power as well. (1) I dedicate you to the resplendent Lord of the suns. (2) I dedicate you to the resplendent Lord, slayer of rivals. (3) I dedicate you to the creator Lord, the prime source of celestial, terrestrial and marine energy, (4) I dedicate you to the Lord Supreme, overlord of all the bounties of Nature. (5)

9. I dedicate you to the controller Lord, radiant and protecting. (1) Dedicated to the sacrifice. (2) Let the sacrifice be dedicated to the father. (3)

10. Seated on the right, this sacrificer has offered oblations here to all the regions and all the bounties of Nature. May the twins divine enjoy the sweetness of the sacrifice with offered oblations. (1)

11. May you place this sacrifice in heaven; in heaven may you place this sacrifice. (1) I dedicate it to the adorable Lord, helper in the sacrifices; (May we obtain) happiness from the sacrificial texts. (2)

अश्विना घर्मं पातꣳ हार्द्वानमहर्दिवाभिरूतिभिः । तन्त्रायिणे नमो द्यावापृथिवीभ्याम् ॥ १२ ॥

अपातामश्विना घर्ममनु द्यावापृथिवी अमꣳसाताम् । इहैव रातयः सन्तु ॥ १३ ॥

इषे पिन्वस्वोर्जे पिन्वस्व ब्रह्मणे पिन्वस्व क्षत्राय पिन्वस्व द्यावापृथिवीभ्यां पिन्वस्व ।
धर्मासि सुधर्मामेन्यस्मे नृम्णानि धारय ब्रह्म धारय क्षत्रं धारय विशं धारय ॥ १४ ॥

स्वाहा पूष्णे शरसे स्वाहा ग्रावभ्यः स्वाहा प्रतिरवेभ्यः ।
स्वाहा पितृभ्य ऊर्ध्वबर्हिर्भ्यो घर्मपावभ्यः स्वाहा द्यावापृथिवीभ्याꣳ
स्वाहा विश्वेभ्यो देवेभ्यः ॥ १५ ॥

स्वाहा रुद्राय रुद्रहूतये स्वाहा सं ज्योतिषा ज्योतिः ।
अहः केतुना जुषताꣳ सुज्योतिर्ज्योतिषा स्वाहा ।
रात्रिः केतुना जुषताꣳ सुज्योतिर्ज्योतिषा स्वाहा ।
मधु हुतमिन्द्रतमे अग्नावश्याम ते देव घर्म नमस्ते अस्तु मा मा हिꣳसीः ॥ १६ ॥

Aśvinā gharmaṁ pātaṁ hārdvānamahārdivābhirūtibhiḥ. Tantrāyiṇe namo dyāvāpṛthivībhyām (i). //12//

Apātāmaśvinā gharmamanu dyāvāpṛthivī amaṁsātām. Ihaiva rātayaḥ santu (i) //13//

Iṣe pinvasvo -(i) rje pinvasva (ii) brahmaṇe pinvasva (iii) kṣatrāya pinvasva (iv) dyāvāpṛthivībhyāṁ pinvasva (v). Dharmāsi sudharmā -(vi)' menyasme nṛmṇāni dhāraya brahma dhāraya kṣtraṁ dhāraya viśaṁ dhāraya (vii). //14//

Svāhā pūṣṇe śarase (i) svāhā grāvabhyaḥ (ii) svāhā pratiravebhyaḥ (iii). Svāhā pitṛbhya ūrdhvabarhirbhyo gharmapāvabhyaḥ (iv) svāhā dyāvāpṛthivībhyāṁ (v) svāhā viśvebhyo devebhyaḥ (vi). //15//

Svāhā rudrāya rudrahūtaye (i) svāhā saṁ jyotiṣā jyotiḥ (ii). Ahaḥ ketunā juṣatāṁ sujyotirjyotiṣā svāhā (iii). Rātriḥ ketunā juṣatāṁ sujyotirjyotiṣā svāhā (iv). Madhu hutamindratame agnāvaśyāma te deva gharma namaste astu mā mā hiṁsīḥ (v) //16//

12. O twins divine, may you protect the sacrifice, pleasing to heart, with your protective measures in the forenoons and in the afternoons. Our homage to the sun, the time-clock. Our homage to the heaven and earth. (1)

13. The twins divine have protected the sacrifice and the heaven and earth have concorded. May all sorts of wealth be bestowed here. (1)

14. O sacrifice, may you flourish for food. (1) May you flourish for vigour. (2) May you flourish for intellectual power. (3) May you flourish for princely power. (4) May you flourish for the heaven and earth. (5) O pious one, you are the piety itself. (6) May you grant us riches unblemished with violence. Sustain our intellectuals; sustain our warrior-administrators; sustain our wealth-producers. (7)

15. Dedication to the nourisher, the affectionate. (1) Dedication to the thundering clouds. (2) Dedication to the echoing clouds. (3) Dedication to the elders, urging the sacrifice upwards and protecting the fire. (4) Dedication to the heaven and earth. (5) Dedication to all the bounties of Nature. (6)

16. Dedication to the punisher, invoked by the punishers. (1) May the light mingle with light. Svāhā. (2) May the day, full of good light, pass in the light of good actions. Svāhā. (3) May the night, full of good lights, pass in the light of good thoughts. Svāhā. (4) Whatever sweet we have in us, that we have offered to the most resplendent adorable Lord; O brilliant sacrifice, may we enjoy (your gifts). Our obeisance be to you. May you never harm me. (5)

अभीमं महिमा दिवं विप्रो बभूव सप्रथाः ।
उत श्रवसा पृथिवीꣳ सꣳ सीदस्व महाँ२ असि रोचस्व देववीतमः ।
वि धूममग्ने अरुषं मियेध्य सृज प्रशस्त दर्शतम् ॥ १७ ॥
या ते घर्म दिव्या शुग्या गायत्र्याꣳ हविर्धाने ।
सा त आ प्यायतां निष्ट्यायतां तस्यै ते स्वाहा ।
या ते घर्मान्तरिक्षे शुग्या त्रिष्टुभ्याग्नीध्रे ।
सा त आ प्यायतां निष्ट्यायतां तस्यै ते स्वाहा ।
या ते घर्म पृथिव्याꣳ शुग्या जगत्याꣳ सदस्या ।
सा त आ प्यायतां निष्ट्यायतां तस्यै ते स्वाहा ॥ १८ ॥
क्षत्रस्य त्वा परस्पाय ब्रह्मणस्तन्वं पाहि ।
विशस्त्वा धर्मणा वयमनु क्रामाम सुविताय नव्यसे ॥ १९ ॥
चतुःस्रक्तिर्नाभिर्ऋतस्य सप्रथाः स नो विश्वायुः सप्रथाः स नः सर्वायुः सप्रथाः ।
अप द्वेषो अप ह्वरोऽन्यव्रतस्य सश्चिम ॥ २० ॥
घर्मैतत्ते पुरीषं तेन वर्धस्व चा च प्यायस्व । वर्धिषीमहि च वयमा च प्यासिषीमहि ॥ २१ ॥
अचिक्रदद्वृषा हरिर्महान्मित्रो न दर्शतः । सꣳ सूर्येण दिद्युतदुदधिर्निधिः ॥ २२ ॥

Abhīmaṁ mahimā divaṁ vipro babhūva saprathāḥ (i). Uta śravasā pṛthivīm̐ sam̐ sīdasva mahām̐ asi rocasva devavītamaḥ. Vi dhūmamagne aruṣaṁ miyedhya sṛja praśasta darśatam (ii). //17//

Yā te gharma divyā śugyā gāyatryām̐ havirdhāne.
Sā ta ā pyāyatāṁ niṣṭyāyatāṁ tasyai te svāhā (i).
Yā te gharmāntarikṣe śugyā triṣṭubbhyāgnīdhre.
Sā ta ā pyatāyāṁ niṣṭyāyatāṁ tasyai te svāhā (ii).
Ya te gharma pṛthivyām̐ śugyā jagatyām̐ sadasyā.
Sā ta ā pyāyatāṁ niṣṭyāyatāṁ tasyai te svāhā (iii). //18//

Kṣtrasya tvā paraspāya brahmaṇastanvaṁ pāhi.
Viśastvā dharmaṇā vayamanu krāmāma suvitāya navyase (i) //19//

Catuḥsraktirnābhirṛtasya saprathāḥ sa no viśvāyuḥ saprathāḥ sa naḥ sarvāyuḥ saprathāḥ. Apa dveṣo apa hvaro' nyavratasya saścima (i). //20//

Gharmaitatte purīṣaṁ tena vardhasva cā ca pyāyasva. Vardhiṣīmahi ca vayamā ca pyāsiṣīmahi (i). //21//

Acikradadvṛṣā harirmahānmitro na darśataḥ. Sam̐ sūryeṇa didyutadudadhirnidhiḥ (i). //22//

17. O adorable Lord, your enlightened and vast grandeur overwhelms the sky; (1) also with your glory the earth. Come, O fire within, be seated in the innermost chamber of our heart. O fire within, worthy of sacred fuel, let the smoke of ill thoughts be dispersed to enable us to see your spotless radiance. (2)

18. O sacrifice, may your glow in the sky, that appears in Gāyatrī metre and in sacrificial fire-place, increase and be established firmly. I dedicate it to the glow of yours. (1) O sacrifice, may your glow in the mid-space, that appears in Triṣṭubh metre and in the sacrificial altar, increase and be established firmly. I dedicate it to that glow of yours. (2) O sacrifice, may your glow on the earth, that appears in Jagatī metre and in the sacrificial house, increase and be established firmly. I dedicate it to that glow of yours. (3)

19. O sacrifice, we, the people, follow you in a right way, so that we may gain new wealth. May you protect our warrior-administrators, who in turn, protect all others; may you protect body of our intellectuals as well. (1)

20. The navel of the truth extends far in all the four corners. May this truth, the life of all, make us expand far; may this truth, the complete life, make us expand far. May we drive away those who hate us, who are crooked, and who are of a different faith. (1)

21. O sacrifice, here is your fuel; flourish and expand thereby. May we also flourish and expand. (1)

22. The huge rain-cloud thunders loudly. The sun cannot be seen. This reservoir of waters (i.e. cloud), the store of riches, glows illuminated by the sun. (1)

सुमित्रिया न आप ओषधयः सन्तु दुर्मित्रियास्तस्मै सन्तु योऽस्मान्द्वेष्टि यं च वयं द्विष्मः ॥ २३ ॥
उद्वयं तमसस्परि स्वः पश्यन्त उत्तरम् । देवं देवत्रा सूर्यमगन्म ज्योतिरुत्तमम् ॥ २४ ॥
एधोऽस्येधिषीमहि समिदसि तेजोऽसि तेजो मयि धेहि ॥ २५ ॥
यावती द्यावापृथिवी यावच्च सप्त सिन्धवो वितस्थिरे ।
तावन्तमिन्द्र ते ग्रहमूर्जा गृह्णाम्यक्षितं मयि गृह्णाम्यक्षितम् ॥ २६ ॥
मयि त्यदिन्द्रियं बृहन्मयि दक्षो मयि क्रतुः ।
घर्मस्त्रिशुग्वि राजति विराजा ज्योतिषा सह ब्रह्मणा तेजसा सह ॥ २७ ॥
पयसो रेत आभृतं तस्य दोहमशीमह्युत्तरामुत्तरां समाम् ।
त्विषः संवृक् क्रत्वे दक्षस्य ते सुषुम्णस्य ते सुषुम्णाग्निहुतः ।
इन्द्रपीतस्य प्रजापतिभक्षितस्य मधुमत उपहूत उपहूतस्य भक्षयामि ॥ २८ ॥

Sumitriyā na āpa oṣadhayaḥ santu durmitriyāstasmai santu yo' smāndveṣṭi yaṁ ca vayaṁ dviṣmaḥ (i). //23//

Udvayaṁ tamsaspari svaḥ paśyanta uttaram. Devaṁ devatrā sūryamaganma jyotiruttamam (i). //24//

Edho' syedhiṣīmahi (i) samidasi tejo' si tejo mayi dhehi (ii). //25//

Yāvatī dyāvāpṛthivī yāvacca sapta sindhavo vitasthire.
Tāvantamindra te grahamūrjā gṛhṇāmyakṣitaṁ mayi gṛhṇāmyakṣitam (i). //26//

Mayi tyadindriyaṁ bṛhanmayi dakṣo mayi kratuḥ.
Gharmastriśugvirājati virājā jyotiṣā saha brahmaṇā tejasā saha (i). //27//

Payaso reta ābhṛtaṁ tasya dohamaśīmahyuttarāmuttarāṁ samām (i).
Tviṣaḥ saṁvṛk kratve dakṣasya te suṣumṇasya te suṣumṇāgnihutaḥ (ii).
Indrapītasya prajāpatibhakṣitasya madhumata upahūta upahūtasya bhakṣayāmi (iii). //28//

23. May the waters and herbs be friendly to us; and unfriendly to him who hates us and whom we do hate. (1)

